पञ्चचक्रं वासुदेवं षष्ठं प्रद्युम्नमेव च ।
सप्तचक्रं तु वाराहमष्टमं पुरुषोत्तमम् ॥
नवमं नारसिंहं च दशमं दशजन्मनि ।
एकादशानिरुद्धं च द्वादशं द्वादशात्मकम् ॥
अन्येषु बहुचक्रेषु . . . प्रतिष्ठिता ॥

65

PM1428 **तारकयोगः**

Beginning:

तारकयोगलक्षणमतिविचित्रं शृणु सावधानेन ।
प्राकृतगोप्यतरमेतदप्येवं त्वद्भक्तितुष्टोऽहं वक्ष्ये ॥
स्वल्पबुद्धयः पुरुषा मन्त्रलयहठयोगारण्ये चिरं चरन्ति ।
तान् संत्यज्य गुरुमुखात् तारकाभ्यासी चाशु सिद्धो भवति ॥
तारकयोगस्त्वेषोऽभ्यसितव्यः सम्यङ्निमीलिताक्षो वा ।
किंचिदुन्मीलिताक्षश्चान्तर्नेत्रेण भ्रूदहरयोरुपरि ॥
सच्चिदानन्दतेजःकूटरूपं परं ब्रह्मावलोकयेत् ।
तारकाग्रप्रत्यालक्ष्यं गगने गुरोरेव लब्धश्चेत् तारकयोगसिद्धिः ॥

End:

सोऽतिगूढोऽतिरम्यस्त्वव्यक्तश्च । तदेवात्मस्थानमिति गुरुणा ज्ञानप्लवाधिरूढेन ज्ञेयम् । तद्वाह्यान्तर्मध्ये लक्ष्यं स्थितं तन्मध्ये सर्वजगल्लीनमिति ज्ञेयम् । किंच तदेव रम्यनादबिन्दुकलान्वितं सगुणनिर्गुणपरमनयनोत्सवकारणं नित्यात्मस्थलं आपोज्योतिरिति प्रसिद्धं । नारायणस्थलम्, तद्वेत्ता मुक्तिभागिति च । आदावग्निबिम्ब, तन्मध्ये सूर्यमण्डलं मितहितदीप्तिविराजितं तन्मध्येऽक्षयसुधाधारास्पन्दं चन्द्रबिम्बं वर्तते, तन्मध्ये गुरुरूपेण परं ब्रह्म वर्तत इति ।

Colophon:

इति **तारकयोगः** ।

66

75278 **नवशक्तिषट्कम्**

The following is the full text of the work:

द्विसप्ततिसहस्राणि शरीरं व्याप्य नाडिकाः ।

अधश्चोर्ध्वं च तिष्ठन्ति नव तासां प्रमाणिकाः ॥
गुदस्य पृष्ठभागेऽस्मिन् वेणुदण्डाख्यदेहभृत् ।
दीर्घास्थि मूर्धपर्यन्तं ब्रह्मनाडीति कथ्यते ॥
तस्यान्ते सुषिरं सूक्ष्मं ब्रह्मरन्ध्रेति सूरिभिः ।
वज्रदण्डेति संभूता मणयश्चैकविंशतिः ॥
सुषुम्नायां स्थिताः सर्वे सूत्रे मणिगणा इव ।
यासौ पूर्वं वहन्ती विलसति रसना कुण्डली सा त्रिखण्ड-
व्याप्ता कृत्वा सुषुम्ना ग्रसनमथ च षट्चक्रमेदाष्टचक्रा ।
पायौ त्वाधारशक्तिर्भवति मणिगणश्चेन्द्रियस्य प्रदेशे
ब्रह्मद्वारेऽथ ठंकिण्यपि मुखविवरेऽस्याः फणाकारयुक्ता ॥
ऊर्ध्वा शक्तिस्तत्र मुख्यास्यमध्ये ब्रह्मग्रन्थिस्फोटने कारणत्वात् ।
तस्या मूलं ज्ञायतां वज्रनाडिं भेदे मर्म श्रीगुरोरेव वक्तृ ॥
अथ ये तु हंसरूपे द्वे नाड्यौ प्राणवाहिन्यौ ।
जाते इडा पिङ्गला च ते दधौ मूलबीजकम् ॥
गौलौ(चक्षु)र्नाडियुगं बभूव चरणाङ्गुष्ठस्थमार्गान्तरे
यद्वच्छ्रोत्रपुटस्थनाडिकयुगं तेनैकसूत्रं मतम् ।
हस्ताङ्गुष्ठयुगस्य वा परगतं यन्नाडिकायुग्मकं
तत्पादद्वयपार्ष्णिभागयुगलं गत्वा स्थिरं दृश्यते ॥
ततः पृथक्पृथग्गत्या मिलिता नवशक्तयः ।
श्रीमत्स्यनाथपुत्रेण गोरक्षेणेति भाषितम् ॥

Colophon:

इति **गोरक्षनाथ**विरचितं **नवशक्तिशतकं** (?) संपूर्णम् । (०शतकं seems to be scribal error ; नवशक्तिषट्कं is written on the margin of the MS.)

68

70290 **नादप्रकरणम्**

Beginning:

कोऽसौ नादः किं प्रमाणं किंस्वरूपं स्थितिः कुतः ।
किमर्थं केन चैवायमीरितः संप्रवर्तते ॥ १ ॥
अनादित्वात् संभवो न नित्यत्वान्नियतिर्न च ।
यथा संवेत्त्यनुच्चारं शब्दाक्षरविवर्जितम् ॥
संप्राप्यते सुखेनैव तदुपायं ब्रवीमि ते ॥ २ ॥

अङ्गुष्ठाभ्यां च दायित्वसाधकश्रवणे उभे ।
ततः शृणोति तन्नादमम्बुदप्रतिमध्वनिम् ॥ ३ ॥

End:

मनःस्थिरतरे भावे पवनः स्थिरतामयात् ॥ २६ ॥
स्थिरत्वमागता दृष्टा जाग्रत्वं नाशयेद् ध्रुवम् ।
मनःस्थिरत्वमापन्नं स्वप्नं नाशयति ध्रुवम् ॥ २७ ॥
पवने निश्चले जाते सुषुप्तिः क्षयमागता ।
मरुद् दृष्टो मनोनाशे तुर्यमुत्पादयन्ति हि ॥ २८ ॥
मरुद्दृष्टिर्मनोऽभ्यासे राजयोगपदं भवेत् ।
तुर्ये तु राजयोगः स्यात् तत्र कालो न विद्यते ।
सिध्यन्त्यवस्था न्वनया मुद्रया कालवञ्चनम् ॥ २९ ॥

69

PM286 नादलक्षणम्

The following is the full text of the work. The title is given in the list of contents written by a later hand:

नादस्तथानुनादश्च महानादस्ततः परम् ।
नादाविश्वसनादान्ता इति पञ्चविधः स्मृतः ॥ १ ॥
त्रिकूटं त्रिहठस्थानं गोर्ताख्यं चाथ पीठकम् ।
प्रणालीभ्रामरीगुम्फब्रह्मरन्ध्राण्यनुक्रमात् ॥ २ ॥
तारकं दण्डकं चैव कुण्डल्यामर्धचन्द्रकम् ।
पञ्चमं बिन्दुसंयुक्तं पञ्चब्रह्म सनातनम् ॥ ३ ॥
प्रथमं तारकाकारं द्वितीयं दण्डतोच्यते ।
तृतीयं कुण्डलं प्रोक्तं चतुर्थं चार्धचन्द्रकम् ॥ ४ ॥
पञ्चमं बिन्दुसंकाशं प्रणवं तत्र संस्थितम् ॥ ४ ॥
तारकं च भवेत् पूर्वे दण्डकं पश्चिमे तथा ।
कुण्डलं दक्षिणे भागे चार्धचन्द्रकमुत्तरे ॥
बिन्दुरूर्ध्वमिति प्रोक्तं तत्र प्रणवशोभितम् ॥ ५ ॥
भूचरी गोचरी चैव सहचरी त्वथोन्मनी ।
खेचरी चेति विख्याताः पञ्च मुद्राः प्रकीर्तिताः ॥ ६ ॥
शरीरदार्ढ्यं सुमनःस्थिरत्वं वश्यानिलत्वं दृगचञ्चलत्वम् ।
अनाहतध्यानपरायणत्वं निरावलम्बाभ्यसनेन यान्ति ॥ ७ ॥

एकाग्रता . . . महात्मना सदा नीरोगता चाल्पपुरीषमूत्रता ।
अल्पाशनत्वं सुमनःप्रसन्नता अजाड्यता तामसगुणेन सद्यः(हीनता) ॥ ८ ॥
वपुःकृशत्वं वदने प्रसन्नता वाचा स्फुटं तन्नयने च निर्मलम् ।
अरोगता बिन्दुजमग्निदीपनं नाड्यां च शुद्धिः हठसिद्धिलक्षणम् ॥ ९ ॥

70

PM1429 **नादोत्पत्तिप्रकरणम्** आन्ध्रटीकासहितम्

Beginning:

व्योमकेश विरूपाक्ष गगनानन्दविग्रह ।
नाडीचक्रगतं नादभेदं तद्वक्तुमर्हसि ॥
इति पृष्टो महादेवो लोकानुग्रहहेतवे ॥ १ ॥

व्या—आकाशव्यापकालैन शिरोरुहालु कलिगिन आकाशं वलने केशालु ऐना आकाशमें जडमुडिगा गलिगिनशुवण्टिन्नि अगोचरमैनरूपं कलिगिनशुवण्टिन्नि । सकल प्रपञ्चमुलुन्नु नीयोक्क-नेत्रालैन शून्यत्रयमे शरीरंगा कलिगिनशुवण्टि महानुभावा । पूर्वं नाडीचक्रं चेप्पितरि । आनाडी-चक्रं वल्लनुञ्चि पुट्टिनशुवण्टिनादभेदं इलागु अडिदानियन्दु उण्डेति यट्लु यन्निविधालु आयनु अदि सक्कगा तेलिय चेप्पमनि पार्वती देविचेत लोकानुग्रहं कोरकु श्रीपरमेश्वरुडु अडगपडिनवाडै चेप्पु चुन्नाडु ।

. . . श्रीशिवः—

नाडीचक्रगतं नादं तस्य लक्ष्यं वदाम्यहम् ।
येन विज्ञानमात्रेण मुच्यते जन्मबन्धनात् ॥ २ ॥

End:

एवं निरन्तरं कृत्वा चित्तं शून्ये विलीयते ।
चित्तं लीनं यदि भवेत् कालज्ञानं भविष्यति ॥ २२ ॥
अनाहतस्य नादं च तन्नादं शृणु सर्वदा ।
न शृणोषि यदा नादं सद्यो मुक्तिर्न संशयः ॥ २३ ॥
प्राप्ते ज्ञानेन विज्ञाने ज्ञेये च हृदि संस्थिते ।
लब्धशान्तिपदे देहे न योगो नैव धारणा ॥ २४ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगगनानन्दनाथात्याश्रमिणा कृतनादोत्पत्तिप्रकरणं सटीकं समाप्तम् ।

71

67731 **निजतत्त्वामृतरसः**

Beginning:

सुषुम्नोद्यद्ब्रन्ध्रप्रथमपदवीकल्पितमणि-
गृहारामक्रीडापरवशवधूटीसहचरम् ।
महात्मानं देवं शिवतनयभावेन शिवव-
च्छिवाकारं विघ्नप्रशमकरणं यामि शरणम् ॥ १ ॥
सुषुम्नाया मार्गे प्रकटितमनोवृत्तिलहरी-
परिश्रान्तः शान्तं शिवचरणमालम्ब्य प्रणवैः ।
मम प्रत्यूहा ये भुवि विदितपापाः श्लथयितुं
यतन्ते ते यान्तु द्रुतमशिवमात्मघ्नहृदयाः ॥ २ ॥
सुषुम्नाया स्थानं गगनतटिनीङ्कृतपरिघं
बर्हिर्वेद्यादीप्यन्निजमहिमसप्तर्षिशरणम् ।
चतुर्वेदाघोषध्वनितपटहं मे कलयतः
परं विघ्नाः पापास्त्रिपुरहर नश्यन्तु झटिति ॥ ३ ॥
इमां विद्यां ब्रह्मप्रकटनविलासैकलहरीं
सरस्वत्या लक्ष्म्याप्युपरचितकैङ्कर्यरचनाम् ।
तथाग्नीषोमाभ्यां प्रणतचरणां मे कलयतः
परं विघ्नाः पापास्त्रिपुरहर नश्यन्तु झटिति ॥ ४ ॥
सिरामूर्ध्वं मूर्ध्नि स्रवदमृतधारां नवसिरा-
परामृष्टां नानाविषयधमनीस्थानमहिताम् ।
प्रधानाभ्यां द्वाभ्यां विहितभजनं मे कलयतः
परं विघ्नाः पापास्त्रिपुरहर नश्यन्तु झटिति ॥ ५ ॥

End:

शिव श्रीमन्नाड्यावरणविरहान्मोक्षपदवी-
सुखं मूर्धद्वारं हृदयकमलद्वारमुदितम् ।
इदं कल्पायुष्यप्रदमिति दृढं मे कलयतः
परं विघ्नाः पापास्त्रिपुरहर नश्यन्तु झटिति ॥ १०३ ॥
विदांकुर्वन्त्वेवं परमशिवदासेन कथितैः
श्रुतिश्लोकैरेतैरवगमितमेकाधिकशतैः ।
इदं सारज्ञानं परदहरविद्येति सुधियो
रहस्यं वेदानां जगति निजतत्त्वामृतरसम् ॥ १०४ ॥

तदाह परमेश्वरः सकविराजयोगीश्वर-
स्तदीयपठनाद् ध्रुवं सकलसौख्यमारोग्यताम् ।
चिरायुरधिकश्रियं निगमशास्त्रविद्यादिकं
ददातु स महेश्वरः करुणयैव दिव्यो गुरुः ॥ १०५ ॥

73

TR1185 पञ्चावस्थालक्षणम्

Beginning:

जाग्रत्स्वप्नसुषुप्तिस्तुर्यतुर्यातीतपञ्चकम् ।
भ्रूकण्ठहृदये नाभौ लिङ्गमूले प्रवर्तिकाः ॥
पञ्चत्रिंशत् तथा जाग्रे पञ्चविंशतिः स्वप्नके ।
त्रयः सुतौ स्थिता भावास्तद्द्वयं तुर्यभावतः ॥
एकान्तस्तुर्यकातीते पूर्वस्थानेषु गोचरः ।
तुर्यातीता महामाया कुटिला तत्र केवला ॥
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणज्ञानेन्द्रियपञ्चकम् ।
शब्दः स्पर्शस्तथा रूपरसौ गन्धश्च पञ्चमः ॥
वाक्पाणिपादपायूपस्थकं चैव तु पञ्चमम् ।
वचनादानगमनविसर्गानन्दपञ्चकम् ॥

End:

हृत्पद्मे प्रातरर्कोदयनिवहनिभं मध्यनाड्यां विचिन्त्यं
मध्याह्ने भ्रूसरोजे परमशिवजचिद्रूपमिन्दुप्रकाशम् ।
सायाह्ने ह्यूर्ध्वपद्मे ह्यमृतजलनिधिद्योतितं सोत्थनादं
रात्रेरर्धे प्रमेयमविकलमचलं द्वादशान्ते महस्तत् ॥
गन्धे भूः सलिलं रसे हुतवहो रूपे मरुत् स्पर्शने
शब्दे स्यात् खमहंकृतौ पुररिपुस्तन्मात्रकास्तामसे ।
कर्माक्षाणि च राजसे सहमनोबुद्धीन्द्रियैः सात्त्विके
बुद्धौ तच्च गुणेषु सा गुणगणोऽव्यक्ते लयं गच्छति ॥

75

70290 बिन्दुनिर्णयः

Beginning:

ईश्वर उवाच—

ज्योतिर्ध्यानात् सदा योगी सर्वसिद्धिमवाप्नुयात् ।

सर्वभूतहृदिस्थोऽसौ ज्वलत्पावकवर्चसा ॥
अन्तरात्मेति संज्ञेयं जगच्चक्षुर्न संशय: ॥ १ ॥
यत्र यो दृश्यते रक्तो नेत्रयो: प्रान्तसंस्थित: ।
अकारो ब्रह्मणो रूपं राजसं परिचक्षते ॥ २ ॥
रक्तशुक्लतया यत्र दृश्यते नयने स्थित: ।
उकारं वैष्णवं रूपं सात्त्विकं परिचक्षते ॥ ३ ॥
यत्र यद् दृश्यते कृष्णमण्डलं नयने स्थितम् ।
मकारं रुद्ररूपं तु तामसं परिकीर्तितम् ॥ ४ ॥

End:

एतस्मिन् तारकस्थाने स्थितावस्था हि जाग्रता ।
नेत्रस्थरक्तरेखायां गौतमाख्योऽस्ति शंकर: ॥ २८ ॥
नेत्रस्य शुक्लरेखायां वासिष्ठाख्यो हि वासव: ।
नेत्रस्य नीलरेखायां विश्वामित्राभिधो हरि: ॥ २९ ॥
अधो या गमनस्थाने भरद्वाजाभिधो हरि: ।
पर्जन्यस्तूर्ध्वपक्षेषु हरिनामादिदेवता: ॥ ३० ॥
कश्यपाख्या च पृथिवी ह्यध:पक्षे च संस्थिता ।
दक्षिणाक्षिमुखे विश्वो ज्योति:स्थ: कपिलो हरि: ॥ ३१ ॥

76

PM2763 **मानसस्मृति:**

Beginning:

श्रीनिवासपदाम्भोजयुगं नत्वा गुरूनपि ।
श्रीशमानसिकध्यानविधिं वक्ष्ये यथामति ॥ १ ॥
श्रीशपादाम्बुजासक्तो मानसं स्नानमाचरेत् ।
स्वदेहान्तर्गता नाड्य: पिङ्गलेलासुषुम्नका: ॥ २ ॥
पिङ्गला यमुना प्रोक्ता इला गङ्गा प्रकीर्तिता ।
तयोरन्त:स्थिता नाडी सुषुम्नाख्या सरस्वती ॥ ३ ॥
सुषुम्नास्थितसज्ज्ञेयहृत्पद्महृदवासिन: ।
श्रीहरेर्ध्यानसलिलं मानसं तीर्थमुत्तमम् ॥ ४ ॥
तत्तीर्थस्नाननिष्पङ्कशुद्धश्चैकान्तदेशग: ।
समाचलासनासीनस्तद्गतैकाग्रमानस: ॥ ५ ॥

श्रीदेविगे पतियादंथा श्रीनिवासपादयुगलवन्नु तथा गुरुगळन्नु ग्रन्थारम्भदल्लि नमस्करिसि लक्ष्मीपतिय मानसिकध्यानविधियन्नु बुद्धयनुसारवागि हेळुथेने ॥ १ ॥

End:

एवं यः कुरुते नित्यमप्रमत्तः श्रियः पतेः ।
भक्त्या तु मानसीमर्चां जीवन्मुक्तो न संशयः ॥ २४३ ॥
अनन्तेति प्रमेयानां ग्रन्थगौरवभीतितः ।
संततध्यानसिद्ध्यर्थं समासात् संग्रहः कृतः ॥ २४४ ॥
अज्ञानाज्ज्ञानतो वापि वदन् किमपि भाषितम् ।
युक्तायुक्तं महीयद्भिः सद्भिः संगृह्यतामयम् ॥ २४५ ॥
स्वैजीवेङ्कटगिर्यार्यपुत्रः कृष्णार्यपौत्रकः ।
श्रीवेङ्कटकुमाराख्यः कृतवान् मानसस्मृतिम् ॥ २४६ ॥
ग्रन्थोऽयं पाठमात्रेण भक्तिज्ञानादिसिद्धिदः ।
किमु ज्ञानादनुष्ठानाद् विमुक्तिः शाश्वती भवेत् ॥ २५० ॥

Colophon:

इति श्रीमानसस्मृतिः समाप्ता ।

77

TR1023 **योगतत्त्वम्** (मच्छन्दिनीनाथमतम्)

Beginning:

मच्छन्दिनीमतं ज्ञानं वक्ष्ये कालस्य वञ्चनम् ।
यदभ्यासेन योगेन ज्ञायते परमं पदम् ॥
मुक्तेरारोहणं योगं विद्ययाशक्तचेतसाम् ।
शमनं भवतापस्य ध्रुवं भजत सत्तमाः ॥
शरीरं मलविक्रान्तं शरीरं योगसाधनम् ।
तस्मात् सर्वप्रयत्नेन योगं भजत सत्तमाः ॥
नाभुक्तं क्षीयते कर्म जन्मकोटिशतैरपि ।
कर्मक्षयकरं नाम योगं भजत सत्तमाः ॥
तस्माद् गुरूपदिष्टेन मार्गेण ज्ञानवह्निना ।
स दग्ध्वा सर्वकर्माणि परं ह्येति प्रगच्छता (प्रयत्नतः) ॥

End:

आधारं प्रथमं पद्मं स्वाधिष्ठानं द्वितीयकम् ।
मणिपूरं तृतीयं चानाहतं च चतुष्टयम् ॥
विशुद्धाख्यं पञ्चमं स्यात् षष्ठमाज्ञाम्बुजं स्मृतम् ।
ध्यानबन्धः प्रभवेत् पक्षात् पक्षान्तरान्तः . . . ॥

मनसा मारुतेनैव आकाशो अलयेत्(?) मरुत् ।
ब्रह्मरन्ध्रविभेदेन विशेद्योगी परं पदम् ।

इति मच्छन्दिनीनाथमतं योऽति . . . ।

79

72247 योगतन्त्रम् केरळभाषाव्याख्यासहितम्

Beginning:

एकान्ते गुरुमासीनमव्यग्रोज्ज्वलमानसः ।
पप्रच्छ शिष्यो मेधावी प्रणम्येदं समाहितः ॥
योगाभ्यासक्रमं सम्यग्भगवन् वक्तुमर्हसि ।
योगः किल वरं विद्वन् मुक्तये सर्वदेहिनाम् ॥
शुश्रूषुणा स्वशिष्येण पृष्टो गुरुरुदारधीः ।
कृपयाश्रुकलो भूत्वा तमुवाचाभिनन्द्य च ॥

तन्टे गुरुविनोटँ शिष्यन् योगाभ्यासक्रमं चोदिच्चतिनँ शिष्यनोटँ अरियिक्क चेय्युन्नतँ ।

स्वाङ्गुलीभिर्मनुष्याणां षण्णवत्यङ्गुलायतम् ।
शरीरं वत्स तन्मध्ये मूलाधारं विदुर्बुधाः ॥

End:

पुनर्गुदं समाकृष्य कुम्भके मणिपूरके ।
वायुबीजं चाग्निबीजं स्मृत्वा ध्यात्वा च तौ सुरौ ॥
प्रदक्षिणं नाभिदेशं भ्रामयेदनिलेन च ।
आचरेत् प्रतिलोमं च भ्रमणं तदुदीरितम् ॥
मलशुद्धिः संभवति भ्रमणेन यथाविधि ।

पिन्ने कुम्भकं चैतँ गुदत्ते मेल्पट्टुवलिच्चुकोण्डँ मणिपूरप्रदेशत्तुङ्ङ् अग्निबीजवुं वायुबीजवुं स्मरिच्चँ बीजमध्यत्तुङ्ङ् अग्नियेयुं वायुविनेयुं ध्यानिच्चँ वायुविनेक्कोण्टँ अप्रदेशत्ते वलत्तुपुरवुं इटत्तुपुरवुं चुरुरवुँ अतिनँ भ्रमणकमेन्नु पेरँ । मलशोधनफलम् । शुकः अमृतगायत्री छन्दः, मृतसंजीविनी रुद्रो देवता, ओं जुं सः ईं सौः हं संजीविनि मम हृदयग्रन्थिस्थं प्राणं कुरु कुरु, सोऽहं सौः मः ईं सः जूं अमृत ओं नमः शिवाय इति मन्त्रम् ।

84

72330 योगतारावलिः राजतरळव्याख्यायुता

लक्ष्मीसंश्लिष्टवा[1]माङ्गमगजाततनुजं भजे ।

[1] वामं सुन्दरमित्यर्थः in margin.

यत्पदाब्जरजःस्पर्शात् प्रत्यूहाब्धिः स्थलायते ॥ १ ॥
मातृकां त्रिपुरां वन्दे प्रणवादिस्वरूपिणीम् ।
प्रेरणीं बुद्धिवृत्तीनां सर्वकामप्रपूरणीम् ॥ २ ॥
चित्पुस्तकसुधाकुम्भमुक्तामालाकरं परम् ।
चित्तन्यग्रोधसंवासं दक्षिणास्यमहं भजे ॥ ३ ॥
ब्रह्मपिण्डाण्डकदलीश्रीशैलपुरवासिने ।
शेषभूषाय शेषाय दक्षिणामूर्तये नमः ॥ ४ ॥
रामं श्यामलकोमलाङ्गममलं वामार्धजानिं शिवं
योगीन्द्रादिहृदर्चिताङ्घ्रिकमलं लीलावतारं परम् ।
फालाक्षं विधिविष्णुरुद्रविनुतं योगप्रदं राघवं
सत्यज्ञानमनन्तमाद्यमनिशं वन्दे मतेः शुद्धये ॥ ५ ॥
कल्पद्रुमूलकमलनिषण्णो नन्दनन्दनः ।
पायसादी रुक्मरुचिर्नानटीतु हृदम्बुजे ॥ ६ ॥
अकारोकारपक्षं तदर्धमात्रोत्तमाङ्गकम् ।
मपुच्छं गुणपादादि धर्मनेत्रं नुमः परम् ॥ ७ ॥
वन्दारुमन्दारलतानवद्या सेन्द्रादिबृन्दारकबृन्दवन्द्या ।
वेदादिविद्या शरदिन्दुगौरा श्रीशारदा मे गिरि सारदास्तु ॥ ८ ॥
योगीन्द्रबृन्दपरिकल्पितचित्प्रसूनसंपूजिताङ्घ्रिकमलं कमलायताक्षम् ।
श्रीयोगसूत्रकृतमाद्यमनन्तमीशं शेषं विशेषनिलयं कलये हृदब्जे ॥ ९ ॥
वेदव्यासं हृदावासं वासुदेवांशसंभवम् ।
योगभाष्यकृतं योगिबृन्दवन्द्यं पदं नुमः ॥ १० ॥
नानाभेदमतध्वान्तचण्डदीधितिमच्युतम् ।
शंकरं शंकराचार्यं हृदालयमहं भजे ॥ ११ ॥
यतये श्रीनृसिंहाय बोधानन्दघनाय च ।
श्रीवेङ्कटाय रामाय शिवाय ब्रह्मणे नमः ॥ १२ ॥
तातं पूतचरित्रपावितलसच्छात्रं त्रयीसांख्यसद्-
योगाभ्यासगरिष्ठतापुरुतरं कोनेश्वरं चेश्वरम् ।
पातिव्रत्यतनूकृताखिलसतीं नागाम्बिकामम्बिका-
मीशासक्तमतिं नमामि शिरसा मद्भावसंशुद्धये ॥ १३ ॥
श्रीमद्वेङ्कटरामं तं श्रीगुरुं छात्रकामदम् ।
राज्यलक्ष्मीयुतं वन्दे साङ्गयोगप्रयोगदम् ॥ १४ ॥
लक्ष्मीनृसिंहगुरवे पाणिनीयप्रदायिने ।
भूषिताखिलभाष्याय भाष्यकृद्ब्रह्मणे नमः ॥ १५ ॥
नानावेदान्तचर्याध्वकेलिक्रमणकेसरी ।

राजहंसायतामन्त्रसूरिर्मम सुमानसे ॥ १६ ॥
विकासयतु मे चित्तकमलं साङ्गवेदवित् ।
श्रीपेरभट्टसविता सच्चिदानन्दचिद्घनः ॥ १७ ॥
श्रुतिबोधितकार्यधुर्यताभरनम्रान् परमग्रजन्मनः ।
प्रतिधावति मामकं मनः फलनम्रा हि भवन्ति सेव्यताम् ॥ १८ ॥
श्रीशंकरकृती राजयोगतारावलिः क्व वा ।
क्वासौ प्रकृतिसंबन्धः पदार्थज्ञानदुर्विधः ॥ १९ ॥

तथापि—

रामकृष्णशिवस्फूर्ते रामस्वामिकृती कृती ।
कुरुते राजतरलं तारावल्यर्थदीपकम् ॥ २० ॥
यद्यप्यत्र सुदूष्यमेव सकलं तद् दूषयन्तु स्फुटं
तेनाहं न तपामि ये हि सुधियस्तुष्यन्ति किंचिद्वचः ।
शब्दार्थागमयोगगौरवविदां श्रीमन्त्रपूतात्मनां
तेषां तच्चरणौ वहामि सुकृती मूर्ध्ना सतां मानिनाम् ॥ २१ ॥

अथ इह जन्मनि जन्मान्तरे वा कृतस्वाध्यायानुवच[न]यज्ञदानेश्वराराधनप्रणवादिजपयोगाभ्यासैः सम्यङ् निर्मलान्तःकरणानां श्रीबादरायणसूत्रभाष्यादिकं निर्माय तद्ग्रहणासमर्थानामविवेकिनां स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिना अधीतसाङ्गस्वाध्याये—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' । 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः',

'तदभिध्यानाद्योजनात् तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः ।
ज्ञात्वा देवं मुच्यते सर्वपाशैः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ॥
तस्याभिध्यानात् तृतीयदेहभेदे विश्वैश्वर्यं केवल आत्मकामः ।
एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किंचित् ॥
तृ(ती)याङ्गस्थितो योगी विकारं मानसं हरेत् ।
स्वात्मानं पूरुषं पश्येन्मनस्तत्र लयं गतम् ॥
योगहीनं कथं ज्ञानं मोक्षदं भवति ध्रुवम् ।
योगी हि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ।
तस्माद् ध्यानं च योगं च मुमुक्षुर्दृढमभ्यसेत् ॥'

इत्यादिविधीनुपलभ्य एतेषां विधीनां कोऽधिकारी, को विषयः, किं प्रयोजनमित्यादिजिज्ञासूननुग्रहीतुकामः श्रीपरमशिवापरावतारः श्रीशंकराचार्यः श्रीवैयासिकभाष्याद्यपेक्षया लघुतरं निखिलयोगज्ञानद्वारा कैवल्यसिद्ध्यर्थमखिलयोगशास्त्रसारभूतां राजयोगतारावल्याख्यां कृतिं कंचन जिज्ञासुं शिष्यमुपदिदेश । अत्र राजयोगस्य मुख्यत्वाद् राजयोगपदार्थकथनपूर्वकमेतत्स्वरूपं निरूप्यते । योगो नाम चित्तवृत्तीनां निरोधः । स द्विविधः ।

End:

वाग्ब्रह्मवादिनं विद्याचोरमात्मप्रशंसकम् ।
भक्तिश्रद्धादयाशान्तिहीनं धर्मादिवर्जितम् ॥
इत्यादिदुर्गुणोपेतं गुरुः शिष्यं परित्यजेत् ।

इत्यादिना । किंच यस्तु ग्रन्थात् संपाद्य तत्रत्यमन्त्रादिकं स्वयं जपति अन्यस्मै वोपदिशति तस्य महानरकवासः सिध्यति । तथाचोक्तमागमे—

पुस्तके लिखितान् मन्त्रानवलोक्य जपेच्च यः ।
स जीवन्नेव चण्डालो मृतः श्वानो भविष्यति ॥

इत्याद्यनेकवचनैरिति । जपेदित्यस्यायमर्थः—स्वयमपि न जपेत् । मनसा न स्मरेत् । अन्यस्मै वा न जपेत् । न वदेदिति चार्थः । जपधातोरेतदुभयार्थकत्वं प्रसिद्धमेवेति संक्षेपः । पूर्वोक्तक्रमेण सद्गुरुप्रसादात् मन्त्राद्यङ्गसहितराजयोगं लब्ध्वा यथोक्ताभ्यासं यदि करोति तस्याद्वितीयपरिपूर्ण-ब्रह्मानन्दः सिध्यतीति सिद्धमिति ।

मन्त्रादियोगरूपं तु दिङ्मात्रमिह दर्शितम् ।
श्रीमहाराजतरले विस्तरेण निरूपितम् ॥
श्रीभूभृत्कदळीविहाररसिकः श्रीदक्षिणामूर्तिसत्-
पादाम्भोजयुगे **सुराजतरलं श्रीयोगतारावलेः** ।
कृत्वा सद्विवृतिं शिवार्पितमनाः श्री हिङ्गुवंशोद्भवो
रामस्वामिबुधः समर्पयति चिद्ब्रह्मप्रमोदाप्तये ॥

Colophon:

इति श्रीपरशिव**वेङ्कटरामानन्द**नाथनामान्तरत्रयीमन्त्रसांख्ययोगवेदान्तमुखमुख्यसर्वतन्त्र-स्वतन्त्रश्रीपरमहंसपरिव्राजकाचार्य**शिवरामब्रह्मबोधानन्दघनेन्द्र**पादशिष्येण श्रीपरमशिवैकपोष्येण सकलमुनिकुलप्रवरपवित्रशौनकगोत्रावतंसहिङ्गुवंशपद्माकरप्राभातिकप्रभाकरायमाणनागाम्बिकारमणको-**नेश्वर**पुत्रेण सकलसंख्यावत्कुलमित्रेण श्रीशंकराचार्यपादकिंकरेण **परानन्दनाथा**पराभिधेय-**रामस्वामिपण्डितेन** विरचिता **राजतरलसमाख्या** राजयोगतारावलीव्याख्या समाप्ता ।

93

67780 **योगरहस्यम्**

Beginning:

श्रीमति शोभनकैलासोपरि शीतलतल्पशयान शिव शीतलतल्पशयान ।
भूमसुखानुभवानन्दात् सुखबोधकमाह रहस्ये अयि बोधकमाह रहस्ये ॥ १ ॥
शंकर शंकर कारुण्यार्णव सत्यसुखं किमु देव ।

शंकरि शंकरि संभोगादपि सारमिदं ननु देवि ॥ २ ॥
सारमिदं यदि तत्किं शंकर सम्यगुदीरय देव ।
कारणकारणरूपे स्वात्मनि कामरतिर्ननु देवि ॥ ३ ॥
का(म)रताविह साक्षी को वद कालमदापह देव ।
सोमकलामयि नान्यत् पश्यति सोऽद्वय एव तदानीम् ॥ ४ ॥
सोऽनितरोऽस्तु कथं तत् सिध्यति सोमकलाधर देव ।
मानिनि सद्गुरुरेतज्जल्पसि मा भ्रमसीह तदानीम् ॥ ५ ॥

End:

त्वद्दययामृतसिन्धौ मज्जति तत्त्वमसीति मनो मे ।
त्वद्दयया सखि मालाचन्दनतल्पसुखं मम जातम् ॥ १०१ ॥
चन्दनचर्चनमानन्दार्णव संप्रति ते कलयामि ।
सुन्दरमस्ति सुखालिङ्गोदितसौख्यमनारतमस्तु ॥ १०२ ॥
पद्मभवार्चितपादाम्भोरुह पालय मामपि नित्यम् ।
सद्मनि वृद्धिरमुष्मिन् संप्रति संपदपारमुदेतु ॥ १०३ ॥
बद्धाञ्जलये कस्मै प्राह स बालगुरुः परतत्त्वम् ।
सिद्धार्थाय चिदानन्दाभिधशिष्यायाह तदेवम् ॥ १०४ ॥
श्रीपरमेश्वरकारुण्यामृतशीतलमानसवृत्त्या ।
श्रीपरमेश्वरयोगीन्द्रो ननु शिक्षितमाह रहस्यम् ॥ १०५ ॥

Colophon:

योगरहस्यं संपूर्णम् ।

95

72246 **योगशास्त्रम्**

Beginning:

मूलश्रीभैरवात्मत्रिविधपथमहादेवताभिः परीते
दिव्ये सिंहासनेन्द्रे स्थितमखिलकलारूपकं देशिकेशम् ।
तस्याङ्के संनिषण्णामरुणरुचिचयारञ्जिताशान्तरालां
देवीमानन्दपूर्णाममृतकरतलामाश्रयेऽभीष्टसिद्धयै ॥
योगिहृत्कमलावासं सगुणं निर्गुणात्मकम् ।
विष्णुं वन्दे योगिगम्यं सर्वविघ्नोपशान्तये ॥
सांकृतिर्मुनिरासीद्भूमण्डलं योगलिप्सया ।
सकलं परिचङ्क्रम्य नैमिशारण्यमभ्यगात् ॥

सुगन्धि नानाकुसुमं स्वादुमत्फलसंयुतम् ।
शाखिभिः शोभितं पुण्यं जलकासारमण्डितम् ॥
स मुनिस्तत्र विचरन् ददर्शाग्रे तपोनिधिम् ।
वेदिकायां समासीनं दत्तात्रेयं महामुनिम् ॥
दृढपद्मासनेनापि नासाग्रार्पितया दृशा ।
ऊरुयुग्मगतोत्तानपाणियुग्मेन शोभितम् ॥
ततः प्रणम्य तमृषिं दत्तात्रेयं च सांकृतिः ।
तच्छिष्यैः सह तत्रैव संमुखं चोपविष्टवान् ॥
तदैव स मुनिर्योगाद् विरम्य च पुरःस्थितः ।
उवाच सांकृतिं प्रीतिपूर्वकं वचनं तथा ॥
सांकृते कथय त्वं मां किमुद्दिश्य इहागतः ।
इति पृष्टः स तं प्राह योगं ज्ञातुमिहागतः ॥

श्रीदत्तात्रेयः—

योगो हि बहुधा ब्रह्मन् तत्सर्वं कथयामि ते ।
मन्त्रयोगो लयश्चाथ हठयोगस्तृतीयकः ॥
राजयोगश्चतुर्थः स्याद्योगानामुत्तमः स्मृतः ।
आरम्भोपचयश्चैव तथा परिचयोऽपि वा ॥
निष्पत्तिश्चेत्यवस्थाश्च चतस्रः परिकीर्तिताः ।
एषां तु विस्तरं वक्ष्ये यदि त्वं श्रोतुमिच्छसि ।
अङ्गेषु मातृकान्यासपूर्वं मन्त्रं जपेत् सुधीः ॥

End:

यदा तु राजयोगस्य निष्पन्ना योगिनः क्रिया ।
तदावस्थाभिनिष्पत्तिर्भुक्तिमुक्तिप्रदा भवेत् ।
सर्वं ते कथितं ब्रह्मन् सांकृतेऽभ्यासमाचर ॥
सर्वं सिद्धिमवाप्तोऽसौ दत्तात्रेयप्रसादतः ॥
य एतत् पठते सम्यक् साधुभ्यः पठनादपि ।
तस्य चैतत्क्रमेणैव सिध्यत्येव न संशयः ॥
योगिनोऽभ्याससंयुक्ता ह्यरण्येषु गुहादिषु ।
चिरकालं रमन्ते च जनसङ्गविवर्जिताः ॥
तस्मात् सर्वप्रयत्नेन योगमेवं समभ्यसेत् ।
योगाभ्यासो जन्मफलं निष्फला इतरक्रियाः ।

Colophon:

इति **श्रीदत्तात्रेयकृतं योगशास्त्रं** संपूर्णम् ।

97

73009 **योगसारः**

Beginning:

अथेदानीं योगधर्मोऽतिसमासरूपेण कथ्यते। निरुद्धवृत्त्यन्तरेऽस्य चित्तस्य परमेश्वरे निश्चला या तु वृत्तिः स योग इत्युच्यते। योगः पुनः पञ्चधा भिन्नः—मन्त्रयोग स्पर्शयोग भावयोग अभावयोग महायोगभेदेन। तदुक्तम्—

मन्त्राभ्यासवशेनैव मन्त्रवाच्यार्थगोचरा।
अव्याक्षेपा नानावृत्तिमन्त्रयोग उदाहृतः॥
प्राणायामसमा सैव स्पर्शयोगो विधीयते।
सा मन्त्रस्पर्शमुक्ता भावयोगः प्रकीर्त्यते॥
विलीनावयवं विश्वं **वर**(स्व)रूपं भाव्यते यतः।
अभावयोगः संप्रोक्तोऽनुभावाद्वस्तुनस्तु यः॥
शिवस्वरूप एवैकश्चिन्त्यते निरुपाधिकः।
यया सैव मनोवृत्तिर्महायोग इहोच्यते॥ इति

Colophon:

इति **योगसारे** तृतीयोऽध्यायः।

. . . . . .

End:

नाभेर्लिङ्गस्य मध्ये तु ओड्याणं चाथ बन्धयेत्।
ओड्डीशं धारयेच्चैव शक्तिमोड्याणपीठगाम्॥
कण्ठं संकोचयेत् किंचिद् बन्धं जालन्तराह्वयम्।
बन्धयेत् खेचरीमुद्रां दृढचित्तः समाहितः॥
कपालकुहरे जिह्वाप्रतिष्ठा विपरीतगा।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवतु खेचरी॥
ततस्तूर्ध्वं परे व्योम्नि द्वादशान्तं शिवात्मनि।
ओड्याणपीठे निर्द्वन्द्वे निरालम्बे निरञ्जने॥
सितपङ्कजमध्यस्थं चन्द्रमण्डलमध्यगम्।
सदाशिवमनुध्यायेत् स्रवन्तममृतं सदा॥
एवं मध्यस्थितां नित्यं मद्भक्त . . . .।

101

70290 **राजयोगप्रकरणम्**

Beginning:

कथमष्टदलं पद्मं केन रूपेण कारणम्।

कथं कन्दं कथं नालस्वरूपं च निरूपितम् ॥ १ ॥
कथं वर्णं कथं रूपं ध्यायते योगिना कथम् ।
मानसं कमलं चैव मनोरूपेण कल्पितम् ॥ २ ॥
इति पूर्वैश्च कथितं पुरा वै देववन्दित ।
शृणु पार्वेति वक्ष्यामि दहरं कमलं शुभम् ॥ ३ ॥
अथ पत्रमिति प्रोक्तं पृथिव्याद्यष्टमात्रकम् ।
सर्वसारमिदं गोप्यममृतानुभवप्रदम् ॥ ४ ॥

End:

लक्ष्यद्वयं च स्थानं च गुरुमार्गेण सिध्यति ।
सूक्ष्माकुञ्चनसाध्येन द्वयं लक्ष्यं च सिध्यति ।
द्विलक्ष्यं साध्यलक्ष्यं च देवेशि पञ्चमण्डलम् ॥ १९ ॥
पञ्चमण्डलसंधानमन्तर्लक्ष्येण सिध्यति ।
अन्तर्लक्ष्यस्य स्थानं च गुरुमार्गेण सिध्यति ॥ २० ॥
अन्तर्लक्ष्यं स्थिरं कृत्वा शिवयोगमिति स्मृतम् ।
शिवयोगप्रभावश्च उन्मन्यन्तं च संज्ञिकम् ।
उन्मन्यन्ते च देवेशि राजयोगमुदीरितम् ॥ २१ ॥
उपदेशक्रमं श्रुत्वा राजयोगस्य सांप्रतम् ।
उमा च परमप्रीता पार्वती लोकवन्दिता ॥ २२ ॥

102

72327 **राजयोगरहस्यम्**

Beginning:

द्वादशवर्षैरेवं सद्गुरुनाथस्य पादयोर्भक्त्या ।
निर्विण्णेन दृढात्मसिद्धो भक्तिसंसिद्धः ॥
यत् सर्वगं श्रुतिशिरः परमैकमाद्यं
ज्योतिर्मयं दृढविरक्तजनाभिगम्यम् ।
गोसंस्थितं गुरुसदाशिवयोगिनाथं
लिङ्गस्वरूपमहमन्वहमाश्रयामि ॥
आत्मानमद्वन्द्वमनन्तमाद्यं निरन्तरं निश्चलनित्यतृप्तिम् ।
सच्चिन्मयानन्दपराङ्मुखो यो वेद्यखभावेन गुरुः स एव ॥
आदौ वर्णाश्रमाचारगुरौ ब्रह्मज्ञतास्ति चेत् ।
भजेत् तमेव यत्नेन नो चेदन्यगुरुं व्रजेत् ॥

सदा बाह्यान्तरे ब्रह्म सर्वजन्तुषु भासते ।
तथापि गुरुमज्ञात्वा केन पश्यति तत्पदम् ॥
स्वण्डज्ञानवतां च षट्समयसंमोहान्धकारात्मनां
नानावेदपुराणशास्त्रकवितावाग्वैखरीशालिनाम् ।
मूढानां चतुराश्रमैकनियमागर्वात्मकानां कथं
योगज्ञानमिदं भवेद् गुरुमुखाभावेऽपरोक्षात्मकम् ॥
क्षेत्रार्थरम्यगृहपुत्रकलत्रमित्र-
भिन्नैर्महारसरसायनधातुवादैः ॥
तैः काम्यमन्त्रलययोगहठादिभेदै-
र्बुद्धात्मनां कथमिवास्ति गुरोः प्रसादः ॥
न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम् ।
शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः ॥
अथ शृणु महाश्चर्यं राजयोगाभिधानकम् ।
इदं सद्गुरुणायाति सज्जनो नान्यकर्मभिः ॥
. . . . . .
. . . . . .

Fo. 5a:

आहारनिद्रेन्द्रियदेहसर्वव्यापारशीलातपसंज्ञिकानाम् ।
जयश्च शान्तिश्च भवेद्यमागमं शनैः शनैः साधयितुं स योग्यः ॥
भक्तिर्गुरौ तत्त्वपदानुरक्तिर्निःसङ्गता स्वयमुपागतलाभतुष्टिः ।
एकान्तवासपरता च मनोनिवृत्तिर्वैराग्यभाव इति ये नियमास्त एव ॥
स्वरूपे यत् सदाकालमासनं तत् सुखासनम् ।
सर्ववस्तुन्युदासीनभावमासनमुच्यते ॥
नासनं सिद्धसदृशं न कुम्भः केवलोपमः ।
न खेचरीसमा मुद्रा न नादसदृशो लयः ॥
. . . . . .
. . . . . .

End:

कर्पूरमनले यद्वत् सैन्धवं सलिले यथा ।
तथा संलीयमानं च मनस्तत्रैव लीयते ॥
ज्ञेयं सर्वं परित्यज्य तज्ज्ञानं मन उच्यते ।
ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः ॥
मनोदृश्यमिदं सर्वं यत्किंचित् सचराचरम् ।
मनसो ह्युन्मनीभावो द्वैताभावं प्रचक्षते ॥

ज्ञेयवस्तुपरित्यागाद् द्वितीयं याति मानसम्।
मनसो विलयं याति कैवल्यमवशिष्यते ॥
लयो लय इति प्राहुः कीदृशं लयलक्षणम्।
तत्र सद्वासना ज्ञानं लयो विषयविस्मृतिः ॥
एवं नानाविधोपायात् सम्यक् स्वानुभवान्वितः।
समाधिमार्गाः कथिताः पूर्वाचार्यैर्महात्मभिः ॥
निजानुभवशीलता निखिलतत्त्वसाम्यस्मृतिः
स्थिरतया निदिध्याससदेकपरिभावना।
सहजता ह्यनायासता समाधिरिति कीर्तितः
सततं निर्विकल्पात्मकः (?) ॥

Scribe:

वेङ्कटसुब्बेन लिखितम्।

103

PM1428 **राजयोगसारः**

Beginning:

श्रीगुरुं हृदये ध्यात्वा यत् करिष्यामि संततम्।
स साधयतु मे शीघ्रमज्ञानतिमिरापहः ॥
प्राकृतभावं त्यक्त्वा मामव मातर्मदीयचित्तं त्वम्।
बध्वा त्वदीयभक्त्या त्वदङ्घ्रिपद्मे निवेशयाशु मुदा ॥
आदौ विघ्नेश्वरं नत्वा करोमि ज्ञानलब्धये।
तन्निर्विघ्नं करोत्वीशः नमो मूलनिवासिने ॥
कमलायतनेत्रां तां विधिविष्णुशिवस्तुताम्।
बिभ्रतीमिक्षुचापं च पुष्पेषुं पाशमङ्कुशम् ॥
नमामि ललिताम्बां तां त्रिपुरामिष्टसिद्धिदाम्।
हेतवे जगतामेव संसारार्णवसेतवे ॥
प्रभवे सर्वविद्यानां शांभवीगुरवे नमः।
हृदयकमलमध्ये चिन्तितोऽहं गुरूणा-
ममलविमलसूक्ष्मं सर्वदा साक्षिभूतम्।
अखिलनिगमजन्यं सच्चिदानन्दमूर्तिं
मम हृदयनिवासं संततं चिन्तयामि ॥

श्रीपार्वत्युवाच—

कैलासवास सर्वेश दीनरक्षक शंकर।

योगिनामपि सर्वेषां कथं श्रेष्ठं कथं परम् ॥
कथं मुक्तिप्रदं देव कथं ज्ञानप्रकाशकम् ।
कस्मिन् स्थाने वसेन्नित्यं सूर्यसोमाग्निमण्डलम् ।
कस्मिन् स्थाने सुषुम्नाख्या नाडी सम्यक् प्रकाशिका ।
तत्सर्वं ब्रूहि मे शंभो श्रोतुमिच्छाम्यहं सदा ॥

ईश्वर उवाच—

उपजिह्वादूर्ध्वभागे त्रिकोणाकारमण्डले ।
तस्य मध्ये स्थितं देवि सुषुम्नानाडिरुच्यते ॥

End:

निराकारं निरालम्बं निराकाशं निरन्तरम् ।
अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ॥
सर्वभूतदयापुष्पं क्षमापुष्पं विशेषतः ।
ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तथैव च ।
सत्यवागष्टमं पुष्पं नित्यतृप्तो महेश्वरः ॥
हृदाकाशे चिदादित्ये सदा भाति निरन्तरम् ।
उदयास्तमयं नास्ति कथं संध्यामुपास्महे ॥
मृता मोहमयी माता जाता बोधमयी सुता ।
सूतकद्वयसंप्राप्ते कथं संध्यामुपास्महे ।

Colophon:

इति **श्रीमच्छंकराचार्यविरचितं राजयोगसारं** संपूर्णम् ।

106

72249 **राजयोगसारः**

Beginning:

श्रीशंकरं पराशक्तिं गणेशं षण्मुखं हरिम् ।
ब्रह्मा[णं नन्दिकेशं च] दत्तात्रेयं पतञ्जलिम् ।
नवयोगीन्द्रवृन्दं च व्यासं व्यासात्मजं भजे ॥ १ ॥
सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बु[जं विमल]गन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरे[च्छिरसि हंसकं] तदभिधानपूर्वं गुरुम् ॥ २ ॥
गुरुपादोदकं स्नानं गङ्गास्नानाद्विशिष्यते ।

सर्वतीर्थमयं दिव्यं सर्वपापप्रणाशनम् ॥
अज्ञा[न ध्वंसनं] पुण्यं गुरुशेषं तथाखिलम् ॥ ३ ॥

End:

चक्रेऽस्मिन् भ्रमते जीवः पुण्यपापप्रचोदितः ।
तन्तुपञ्जरमध्यस्थो यथा भ्रमति लूतिका ।
जीवो भ्रमति चक्रेऽस्मिन्नधः प्राणश्चरत्यसौ ॥
प्राणारूढो भवेज्जीवः सर्वभूतेषु सर्वदा ।
प्राणोऽपानः समानश्चाप्युदानो व्यान एव च ॥
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ।
एते नाडिषु सर्वासु चरन्ति दश वायवः ॥
पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ॥
अक्रियैव परा पूजा मौनमेव परो जपः ।
अचिन्तैव परं ध्यानमनिच्छैव परं सुखम् ॥
हकारेण बहिर्याति सकारेण विशेत् पुनः ।
हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ॥
अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अस्याः स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥
अनया सदृशी विद्या चानया सदृशो जपः ।
अनया सदृशं पुण्यं न भूतो न भविष्यति ॥
कुण्डलिन्याः समुद्भूता गायत्री प्राणधारिणी ।
प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित् ॥
मन्त्रो लयो हठो राजा चेति योगश्चतुर्विधः ।
तमाहुः पूर्वमुनयः सिद्धाः शंभुप्रबोधिताः ॥

Colophon:

योगसारं संपूर्णम् ।

117

75278 **षट्चक्रनिरूपणम्**

Beginning:

आधारं च चतुःपत्रं तप्तकाञ्चनसंनिभम् ।
तत्र क्रीडति विघ्नेशः सर्वविघ्नविनाशकः ॥
सृष्टेराधारमाधारमाधारे सर्वदेवताः ।
आधारे सर्वदेवाश्च तस्मादाधारमाश्रयेत् ॥

आधाराज्जायते विश्वं विश्वं तत्रैव लीयते ।
तस्मात् सर्वप्रयत्नेन गुरुपादं समाश्रयेत् ॥
आधारशक्तिनिद्रायां विश्वं गच्छति निद्रया ।
तस्याः शक्तिप्रबोधेन त्रैलोक्यं प्रतिबुध्यते ॥
आधारं यो न जानाति सोऽन्धः संप्रति भूतले ।
तस्य विज्ञानमात्रेण नरः पापैः प्रमुच्यते ॥

End:

लम्बिकातालुमूलेन वायुं पीत्वा शनैः शनैः ।
क्षणार्धं तिष्ठते योगी मुच्यते भवबन्धनात् ॥
खेचरीमुद्रया येन विचरन् लम्बिकोर्ध्वतः ।
बिन्दुः क्षरति नो तस्य कामिन्याश्लेषितस्य च ॥
रसानां शोषणं सम्यङ् महामुद्राभिधीयते ।
तस्य तेन भवेत् तस्मात् तन्महामुद्रितो भवेत् ॥
वक्षोन्यस्तहनुर्निपीड्य सुचिरं योनिं च वामाङ्घ्रिणा
हस्ताभ्यां हनु धारयन् प्रसरितं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगलं बध्वा शनै रेचयेत्
एषा पातकनाशिनी ननु महामुद्रा नृणां प्रोच्यते ॥

इति ।

118

PM496 सप्तभूमिकानिर्णयः

The following is the full text of the work:

भूमिकासप्तकं भेदेन निरूप्यते—

ज्ञानभूमिः शुभेच्छाख्या प्रथमा परिकीर्तिता ।
विचारणा द्वितीया स्यात् तृतीया तनुमानसी ॥
सत्त्वापत्तिश्चतुर्थी स्यात् ततोऽसंसक्तिनामिका ।
पदार्थाभावना षष्ठी सप्तमी तुर्यगा स्मृता ॥

इति । तत्र नित्यानित्यवस्तुविवेकादिपुरःसरफलपर्यवसाना या सा शुभेच्छा प्रथमा ॥ १ ॥ ततो गुरुमुपसृत्य वेदान्तवाक्यश्रवणमननात्मिका द्वितीया ॥ २ ॥ ततो निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यता तृतीया ॥ ३ ॥ एतद्भूमिकात्रयं साधनरूपं जाग्रदवस्थेत्युच्यते योगिभिः । भेदेन जगतो भानात् । ततो वेदान्तवाक्यनिर्विकल्पको ब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थी भूमिका फलरूपा सत्वापत्तिः स्वप्नावस्थेत्युच्यते । सर्वस्यापि जगतो मिथ्यात्वेन स्फुरणात् । स्वयं चतुर्थभूमिकां प्राप्तो योगी ब्रह्मविदित्युच्यते ॥ ४ ॥ पञ्चमी षष्ठी सप्तमी भूमिकाः जीवन्मुक्तेरेवा-

वान्तरभेदाः। तत्र सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि या निर्विकल्पकसमाध्यवस्था असंसक्तिरिति सुषुप्तिरिति चोच्यते ॥ ५ ॥ ततः स्वयमेवोत्थानात् स्वयं योगी ब्रह्मविद्वरः। ततस्तदभ्यासपरिपाकेन चिरकालस्थायिनी या सा पदार्थाभावनेति गाढसुषुप्तिरिति चोच्यते। ततः स्वयं नोत्थितस्य योगिनः परप्रयत्नेनैव उत्थानात् स्वयं ब्रह्मविद्वरीयान्। ॥ ६ ॥ यस्यास्तु समाध्यवस्थायाः न स्वतो वा परतो वा उत्थितो भवति सर्वथा भेददर्शनाभावात्। किंतु सर्वदा तन्मय एव स्वप्रयत्नमन्तरेणैव परमेश्वरप्रेरितप्राणवायुवशादन्यैर्निर्वाह्यमाणदैहिकव्यवहारः परिपूर्णपरमानन्दघन एव सर्वतस्तिष्ठति। सा सप्तमी तुरीयावस्था। तां प्राप्तो ब्रह्मविद्वरिष्ठ इत्युच्यते ॥ ७ ॥ तत्रायं संग्रहः—

चतुर्थभूमिका ज्ञानं तिसृषु साधनं पुरा।
जीवन्मुक्तेरवस्थास्तु परास्तिस्रः प्रकीर्तिताः ॥

तत्र प्रथमभूमित्रयमारूढोऽज्ञोऽपि न कर्माधिकारी। किं पुनः तत्त्वज्ञानी। तद्विशिष्टो जीवन्मुक्त एवेत्यभिप्रायः। इति **सप्तभूमिकानिर्णयः**। आदित आरभ्य भूमिकात्रयपर्यन्तं साधनरूपम्। चतुर्थभूमिकामारूढः ब्रह्मवित्। पञ्चमभूमिकामारूढः ब्रह्मविद्वरः। षष्ठभूमिकामारूढः ब्रह्मविद्वरीयान्। सप्तमभूमिकामारूढः ब्रह्मविद्वरिष्ठः।

119

TR1185 सप्तविषुवम्

Beginning:

प्रथमं प्राणविषुवं मन्त्रस्य विषुवं तथा।
नाडिकाविषुवं पश्चात् प्रशान्तविषुवं तथा ॥
पञ्चमं शक्तिविषुवं कालस्य विषुवं तथा।
सप्तमं शिवचैतन्यं [1]तत्त्वाख्यविषुवं [2]तथा ॥
प्रणवं हृदयं मन्त्रं विषुवं ब्रह्मरन्ध्रगम्।
नाड्यन्तं द्वादशान्तं तु प्रशान्तं कुण्डली तथा ॥
शक्त्यन्ता समना शक्तिः कालश्चैवोन्मनान्तकम्।
तत्त्वं तु विषुवं प्रोक्तं प्राणसंज्ञमतःपरम् ॥
शिष्यात्मप्राणमनसां संयोगं प्राणसंज्ञकम्।
आत्मनो नादमध्ये तु लयं संचिन्त्य नाहतः ॥

End:

अकारोकारवर्णौ च मकारं बिन्दुसंज्ञकम्।
नादनादान्तसंज्ञं वा त्यक्त्वा ब्रह्मादिषु क्रमात् ॥
सप्तमे शक्तिमध्ये तु शिष्यात्मानं लयं नयेत्।

[1] वधाख्य°.

प्रशान्तं तद्विजानीयात् प्रशान्तेन्द्रियगोचरम् ॥
शक्तिमध्यगतं नादं समनान्तं प्रकल्पयेत् ।
तच्छक्तिविषुवं प्रोक्तमुन्मनाकालसंज्ञकम् ॥
साधिकारे परे धाम्नि विषुवं तत्त्वसंज्ञकम् ।
इत्थं सप्तविधं ज्ञात्वा विषुवं देशिकोत्तमः ॥
तदूर्ध्वे चिद्घनानन्दे नित्ये सर्वगुणान्विते ।
मनस्ते करणातीते पुनरावृत्तिवर्जिते ।
आत्मानं विलयं नीत्वा शनैः पूर्णो निपातयेत् ॥

Colophon:

इति **सप्तविषुवं** संपूर्णम् ।

121

66251 समाधिदीपिका

Beginning:

श्रीकृष्णं श्रीगुरुं नत्वा विश्वेशं तत्प्रसादतः ।
समाधिदीपिका सेयं यथामति निरूप्यते ॥

इह खलु संधिं समाधावात्मन्याचरेत् । अस्यार्थः—आत्मविषयकसमाधौ संधिं छिद्ररूपं ब्रह्मात्मनोर्भेदमाचरेत् भक्षयेत् निवारयेदित्यर्थः ।

यच्छेद् वाङ् मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि ॥

प्राज्ञः विवेकी वाक् वाचं मनसि नियच्छेत् निरुन्ध्यात् । वाक्पदं सर्वेन्द्रियाणामुपलक्षणम् । मनसीति दैर्घ्यं छान्दसम् । बाह्यव्यापारं विहाय मनोव्यापारेणावतिष्ठेतेत्यर्थः । तन् मनः ज्ञानस्वरूपे आत्मनि देहादिसाक्षिणि प्रत्यगात्मनि नियच्छेत् । मनआदिष्वात्मबुद्धिं विहाय तत्साक्षिण्येवात्मबुद्धिं कुर्यादित्यर्थः ।

End:

तथाच प्रारब्धापेक्षया ध्यानयोगस्यापि प्राबल्यं योगसामान्यप्रकरणात् निश्चीयते । एवं स्थिते यथा देहस्थितिसंपादकप्रारब्धात् स्वेच्छया देहत्यागसंपादकस्य हठयोगविशेषस्य प्राबल्यमनुभवसिद्धम्, तन्नाशकत्वात् । तथा कर्तृत्वभोक्तृत्वरूपसंसारसंपादकप्रारब्धात् कर्तृत्वादिवृत्त्यभिभवसंपादकस्य ध्यानयोगस्य प्राबल्यमनुभवसिद्धमेव, तन्नाशकत्वात् । ननु एवं सति प्रारब्धस्य भोगादेव क्षय इति शास्त्रविरोधः स्यात् योगाद् भोगं विना प्रारब्धस्य क्षयाङ्गीकारादिति चेन्न । योगस्यापि प्रारब्धफल एवान्तर्भूतत्वात् । प्राबल्यदौर्बल्ययोः फलबलकल्पितत्वेन प्रबलप्रारब्धाद्

दुर्बलप्रारब्धस्य भोगं विना क्षयोऽङ्गीक्रियते। एवं च प्रबलप्रारब्धाभावे सति भोगादेव क्षय इत्यादिशास्त्रप्रवृत्तिर्विभावनीया। अत एव सत्यपि देहस्थितिहेतुभूत . . . .

126

67731 **सिद्धसिद्धान्तपद्धतिः**

Beginning:

ओं परिपूर्णं परं ब्रह्म ध्यायंध्यायमहर्निशम्।
व्याकरोमि विवेकार्थं **सिद्धसिद्धान्तपद्धतिम्** ॥ १ ॥
सत्यं निर्गुणमद्वैतं निर्विकारं निरञ्जनम्।
अमृतं परमानन्दं वस्तु ब्रह्मेति कीर्त्यते ॥ २ ॥
यदात्मभूतं सन्मात्रं पञ्चभूतान्तरस्थितम्।
पञ्चभूतनिदानं तद्वस्तु ब्रह्मेति कीर्त्यते ॥ ३ ॥
चराचरात्मकं विश्वं यदन्तस्थं यतो बहिः।
यद्येन यत्र वास्तीदं वस्तु ब्रह्मेति कीर्त्यते ॥ ४ ॥
जगद्यदन्यन् नास्त्येव जगतोऽन्यद्यदस्ति च।
नेति नेतीति विज्ञेयं तद्वस्तु ब्रह्म कीर्त्यते ॥ ५ ॥

End:

किं कृतं विबुधैरस्मिन्नर्थे तैरेव चिन्त्यताम्।
प्रवृत्तौ सफलत्वार्थमनुमानादिकं कृतम् ॥ ९७ ॥
अन्यथान्यप्रवृत्तोऽयं वृथा याति भवेद् ध्रुवम्।
प्रमाणमेकं प्रत्यक्षमित्युक्तं किं दृढीकृतम् ॥ ९८ ॥
शब्दादीन्यवलोक्यैव स्तब्धं पाण्डितमानिनम्।
धिक् त्वा च सत्यं द्रष्टव्यो भगवानिति कथ्यते ॥ ९९ ॥
अनिश्चितत्वाच्छतशोऽनृतं वै
वाचा वदत्यादिकवेदवाचा।
चक्षुर्हि सत्यं न तदन्यदेवं
सत्यं भवेदित्युपदिष्टमेव ॥ १०० ॥
इत्येवं परमेश्वरो भुवि चिदानन्दाय सद्धीमते
शिष्यायाह विराट्स्वरूपमखिलं सम्यग्रहस्यं परम्।
विज्ञायैतदथापरं परतरं सौवर्णदेहं महः
स्वाराज्यं हृदयाब्जमध्यलसितं पश्येदिति प्रेमतः ॥ १०१ ॥

Colophon:

सिद्धसिद्धान्तपद्धतिः संपूर्णा।

128

PM381 **सिद्धान्तसारः**

Beginning:

नत्वा श्रीगुरुपादाब्जं स्मृत्वा मोक्षार्थसिद्धिदम् ।
तारकाभ्यन्तरे पञ्चब्रह्मतत्त्वं तदुच्यते ॥ १ ॥
ब्रह्मणां पञ्चकं देवपञ्चकं स्थानपञ्चकम् ।
मातृकापञ्चकं वाचां पञ्चकं शून्यपञ्चकम् ॥ २ ॥
पञ्चावस्थाः पञ्चदेहाः पञ्चमात्रास्तथैव च ।
पञ्च वेदाः पञ्च गुणाः पञ्च पद्मास्तथैव च ॥ ३ ॥
भूतानि पञ्च पञ्चैव क्रियाः पञ्च दिशस्तथा ।
पञ्चकोणं पञ्चवक्त्रं प्रमाणानां च पञ्चकम् ॥ ४ ॥

इति **श्रीपाद्मपुराणे सिद्धान्तसारे** शिवपार्वतीसंवादे **तारकाक्षरं** नाम प्रथमोऽध्यायः ।

End:

ऋषिसिद्धगणाः सर्वे साष्टाङ्गं प्रणिपत्य च ।
कृतार्थोऽहं कृतार्थोऽहमहंभावविवर्जितः ॥
तत्प्रसादेन प्राप्तव्यं साक्षात्कारात्मरूपकम् ।
दर्शितं च भवन्नेत्रे ह्यनिर्वाच्यो भवाम्यहम् ॥
मुहुर्मुहुर्मुहुः स्तुत्वा हर्षगद्गदया गिरा ।
ते मुक्ता सर्वलोकेषु ब्रह्मसायुज्यमाप्नुयुः ॥
राजराजेश्वरं योगं प्रत्यहं नियतेन्द्रियः ।
यः पठेद् भक्तिभावेन स मुक्तो नात्र संशयः ।

Colophon:

इति **श्रीपाद्मपुराणे सिद्धान्तसारे** कपिलऋषिसिद्धसंवादे **राजयोगो** नाम पञ्चमोऽध्यायः ।

129

67731 **सृष्टितत्त्वामृतम्**

Beginning:

ओं परं ब्रह्मेत्याहुर्दशदिगवसानस्य विरहा-
दपारं पूर्णं यन्निरुपममनाकारमजरम् ।
अनेकाण्डैः खण्डीकृतमपि सदाखण्डममलं
वियद्वद् तत् ध्यायाम्यखिलनिगमार्थं शिवमिति ॥ १ ॥

इदं खण्डाकारं जगदखिलमल्पं हि न सुखं
ततोऽखण्डाकाशः परिलसति भूमैव हि सुखम् ।
स एवाधस्तान्मे स पुनरुपरिष्टात् स परितो
विभातीत्याख्यातः स शिव इति सामोपनिषदा ॥ २ ॥
प्रपञ्चो भूम्यम्बुज्वलनमरुदाकाशमयता-
मवाप्तोऽस्त्येतेषामुपशममयं चिन्मयमिति ।
यदग्राह्यं शून्यं गगनमिव सिद्धय(त्य)तितरा-
मिदं माण्डूक्योक्त्या हृदि लसति शान्तं शिवमिति ॥ ३ ॥

End:

नाम्ना मृत्युर्भवति हृदयग्रन्थिरात्मापिधानं
सच्छिष्याणां परगुरुगिरा भाति नान्यैरुपायैः ।
अर्धस्त्रैणस्फटिकधवलो मृत्युपाशान् छिनत्ती-
त्याम्नायान्त्यं कथमपि मया सूचितं तद्रहस्यम् ॥ ६० ॥
मलोद्यद्दुःखानामहह पुनरावृत्तिरहितं
विरामं यः कर्तुं प्रभवति पशूनां पतिरयम् ।
मयि स्वीये प्रीतो भवितुमनुकम्पापरवशः
स्तवप्रायैरेतैः स्मरतु भगवानेव निमिषम् ॥ ६१ ॥

Colophon:

इति श्रीपरमेश्वरयोगीन्द्रविरचिते सृष्टितत्त्वामृते द्वितीयः प्रबन्धः पूर्णः ।

188

70744 **सिद्धान्तमुक्तावली**

Scribe adds:

श्रीमद्दोड्डयदेशिकेन्द्रतनयो श्रीमन्नृसिंहाभिधः
माहाभाष्यरघूद्वहार्यलिखितां मुक्तावलीं शोभिताम् ।
उद्वीक्ष्यायमुदारधीरनुपमां रम्याक्षरराजितां
व्यालेखीद्विबुधैः सदा हृदि कृतामेनां विनैव श्रमम् ॥
कीलालस्थचतुष्टयात्मकमहीसंवर्तिपञ्चात्मकं
तेजस्त्रितयस्वरूपमनिलद्वन्द्वात्मकं विश्वगम् ।
आकाशस्थितशब्दरूपममितं तत्तत्पदार्थात्मकं
विज्ञातुं कतमो जनः सरसिजोद्भूतासखं भूष्णुकः ॥
आग्नेयादिवसन्तपूर्वमहिनीयाध्यापनाद्यात्मकं
यज्ञाद्याहुतिगार्हपत्यमुखपञ्चाग्न्यात्मकं तादृशम् ।
एवं वृत्तमिति प्रवक्तुमखिलात्मेशं जनाः के क्षमाः
भूतिद्वित्रिकसप्तषाष्टकमयं बाह्यादिबाह्यागमम् ॥
आकाशादिकभूतपञ्चकमयं ज्ञानेन्द्रियाद्यात्मकं
कर्मादीन्द्रियपञ्चकं निखिललोकान्तस्थजीवात्मकम् ।
पञ्चैकत्रितयात्मकं मखभुजामाद्यं तदाद्यात्मकं
लीलाशीलममानवाद्भुतगुणं जानन्ति के कोविदाः ॥
शब्दादिभोग्यरतिरूपमधोक्षजाङ्घ्रि-
भक्त्यात्मकं द्वयविभूतिजभूतिरूपम् ।
ज्ञानादिषञ्चकमयं चिदचित्स्वरूपं
शक्तोऽधिको भुवि रमारमणं विवेक्तुम् ॥

248

PM1484 **सिद्धान्तमुक्तावलीप्रकाशटिप्पणी**

Beginning:

यद्यप्यत्र घातपदस्येति । ननु वीत्यस्योपसर्गत्वेन पदत्वाभावाद् विपदमनर्थकमिति प्रतिभाति इत्याक्षेपः, कथं विशिष्टवाचकानां पदानां सति पृथग्विशेषवाचकसमवधान इति समाधानं वा

कथमुपपद्यते। वीत्यस्य उपसर्गत्वेन तस्य वाचकत्वाभावात्। उपसर्गाणां द्योतकत्वमेव, न तु वाचकत्वमिति नियमात् इति चेत्। अत्र केचित् आहुः। विपदमित्यस्य विशब्द इत्यर्थात् आक्षेपः संगच्छते। विशिष्टवाचकानां पदानामित्यादि नियमघटकविशेषणवाचकपदसमवधान इत्यस्य विशेषणबोधकशब्दसमवधान इत्यर्थात् समाधानमप्युपपद्यत इति तन्मन्दम्।

End:

न वा रङ्गविशेष्यकरजतत्वप्रकारकभ्रमे वस्तुमात्रस्यैव रङ्गनिष्ठाभावप्रतियोगितानिरूपित-विषयतासंबन्धावच्छिन्नावच्छेदकताश्रयतया तदनवच्छेदकाप्रसिद्ध्या अव्याप्तिरिति सकलं समञ्जसम्।

Colophon:

दिनकरभट्टीयटिप्पणी समाप्ता।

प्रमाथिमिथुनकृष्णचतुर्दशी।

251

68343 सिद्धान्तमुक्तावलीप्रकाशटिप्पणी

Beginning:

ईश्वरं प्रार्थयतीत्यादौ ईश्वरविषयकप्रपूर्वकार्थधात्वर्थमत्संबन्धित्वप्रकारकेच्छात्मकप्रार्थनाश्रयो ग्रन्थकृदिति बोधः इति केचन मन्यन्ते। तदयुक्तम्... विषयत्वार्थकत्वे तादृशेच्छायां स्वात्मनोऽपि विषयत्वात् स्वात्मानं प्रार्थयतीत्यपि प्रयोगापत्तेः। अतो द्वितीयाया न विषयत्वमर्थः। परं तु जन्यता-संबन्धावच्छिन्नप्रकारत्वमर्थः। तादृशद्वितीयार्थभूतप्रकारतायां ईश्वरस्याधेयतासंबन्धेनान्वयः। तथाचेश्वरनिष्ठजन्यतासंबन्धावच्छिन्नप्रकारतानिरूपित यत्किंचिद्द्रव्यनिष्ठविशेष्यतानिरूपितमत्संबन्धित्व-निष्ठप्रकारताशालीश्वरान्ममेदं भूयादित्याकारिकाकांक्षा तदाश्रय इति बोधः।

End:

तत्तत्प्रतियोगितायां तदभावोपपादनं तु इत्थम्—वह्निमान् धूमादित्यादौ स्वशब्दार्थः वह्नित्वनि-... संबन्धः समवायः अनवच्छेदकः कालिकः तदवच्छिन्नत्वं स्वसामानाधिकरण्यं च कालिकसंबन्धा-वच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितवह्निनिष्ठ .... यप्रतियोगितानिरूपित वह्नित्वनिष्ठावच्छे-दकतायाम्। एवं च स्वानवच्छेदकसंबन्धावच्छिन्नत्वस्वसामानाधिकरण्य उभयसंबन्धेन साध्यता-वच्छेदक ....।

252

68347 सिद्धान्तमुक्तावलीप्रकाशटिप्पणी

Beginning:

नातस्समाप्तपुनरात्तत्वं दोष इति। नन्वेतद्दोषवारणाय लीलेत्यस्य विशेष्यत्वाङ्गीकारे क्रेंकारस्वर-कार्मुकस्येत्यादि प्रसिद्धोदाहरणेऽपि वेणुस्वन इत्यस्य विशेष्यत्वस्य सुवचतया समाप्तपुनरात्तत्वानुप-

पत्तिः। न चेष्टापत्तिः। तस्य क्वापि दोषत्वोच्छेदापत्तेः। तथा च लीलेत्यस्य विशेषणत्वमेव वाच्यम्। तथाच तद्दोषस्तदवस्थ इत्यत आह—वस्तुतस्त्विति। केचित्तु योगनिरूढशब्दयोरेकवाक्यघटकत्वे रूढशब्दस्यैव विशेष्यवाचकत्वमिति नियमात् भवपदस्यैव विशेष्यवाचकत्वमावश्यकमिति तद्दोषतादवस्थ्यमित्यत आह—वस्तुतस्त्विति इत्याहुः। तच्चिन्त्यम्।

End:

घटाभाववद् भूतलमिति ज्ञानकालीनमिति। तादृशप्रमाधिकरणकालीनमित्यर्थः। घटानधिकरणकालविशिष्टमिति यावत्। अयमभिसंधिः। घटाभावादेः शुद्धभूतलादिस्वरूपमेव संबन्धः, तन्निष्ठभूतलानुयोगिकत्वघटाभावप्रतियोगिकत्वयोर्घटासमवधानकालावच्छेदेनैवावच्छेद्यावच्छेदकभावाभ्युपगमात्। घटवति भूतले घटाभाववुद्धेर्न घटाभावप्रतियोगिकत्वावच्छिन्नस्वरूपनिष्ठनिरूपकता, प्रतियोगितावद्विशेष्यकत्वघटितघटाभावप्रमात्वमिति भावः।

253

69869 सिद्धान्तमुक्तावलीप्रकाशटिप्पणी

Beginning:

अनेकेति—किमिदमनेकत्वम्, एकभिन्नत्वमिति **महादेवः**। युक्तं चैतत्, एकं न भवतीति व्युत्पत्त्या तदर्थसिद्धेः। न चैकत्वस्य केवलान्वयितया तदवच्छिन्नभेदोऽप्रसिद्ध इति वाच्यम्, एकत्वपर्याप्त्यनवच्छेदकोभयत्वाद्यवच्छेदेन एकत्वावच्छिन्नप्रतियोगिताकभेदस्वीकारे बाधकाभावात्। न चैकदेशवृत्तेर्व्याप्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वं नास्तीति वाच्यम्; तादृशनियमानङ्गीकारात्। अत एव वक्ष्यति—प्रत्येकमेकैकत्वेऽपि पृथिवीजलयोर्नगन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वादिति ग्रन्थकृत्।

End:

प्रत्यक्षे विषयस्य कारणत्वात् पूर्वक्षणे च तदभावात् . . . . . पुरुषान्तरीयाणां भूयसीनां तादृशज्ञानव्यक्तीनां विषयत्वकल्पने गौरवात्। एवं कालविशेषस्यापि . . . . . तादृशज्ञानोत्पत्तिक्षणात्मककालस्य पूर्ववृत्तित्वाभावात्, पूर्वक्षणात्मककालस्य च तत्काले अभावात् . . . . . कार्यसहभावेनापि हेतुतायाः सिद्धान्तसिद्धत्वात्। न च तादृशज्ञानोत्पत्तिक्षण तत्पूर्वक्षणाव . . . . . स्तामिति वाच्यम्; तथापि तादृशक्षणद्वयावस्थायिनानापदार्थरूपस्थूलकालस्य एकैवातादृशज्ञान . . . . . अधिकरणात्मकत्वपक्ष इव नात्र पक्षे तृतीययुक्तेः फलतेति प्रदर्शनायैतेनेत्यनेन उक्त . . . . . प्रत्यक्षत्वापत्तेरिति प्रत्यक्षनिरूपितलौकिकविषयताशून्यत्वापत्तेरित्यर्थः। चक्षुषा घटाभावं पश्या . . . . . विषयतायाः दुरपह्नवतया तत्रेष्टापत्तेरयोगादिति भावः।

Colophon:

इत्यभावनिरूपणम्।

271

77445 **सिद्धान्तमुक्तावलीव्याख्या**

Beginning:

. . . . . भिप्रायेणेत्यर्थः ।
चूडामणीकृतविधुः वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥

अचूडामणिः चूडामणिः संपद्यमानः कृतः चूडामणीकृतः । चूडामणीकृतः विधुः येन सः चूडामणीकृतविधुः । अवलयः वलयः संपद्यमानः कृतः वलयीकृतः वासुकिः । चूडामणीकृत-विधुशब्दस्य चूडाम . . . . . नि लक्षणा । वलयीकृतवासुकिः . . . . . येन सः वलयीकृतवासुकिः वासुकिसंबन्धिनि लक्षणा । बहुव्रीहि . . . . . दार्थे लक्षणा । च्विप्रत्ययान्तमेतत् ॥ 'कृभ्वस्तियोगे संपद्यकर्तरि च्विः' इति पाणिनिना सूत्रितत्वात् । अभूततद्भाव इति वाच्यमिति वार्तिकोक्तेः कृभ्वस्तीनां योगे संपद्यकर्तरि, संपद्यश्चासौ कर्ता च संपद्यकर्ता, तस्मिन् संपद्यकर्तरि । संपूर्वकपदधातु-निरूपितकर्तरि अभूततद्भावे च्विप्रत्ययो भवति । विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानात् स्वार्थे च्विर्वा स्यात् करोत्यादिभिः योगे । चूडामणीकृतविधुरित्यत्र 'च्वौ च' इति शास्त्रेण दीर्घः । वलयीकृतवासुकिरित्यत्रापि 'अस्य च्वौ' इति शास्त्रेण अकारस्य ईकारो जायते । च्विप्रत्ययस्य कोऽर्थः सादृश्यमर्थः, सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम् । चन्द्रभिन्नत्वे सति चन्द्रगत आह्लादजनकत्वं मुखे चन्द्रसादृश्यम् । तथा च विधुनिष्ठचूडामणिभिन्नचूडामणिप्रतियोगिक-सादृश्यवदभिन्नः वासुकिनिष्ठवलयभिन्नवलयप्रतियोगिकसादृश्यवदभिन्नः च भवः मत्संबन्धक्षेम-प्रयोजको भवतु ।

. . . . . .

Folio 26a:

संयोगभिन्नत्वमात्रोक्तौ दण्डादावतिव्याप्तिः । अतः, संयोगासमवायिकारणत्वं, तत्तत्र नास्ति । सामान्यं द्विविधं परमपरं चेति । नित्यत्वे सति अनेकानुगतत्वं सामान्यस्य लक्षणम् । अनेकानु-गतत्वं च अनेकपदार्थनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वम् ।

. . . . . .

End:

तथा न संभवति । तत्पदवाच्यत्वं च तत्पदजन्यबोधविषयत्वम् । तत्पदजन्यबोधविषयत्वं च घटपटजन्यबोधविषयत्वत्वावच्छिन्नप्रकारतानिरूपितेश्वरेच्छीयविशेष्यतावृत्त्वम्, तादृशप्रकारतानिरू-पितविशेष्यतासंबन्धेन तदिच्छावत्त्वं वा । तथा च तादृशघटपदवाच्यत्वस्य पटे असत्त्वात् नातिप्रसंगः । गङ्गादिपदजन्यत्वस्य बोधांशे, बोधविषयत्वस्य च तीरांशे स्वातन्त्र्येण भानमीश्वरेच्छायामुपेयते । इत्थं च विशकलितभानस्थले निरूप्यनिरूपकापन्नविषयताया अभावेन गङ्गापदजन्यत्वप्रकारतानि-रूपितबोधविषयतानिरूपितविषयत्वप्रकारतानिरूपितविशेष्यतासंबन्धेनेच्छावत्त्वस्य तीरे असत्त्वेन न क्षतिरिति संक्षेपः ।

296

70662 **सिद्धान्तमुक्तावलीव्याख्या**

Beginning:

. . . . कालावृत्तित्वसंबन्धेन प्रतियोगिताविशिष्टत्व एतदन्यतरत्वं पारिभाषिकमन्योन्याभाव-भिन्नत्वं, स्वपदेन अभावप्रतियोगिता धर्तव्या। तदवच्छेदकावच्छिन्ना वृत्तिर्यस्य सः स्वावच्छेदका-वच्छिन्नवृत्तिः, तद्वत्त्वं स्वस्मिन्नित्येतस्यार्थः। घटाभावस्य घटे घटत्वावच्छेदेन विद्यमानतया स्वावच्छेदकीभूतघटत्वस्य अवच्छेदकत्वम्। वृत्तिरेव वृत्तित्वमिति वृत्तित्वस्यावच्छेद्यत्वमिति भावः।

End:

एतेन संयोगजलपरमाणुरूपयोः अतिव्याप्तिर्निरस्ता। आधेयतायाः आधेयस्वरूपत्वाङ्गीकर्तुर्मते आधेयतात्रितयस्याप्रसिद्धया कथं लक्षणसमन्वय इति चेत्, अधिकरणतात्रयनिरूपक आधेयत्ववत्त्वमेव अनेकसमवेतत्वमिति फलितोऽर्थः।

समवायसंबन्धावच्छिन्नकार्यतानिरुपित समवायस्वसमवायिसमवेतत्व एतदन्यतरसंबन्धावच्छिन्न-का . . . . ताश्रयत्वस्य असमवायिकारणत्वे तुरीतन्तुसंयोगादावतिव्याप्तिः। अतः निमित्तकारण-भिन्नत्वं देयम्।

298

69849(b) **सिद्धान्तमुक्तावलीक्रोडपत्रम्—प्रतिबन्धकतावादः**

Beginning:

परमं ब्रह्म पुराणं प्रणम्य पङ्केजवासिनीप्रेयः।
पट्टाभिरामभावः प्रायः प्रकटीचिकीर्ष्यतेऽस्माभिः॥ १॥
(मण्यादौ)प्रतिबन्धकत्वमिह यन्मीमांसकैस्तन्महा-
देवो बाधधियो विरोधविलयापत्त्या किलादूदुषत्।
तच्चासाबुदधि . . . . . मोऽपि यत्
सद्युक्त्या सिषमर्थयिष्यत इदं **श्रीवेङ्कटार्येण** तत्॥ २॥

तथा हि मण्यादेर्दाहादिप्रतिबन्धकत्वा . . . . . .

दाहानुकूलशक्तिस्वीकर्तृमीमांसकाभिमतां कार्यानुकूलधर्मविघटकतात्मिकां प्रतिबन्धकतां सकलकथककुल . . . . . रोधिताकबाधबुद्धावनुपपद्यमानतया महादेवदूषितां तत्रापि मण्यादेः वह्न्यादिनिष्ठदाहाद्य . . . . . धनिश्चयस्यापि अनुमितिकारणात्म-मनःसंयोगादिनिष्ठशक्तिविघटकताया वक्तुमुचिततया समजीगमत् पट्टाभिराम . . . . .।

End:

कार्यानुकूलस्य विनाशकत्वं धर्मस्य न स्यात् प्रतिबन्धकत्वम्।
इत्थं **महादेव**वचःप्रचारो विचारितश्चेत् सु . . . . . ॥

. . . . तव्यभिचारबुद्धिसिद्धयादिमानां प्रतिबन्दितेति
तन्निर्वाहाय पू(र्वाहायपूर्व)स्मादुक्तयुक्तिगवेषणम् ॥
आवश्यकं ततो बाधबुद्धि . . . . . ।
विभीषिकाकुञ्चिकयास्मदुक्त्या गूढं तदन्तर्गतमर्थजातम् ।
प्राकाशि गृह्णीध्वमहो महान्तस्तत्संजिघृक्षा यदि वर्तते वः ॥
. . . . . तिबन्धता ।
वेङ्कटेशेन विदुषा व्यचारि विदुषां मुदे ॥

299

70652(c) सिद्धान्तमुक्तावलीक्रोडपत्रम्

Beginning:

अथ हेतुमन्निष्ठाभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिति मूलतो लभ्यते । तत्र च धूमसमानाधिकरणतत्तद्वह्न्यभावप्रतियोगित्वात् सर्वेषामपि वह्नीनामव्याप्तिरित्याशंक्य अवच्छेदकत्व-गर्भलक्षणानुसरणं मुक्तावल्यां कृतं, तदयुक्तमिव प्रतिभाति । तथा हि—स्वप्रतियोगिकत्व स्वसामा-नाधिकरण्योभयसंबन्धेन साध्यविशिष्टान्यत्वस्याभावे विशेषणत्वेनाव्याप्तिपरिहारसंभवे यथाश्रुतार्थ-परित्यागोऽनुचितः । तत्तद्वह्न्यभावानां यत्किंचित्वह्निप्रतियोगिकत्वेन यत् किंचिद्वह्निसमानाधि-करणत्वेन उक्तोभयसंबन्धेन साध्यविशिष्टत्वेन व्यावृत्तिसंभवात् घटाभावादिसंग्रहाय स्वप्रतियोगिकत्व-निवेशः । तदसंग्रहे च हेतुसमानाधिकरणाभावस्य निरुक्तसंबन्धेन साध्यविशिष्टत्वनियमेन सद्धेतुमात्रे लक्षणासंभवात् । धूमवान् वह्नेरित्यादावतिव्याप्तेः स्वसामानाधिकरण्यनिवेशः । एवं च कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगाभावस्य उक्तोभयसंबन्धेन साध्यविशिष्टत्वात् तद्व्यावर्तनाय प्रतियोगि-वैयधिकरण्यमप्यनुपादेयमेव ।

End:

तन्न शोभनम् । प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिमत्ताग्रहं प्रति येन संबन्धेन स्वप्रकारकं ज्ञानं प्रतिबन्धकं तेन संबन्धेन हेतुसामानाधिकरण्यविवक्षयापि सकलदोषवारण-संभवेन उक्तस्थले घटाभावस्यैव लक्षणघटकत्वसंभवात् । एवं स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवत्ताग्रहं प्रति येन संबन्धेन स्वप्रकारकं ज्ञानं प्रतिबन्धकं, तत्संबन्धावच्छिन्नाधेयत्व-स्यैव संबन्धकोटिनिविष्टसामानाधिकरण्ये प्रवेश्ये तथोक्तस्थले संबन्धान्तरेण साध्याभावस्यैव निरुक्तोभयसंबन्धेन साध्यतावाच्छेदकविशिष्टस्य प्रसिद्ध्या प्रतियोग्यप्रसिद्धिनिबन्धनलक्षणघट-काभावाप्रसिद्धिविरहाच्च प्रतियोगिमत्ताग्रहं प्रतीत्युपेक्ष्य साध्यवत्ताग्रहं प्रतीतिकरणान्निरुक्तसाध्यके कालादिहेतौ नातिव्याप्तिः । स्वप्रकारकेतिकरणाच्च न तादृशस्थल एवाव्याप्तिः । इत्थं च संबन्धकोटिप्रविष्टस्वाश्रयप्रतियोगिकत्वमित्यत्र स्वाश्रये साध्यतावच्छेदकसंसर्गप्रतियोगित्वमपि न निवेशनीयम् । प्रमेयसाध्यकस्थले घटाद्यात्मकाभावस्यैव लक्षणघटकत्वसंभवादिति परैरपरिशीलितः पन्थाः ।

जातः सन् मित्रवंशे महति महदनन्तांशभूतोऽर्यवाक्यात्
संप्रीतो गोप्रचारे जितखरमुखदुर्दूषणो वानराग्रः।
गत्वाम्भोवेष्टमानां पुरमरिविजयः प्राप्तकैङ्कर्यलक्ष्मी-
योंऽभूद्रामानुजार्यो भवतु ह भवतां श्रेयसे भूयसे सः॥

Colophon:

मुक्तावलीसिद्धान्तलक्षणोपरि क्रोडम्।

302

68084 तर्ककौमुदी

Beginning:

पदार्थसामान्यस्य किं वा लक्षणमित्युक्ते, अभिधेयत्वं ज्ञेयत्वं वाच्यत्वं प्रमेयत्वं पदार्थत्वं च। सामान्यतः पदार्थो द्विविधः, भावोऽभावश्च। भावत्वं च समवायस्वसमवेतसमवायान्यतरसंबन्धेन सत्तावत्त्वम्। अभावत्वं च भावभिन्नत्वम्। भावः षड्विधः, द्रव्यगुणकर्मसामान्यविशेषसमवाय-भेदात्। अभावो द्विविधः। संसर्गाभावोऽन्योन्याभावश्चेति। संसर्गाभावस्त्रिविधः, प्रागभावप्रध्वंसा-भावात्यन्ताभावभेदात्।

End:

वाक्यं नाम पदसमूहः। शाब्दबुद्धित्वावच्छिन्नं प्रति आकाङ्क्षाज्ञानं योग्यताज्ञानं संनिधिज्ञानं तात्पर्यज्ञानं च कारणम्। तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यस्य लक्षणम्। चैत्रस्तण्डुलं पचतीत्यत्र चैत्रपदस्य चैत्रत्वावच्छिन्नमर्थः, तण्डुलपदस्य तण्डुलत्वावच्छिन्नमर्थः, अंप्रत्ययस्य कर्मत्वमर्थः, पचधातोः पाकोऽर्थः, आख्यातस्य कृतिरर्थः। तथा च तण्डुलकर्मकपचनानुकूलकृतिमान् चैत्रः। गामानयेत्यत्र गोकर्मकानयनानुकूलकृतिमान् देवदत्त इत्यर्थः

तद्भिन्नत्वे सति तद्वतभूयोधर्मवत्त्वं सादृश्यस्य लक्षणम्

346

77463 तर्कसंग्रहटिप्पणी

Beginning:

अन्नंभट्टाख्यः कश्चन विद्वान् चिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये इष्टदेवतानम-स्काररूपं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—निधायेति। निपूर्वकधाधातोः वृत्तित्वप्रकारकाहार्य-ज्ञानमर्थः। तदुत्तरल्यपः उत्तरकालीनत्वमर्थः। हृदीत्यत्र सप्तम्याः निरूपितत्वमर्थः। हृच्छब्दः हृदयदेशपरः। विश्वेशमित्यत्र द्वितीयायाः विशेष्यत्वमर्थः। तथा च विश्वेश्वरविशेष्यकहृदय-देशनिरूपितवृत्तित्वप्रकारकाहार्यज्ञानोत्तरकालीना। विपूर्वकधाधातोः कृतिरर्थः, तदुत्तरल्यपः उत्तर-कालीनत्वमर्थः।

Fo. 46b:

द्वितीयं तु समवायसंबन्धावच्छिन्नरूपत्वावच्छिन्नकार्यतानिरूपितस्वसमवायिसमवेतत्वसंबन्धावच्छिन्ना या कारणता (कपालरूपनिष्ठा कारणता) तदाश्रयत्वस्य कपालरूपे सत्त्वात् लक्षणसमन्वयः।

ज्ञानं द्विविधं निर्विकल्पकं सविकल्पकं च। निष्प्रकारकं ज्ञानं निर्विकल्पकम्। निर्गतः प्रकारः यस्मात् तत् निर्विकल्पकं, तस्य भावः तत्त्वं, ज्ञानस्य भावः ज्ञानत्वम्।

End:

पृथिवीं विभजते—पृथिवीपदस्य पृथिवीत्वावच्छिन्नमर्थः। तदुत्तरद्वितीयाया विशेष्यत्वमर्थः। विपूर्वकभजधातोः व्याप्यधर्मप्रकारकज्ञानजनकशब्दोऽर्थः। तदुत्तराख्यातस्य कृतिरर्थः। तादृशकृतेः आश्रयतासंबन्धेन ग्रन्थकारेऽन्वयः। तथा च पृथिवीत्वावच्छिन्नविशेष्यकपृथिवीत्वव्याप्यधर्मप्रकारकज्ञानजनकशब्दानुकूलकृतिमान् ग्रन्थकार इति शाब्दबोधः।

347

PM1446 तर्कसंग्रहतत्त्वप्रकाशः

Beginning:

प्रणम्य शिरसा सूर्यं शंकरं पितरं गुरुम्।
तर्कसंग्रहतत्त्वस्य प्रकाशः क्रियते मया॥

प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकविघ्नविघाताय शिष्टाचारप्राप्तभगवन्नमस्काररूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते—निधायेति। ननु मङ्गलं न समाप्तिसाधनं, मङ्गलविरहेऽपि नास्तिकादीनां ग्रन्थे समाप्तिदर्शनेन व्यतिरेकव्यभिचारः मङ्गलसत्त्वेऽपि कादम्बर्यां समाप्तेरदर्शनेनान्वयव्यभिचारः इति चेन्न। मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वादित्यनुमानात् समाप्तिरेव मङ्गलस्य फलम्।

End:

कणाद इति। विदुषा अन्नंभट्टेन तर्कसंग्रहो रचित इत्यन्वयः। विदुषा पण्डितेन रचितः कृत इत्यर्थः। कथंभूतः सः कणादन्यायमतयोः कृत इत्यनुषङ्गः। एतेन ग्रन्थस्य प्रमाणमपि सूचितम्। कणादमतं च न्यायमतं च कणातन्यायमते, तयोः कणादन्यायमतयोः, कस्मै प्रयोजनायेत्यत आह—बाल इति। बालानां व्युत्पत्तिसिद्धिः बालव्युत्पत्तिसिद्धिः, तस्यै बालव्युत्पत्तिसिद्धय इति संक्षेपः।

354

68093 तर्कसंग्रहदीपिका

The scribe adds the following verses at the end:

प्रायः काव्ये गमितवयसः पाणिनीयाम्बुराशेः
पारज्ञस्याप्यपरिकलितन्यायशास्त्रस्य पुंसः।

वादारम्भे वदितुमनसो वाक्यमेकं सभायां
प्रह्वा जिह्वा जहति कियतीं पश्य कष्टामवस्थाम् ॥ १ ॥
दिदेविषति मानुषःसचति तद्वद्गुणानामसौ
शिशंसिषति सर्वदा विविधयिष्यते तेन च ।
मुमुक्षिषति तत्त्वगत्यवगतेः स निःसंशयं
निनित्यषति नित्यशस्सचरिरङ्गभिक्षूषति(?) ॥ २ ॥
(हस्तौ)चेदुदकुम्भभारकृणितावंशौ पुनर्गोमय-
स्फारन्नाश्यमलीमसौ करतलं घासच्छिदा कर्कशम् ।
पाकाम्बूत्थ . . . . ममेलनगलद्बाष्पाविले लोचने
कष्टं रिक्तगृहस्नुषात्वनरकं स्त्रीणामहो दुःसहम् ॥
(स्व)भानुनामके वर्षे सिंहे मासे वरे दिने ।
लिख्यते **श्रीनिवासेन** तर्कसंग्रहदीपिका ॥

379

73359(b) **तर्कसंग्रहदीपिकाटिप्पणी**

Beginning:

ननु मङ्गलस्य समाप्तिसाधनत्वमस्तीति दीपिकाकारेणोक्तमासीत् । क्वचित् स्थले मङ्गले कृतेऽपि समाप्त्यदर्शनात्, क्वचिन्मङ्गलाभावेऽपि समाप्तिदर्शनात्, मङ्गलसत्त्वे समाप्तिसत्त्वं मङ्गलाभावे समाप्त्यभाव इत्यन्वयव्यतिरेकाभ्यां मङ्गलस्य समाप्तिजनकत्वं सुतरां न संभवति इति चेन्न ; कादम्बर्यादौ मङ्गले कृतेऽपि अतीव विघ्नबाहुल्यात् समाप्त्यभावः ।

End:

तदभाववति तत्प्रकारकानुभवो अयथार्थ इति अयथार्थस्य लक्षणम् । अयथार्थस्य किं वा लक्षणमित्युक्तौ तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वं लक्षणम् । , ... भूय भासमानो यो धर्मः स एव धर्तव्यः, तस्याभावः तदभावः, तदभावोऽस्यास्तीति तदभाववान्, तस्मिन् तदभाववति, तदभाववत्पदोत्तरविद्यमानसप्तम्याः विशेष्यत्वमर्थः . . . . तथा तदभावक . . . . तत्त्वं लक्षणम् तत् सर्पत्वं, तस्य सर्पत्वस्याभावः तदभावः सर्पत्वाभावः, तदभाववती सर्पत्वाभाववती रज्जुर्मता, रज्जौ सर्पत्वस्याभावात् । तदभाववद्विशेष्यकत्वं रज्जौ अयं सर्पं इत्याकारकायथार्थज्ञाने वर्तते । किं च तत्प्रकारकत्वं . . . . ।

390

TR516 **दीपिकाप्रकाशिकाटिप्पणी—प्रसरणा**

Beginning:

निधायेत्यादिपदस्यायं वाक्यार्थः ।

तथाहि—हृदीत्यत्र सप्तम्याः निरूपितत्वमर्थः। तस्य च वृत्तित्वप्रकारकाहार्यज्ञानरूपनिपूर्वकधात्वर्थघटकवृत्तित्वे अन्वयः। विश्वेशमित्यत्र निरूपकतया ज्ञानान्वयि आश्रयतया तदन्वयि वा विशेष्यत्वं विशेष्यित्वं वाऽर्थः।

प्रकृत्यर्थस्य विशेष्यित्वे आधेयतया विशेष्यत्वे वा निरूपितत्वसंबन्धेनान्वयः। स्यपः समानकर्तृकत्वसहित उत्तरकालीनत्वपरत्वात्।

End:

तदनन्तरमित्यत्र तच्छब्दः निदिध्यासनपर इत्यभिसंधायाह—निदिध्यासनेति। ननु मिथ्याज्ञानमात्रनाशेऽपि तदधीनवासनासत्त्वे दोषसंभवात् मिथ्याज्ञाननाशेन दोषाभावकथनमयुक्तमित्यतो व्याचष्टे—वासनासहितेति; ज्ञानविशेषणं, वासना संस्कारः। रागादिरिति; आदिना दोषमोहयोः परिग्रहः। विशेषेति। रजतव्यावर्तकाकारेत्यर्थः। शुक्तित्वादिरूपेत्यादिः। ज्ञानेनैवेति। एतेन तादृशश्रमनिवृत्त्यर्थकर्मेव्यवच्छेदः।

391

TR517 तर्कसंग्रहदीपिकाप्रकाशिका

Additional stanzas found in the beginning and end:

Beginning:

जैमिनिनयाब्धिचन्द्रं विबुधवरगणैर्विराजितं रामम्।
सुब्रह्मण्यं सुगुरुं नमाम्यहं विघ्नविघाताय॥

इत्येतत् (ग्रन्थ) लिखितुः सुन्दरेशस्य आर्या॥

End:

दीपिकायाः प्रकाशोऽसौ पोष्टा गूढार्थवर्त्मनः।
पेष्टा दोषगतान्ध्यस्य भूयात्तोषाय वै नृणाम्॥
अयं प्रकाशकः सदा सदीपिकार्थबोधकः
सनातनादियुक्तिभिः प्रकाशयन् कणादगाम्।
समस्तशास्त्रवेदिनां सतां मुदं करोत्वलं
नृसिंहसूरिणा कृतो विदोषयुक्तिसंपदा॥
विहितविविधतोषं विश्वविज्ञानपोषं
विबुधविनुतहेषं वीतलब्धादिशोषम्।
भवजलधिविशोषं पाञ्चजन्याविशेषं
भज हृदय विदोषं दैवतं वाजिवेषम्॥

संपूर्णोऽयं ग्रन्थः।

402

70343(b) **तर्कसंग्रहपरिभाषा**

Beginning:

अथ बालबुद्धिवैशद्याय तत्र तत्र विशेषाः प्रदर्श्यन्ते। तत्र संबन्धः नियतः। यथा तन्तौ पटः समवायेन वर्तते, अवयवावयविनोः समवायात्। तत्र पट आधेयः। आधेयता पटनिष्ठा। तन्तुराधारः, आधारता तन्तुनिष्ठा। अत्र आधेयता आधारतानिरूपिता, आधारताप्याधेयतानिरूपिता। तत्र चाधेयतायां पटनिष्ठायामवच्छेदकधर्मः पटत्वम् अवच्छेदकसंबन्धः सामवायः। तेन तन्तुनिष्ठाधारतानिरूपितपटत्वावच्छिन्नसमवायसंबन्धावच्छिन्नाधेयताश्रयः पटः।

End:

यथा हस्तिहस्तिपालयोः संयोगरूपसंबन्धे गृहीते, ततो यदाकदाचित् हस्तिदर्शने सति हस्तिपालस्मृतिर्जायते, तथा इहापि भूतलादिरूपार्थस्य पदस्य च शक्तिरूपसंबन्धस्य पूर्वगृहीतत्वेन भूतलादिपदरूपैकसंबन्धिज्ञाने सति भूतलादिरूपापरसंबन्धिस्मृतिर्जायते। ततो भूतलवृत्तिर्घट इति शाब्दबोधो जायते। तत्र पदज्ञानं करणम्, पदार्थोपस्थितिर्व्यापारः।

उक्तानि प्रमाणानि चत्वारि।

Colophon:

पट्टाभिरामविदुषा काणादन्यायगोचरा।
बालानामवगाहाय **परिभाषा** स्फुटीकृता॥

403

77463 **तर्कसंग्रहव्याख्या**

Beginning:

अन्नंभट्टाख्यः कश्चन विद्वान् चिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये इष्टदेवतानमस्काररूपं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—निधायेति। निपूर्वकधाधातोः वृत्तित्वप्रकारकाहार्यज्ञानमर्थः। तदुत्तरल्यपः उत्तरकालीनत्वमर्थः। हृदीत्यत्र सप्तम्याः निरूपितत्वमर्थः। हृच्छब्दः हृदयदेशपरः। विश्वेश्वरमित्यत्र द्वितीयाया विशेष्यत्वमर्थः। तथा च विश्वेश्वरविशेष्यकहृदयदेशनिरूपितवृत्तित्वप्रकारकाहार्यज्ञानोत्तरकालीनं, विपूर्वकधातोः कृतिरर्थः। गुरोर्वन्दनं गुरुवन्दनं। अज्ञाननिवृत्तिपूर्वकज्ञानोत्पादकत्वं गुरुशब्दार्थः। वन्दनं च नमस्कारः। नमस्कारश्च स्वावधिकोत्कृष्टत्वप्रकारकज्ञानजनकव्यापारः। अनुकूलत्वं द्वितीयार्थः। तथा च अज्ञाननिवृत्तिपूर्वकज्ञानोत्पादकगुरुविशेष्यकस्वावधिकोत्कृष्टत्वप्रकारकज्ञानजनकव्यापारानुकूलकृत्युत्तरकालीनः। गुरोरित्यत्र षष्ठ्याः विशेष्यत्वमर्थः।

End:

पृथिवीं विभजते। पृथिवीपदस्य पृथिवीत्वावच्छिन्नमर्थः। तदुत्तरद्वितीयायाः विशेष्यत्वमर्थः। विपूर्वकभजधातोः व्याप्यधर्मप्रकारकज्ञानजनकशब्दोऽर्थः। तदुत्तराख्यातस्य कृतिरर्थः। तादृशकृतेः

आश्रयतासंबन्धेन ग्रन्थकारेऽन्वयः । तथा च पृथिवीत्वावच्छिन्नविशेष्यकपृथिवीत्वव्याप्यधर्म-प्रकारकज्ञानजनकशब्दानुकूलकृतिमान् ग्रन्थकारः इति शाब्दबोधः ।

432

77554(c) **वाक्यार्थनिरुक्तिव्याख्या**

Beginning:

प्रणम्य दक्षिणामूर्तिं साम्बं संसारभेषजम् ।
निरुक्तिव्याकृतिं कुर्वे बालव्युत्पत्तिदायिनीम् ॥

अज्ञातकरणजन्यज्ञानानुवृत्तो ज्ञातकरणजन्यज्ञानव्यावृत्तो धर्मविशेषः साक्षात्त्वम् । यद्यपि साक्षात्त्वजातेरखण्डतया सखण्डोपाधिवन्निर्वचनापेक्षा नास्त्येव । तथापि साक्षात्त्वजातिः कुत्र वर्तत इत्यपेक्षायां ज्ञातकरणजन्याज्ञानेषु न वर्तते । किं तु अज्ञातकरणजन्यज्ञानेषु वर्तत इत्याह— अज्ञातेति । यद्वा साक्षात्त्वस्य जातितया शरीरनिर्वचनापेक्षाभावेऽपि तस्य किं लक्षणमित्यपेक्षायां साक्षात्त्वस्यैवासाधारणतया तत्स्वरूपमात्रं निरुच्यत इति । एवं पृथिवीत्वादिनिर्वचनेषु आक्षेपसमाधाने वेद्ये । निरुक्तेरयमर्थः ।

End:

समवायस्य द्रव्यादिपञ्चकपदार्थवृत्तित्वेन द्रव्ये द्रव्यत्वसमानाधिकरणता, गुणादौ च वर्तते । सत्ताप्रतियोगिकः भेदवान् यो भावः स समवाय इत्यर्थः । तत्र भावस्समवाय इत्युक्ते सत्तायामतिव्याप्तिः । तन्निरासाय सत्तेतरेति । तावति द्रव्यत्वे तन्निरासाय द्रव्यत्वात्यन्ताभावसमानाधिकरणेति । गुणत्वेऽतिव्याप्तिवारणाय द्रव्यत्वसमानाधिकरणत्वे सतीति । अभावो नाम नञर्थोल्लिखितधीविषयः । नञर्थोल्लिखिता नास्ति भवतीत्याद्याकारा या धीः, तद्विषय इत्यर्थः । भावषट्कव्युदासायाह— नञर्थोल्लिखितेति । यद्यपि घटाभावो नास्तीत्याद्याकारेण घटादेः प्रतीतेस्तत्रातिव्याप्तमिदं लक्षणम् । तथापि तन्मात्रविषयत्वं विवक्षितम् । तथा च घटादीनामयं घट इत्यादिरूपेणापि प्रतीतेः नातिव्याप्तिः । अभावस्य तु असाधारणस्वरूपं नञर्थमात्रप्रतीतिविषयत्वमेवेति नासंभवः ।

अथवा समवायित्वे सति असमवायो वा अभावः । समवायोऽस्यास्तीति समवायी, स न भवतीत्यसमवायी । तत्त्वे सति असमवायः, समवायभिन्न इत्यर्थः । द्रव्यादिपञ्चकव्युदासाय सत्यन्तम् । समवायेऽतिव्याप्तिवारणाय उत्तरपदम् ।

445

PM1456 **तर्कामृतव्याख्या**-चषकम्-तात्पर्यटीकासहितम्

Beginning:

आत्मरूपगुणनृत्यकारिणे लोचनाकलिततत्त्वसाक्षिणे ।
नूतनोद्भवसमाधिहेतवे नीलकण्ठगुरवे नमो नमः ॥ १ ॥
गुरुगणना यत्पूर्वं यस्याग्रे स ग्रहाग्रणीतनयः ।

कविमिव तं कवयन्तं तातं नारायणं वन्दे ॥ २ ॥
मुक्तावलीप्रकाशात् स्फुरिते **चषके** समर्पितं सुधिया ।
गङ्गारामेण मया **पिबन्तु तर्कामृतं** कृतिनः ॥ ३ ॥

यद्यप्यविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र विशेषतः फलजिज्ञासायां दृष्टसंभवे विश्वजिन्न्यायानवतारात् रात्रिसत्रन्यायेन फलकल्पनाश्रौव्ये परिशेषानुमानप्रवृत्तस्य पुंसः प्रारब्धं कर्म निर्विघ्नं समाप्यतामिति मङ्गलप्रवृत्तपुरुषकामनाविषयत्वेन समाप्तिरप्युपस्थिता । तथापि नास्तिकग्रन्थसमाप्तावश्यकूलूसनियतपूर्ववृत्तिताकेन स्वतःसिद्धविघ्नात्यन्ताभावेनैव विघ्नस्थलीयसमाप्ति-निर्वाहे न तत्र मङ्गलस्य हेतुत्वमन्यथासिद्धत्वात् । किं तु विघ्नध्वंसे तथात्वं क्वचित्परिशेषानुमान-गोचरीभवति ।

इत्थं च समाप्तिकामस्य मङ्गले प्रवृत्तिस्तु मङ्गलेन विघ्नध्वंसे जनिते तदविनाभूततदत्य-न्ताभावरूपसमाप्तिसाधनस्य स्वस्मिन्ननुवृत्तिरित्यनुसंधायैवेति स्थिते सत्येकस्मिन्नपि बाधके साधक-सहस्रस्याप्यकिंचित्करतयावश्यमपेक्षितायै प्रारिप्सितविघ्नोपशान्तये कृतं मङ्गलं शिष्यशिक्षायै निबध्नन् श्रोत्रवधानाय चिकीर्षितं प्रतिजानीते—ब्रह्माद्या इति ।

व्या—व्याख्यातुः सुखहेतुर्यथार्थगुरुगम्यतापर्यम् ।
साभिप्रायपदानां **चषके तात्पर्यटीकेयम्** ॥

आत्मरूपेति । आत्मरूपाः स्वस्वरूपाः किं वा आत्मानं निरूपयन्ति, व्यावर्तयन्ति ते तथा । तथा चात्मपक्षकभेदानुमितिलिङ्गतावच्छेदकावच्छिन्नाः गुणाः सत्यसंकल्पत्वादयो यस्य स चासौ नृत्यकारी च, तस्मै । आत्मनि रूपप्रमुखगुणानां नृत्यं कारयते इति वा । लोचनेति । लोचनेन मायास्वरूपेण प्रमाणेन वा कलितानां भासमानानां तत्त्वानां पदार्थानां, समक्षदर्शनात् साक्षी द्रष्टा तस्मै । नूतनेति । नूतनस्य जगतः पदार्थस्य उद्भवसमाध्योर्हेतुर्विवर्तकारणम् । अतात्त्विकोऽन्यथाभावो विवर्तः । यथा रज्जौ सर्पः । किं वा नूतनस्य प्रागभावप्रतियोगित्वलक्षितस्य उद्भवसमाध्योः उद्भवस्थितिलयानाम् , तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति न्यायात् । हेतुर्निमित्तं तस्मै । नीलकण्ठेति । नीलः कण्ठे यस्य स एव गुरुर्ज्ञानप्रदस्तस्मै । यद्वात्मरूपः कुलक्रमागतो गुणः अध्ययनसंपन्नं ज्ञानम् । तेन नृत्यकारी संतुष्टः परिपूर्णः तस्मै । एतेनाऽध्ययनादिसंपत्तिरुक्ता ।

लोचनाभ्यामाकलितस्य पुस्तकस्य तत्त्वसाक्षी यथार्थद्रष्टा तस्मै । एतेन भावनोक्ता । नूतन उद्भवो येषां तेषां दूषणानां दोषांशानां समाधौ समाधाने हेतुः प्रथमवक्ता तस्मै । एतेन वक्तृनैपुण्यं दर्शितम् । नीलकण्ठस्तच्छर्मा गुरुरुपदेष्टा तस्मै । नमो नम इत्यादरे वीप्सा । गुर्ववधिको यो मदीयापकर्षस्तद्बोधनानुकूलो मदीयादरपूर्वको व्यापार इत्यर्थः । प्रकृते श्लेषोऽलङ्कारः । नानार्थ-संश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रित इति लक्षणम् ।

End:

मूलं—अत एव संस्कारस्य सविशेष्यकत्वमावश्यकम् । इत्थमेव घटत्वांशेऽपेक्षात्मनो द्रव्यत्वांशे उपेक्षात्मकात् समूहालम्बनात् घटत्वेन स्मृत्युपधायकाद्द्रव्यत्वेन स्मृतिवारणाय

सप्रकारकत्वमपीत्यन्यत्र विस्तरः। अनुभवत्वस्य सन्दिग्धव्यभिचारकतां पुनः पुनः स्मृतेः दृढतर-संस्कारजनकतां स्वजन्यसंस्कारनाश्यानां स्मृतीनामिति टीकां चालोक्याह—ज्ञानेति। स्थितिस्थापकाख्यः संस्कारः कारणगुणप्रक्रमजन्यः। स्थितिस्थापकाख्य इति। एतत्तत्त्वं प्रपञ्चितमधस्तात्।

व्या—ज्ञानोपरमेऽपि विशिष्टविषयोपधानेन जायमानकृतिसाक्षात्कारपूर्वं विशेषणतावच्छेदक-प्रकारकसंशयान्यसविषयकस्यावश्यकतया संस्कारस्य सविषयकत्वसिद्धिः। एवं स्मृतिजनकतावच्छेदके उपेक्षान्यत्वप्रवेशे उपेक्षाज्ञानात् तत्संस्कारकल्पनागौरवं चाभिप्रेत्याह—अन्यत्र विस्तर इति। संदिग्धव्यभिचारकतां व्यभिचारसन्देहविषयधर्मतां, उक्तलाघवज्ञानस्योत्तेजकत्वमाशङ्क्याह—पुनः पुनः स्मृतेरिति। स्मृतीनां साहचर्यादुद्बोधकबाहुल्येन झटिति समवधानमेव भावनायां हार्दमित्युक्ते त्वाह—स्वजन्येति। नायं वेगादतिरिच्यत इत्याशङ्क्याह—एतत्तत्त्वमिति। ननु स्थितिस्थापकस्य पाकजन्यत्वमपि लीलावत्यामुक्तम्, अत आह—प्रपञ्चितमधस्तादिति।

460

TR519 न्यायकुसुमाञ्जलिव्याख्या—कुसुमाञ्जलिबोधिनी

Beginning:

... नमित्यर्थः। भ्रमश्च क्वचिदतत्त्वमेव तत्त्वतया ... वस्यं मदीयं चेतो रमयतु। संशयविपर्ययनिरासेन तत्त्वास्पदं करोत्विति। अनघमिति व्यस्तपाठे चेतोविशेषणम्। स्वारसिक-श्रद्धावत्त्वेन निष्पापं चेत इति क्रियाविशेषणं वा। अघं क्लेशः, यथा तन्न स्यात् यथा च विघ्नो न स्यात् तथा रमयतु। अक्लिष्टमविहतश्रद्धायुक्तं च यथा स्यात् तथा करोत्वित्यर्थः।

End:

इत्येवमिति। श्रुतिर्वेदः नीतिर्न्यायः तयोः संप्लव एकस्मिन्नीश्वराख्ये विषये प्रवृत्तिः, स एव जलानि भूयोभिः कुतर्कनिबन्धनपङ्का(पापा)पनोदनैः प्रक्षालितेऽपि येषां हृदये न पदमादधासि(ते) शैलसंकाशाः त्वामेवैकं विषयीकृत्य प्रवर्तमानाभिरपि भूयः श्रुतिभिरापादितन्यायैश्च येषां हृदये त्वद्भावनायोग्यामवस्थां प्रापयितुं शक्यते ते तदात्मानः। एतदुक्तं भवति नायं श्रुतिन्याययोर्दोषः, किं तु पुरुषाणामिति। किंत्विति। हे कारुणिक सांसारिकदुःखार्तानुद्दिधीर्षुणा त्वयैवैतत् क्रियतामित्याह—प्रस्तुतेति। प्रस्तुताभ्यां श्रुतिनीतिभ्यां विप्रतीपबुद्धयोऽपि ते नराः। भो कारुणिक। कृपया हेतुभूतया तेषामापत्काल उच्चैरतिशयेन भवच्चित्तकास्त्वयैव भावनीया इति।

461

TR520 न्यायकुसुमाञ्जलिटीका

चतुर्थः परिच्छेदः

Beginning:

ओं सत्त्वेऽपि तस्याप्रमाणत्वादित्यस्यासिद्धिव्युत्पादनं परिच्छेदार्थः। तत्रेश्वरप्रामाण्यस्य तज्ज्ञानप्रमात्वद्वारत्वात् तदाक्षेपेण पूर्वपक्षयति—नन्विति। कथं तल्लक्षणायोगः यथार्थज्ञानस्यैव

प्रमाणत्वादित्यत्राह—अनधिगतार्थगन्तुरिति । तर्हि ईश्वरज्ञानमप्यनधिगतार्थत्वेनैव प्रमाणं भविष्यतीत्यत्राह—न चेति । अ(नधिग)तलक्षणं दूषणपुरःसरं स्वाभिमतलक्षणमभिसंदधानः सिद्धान्तयति—अव्याहतेरिति । अपूर्वदृष्टिरिति भावप्रधानो निर्देशः । अनधिगतपूर्वगन्तृत्वं न प्रमाणलक्षणम् ।

End:

चिराच्चेत इति । निसर्गसुन्दरत्वादेव चिराच्चेतो निमग्नमिति अत्यासक्त्यर्थः । निसर्गसुन्दरत्वमेवोपपा(दयति) चेतः पूर्वमेव तृप्तिप्राप्तौ युक्तायामपि न संतृप्यतीत्यर्थः । तत्प्राप्तिकालातिक्रमात् त्वरितं विधेहि करुणामिति, येन करुणाविधानेन त्वदेकात्मतां त्वदेकपरतामित्यर्थः । संप्रार्थितो यन्नीतिकुसुमाञ्जलिस्तद्वासनाकरो भवतु मा वेति यत् ततः किं तत्र, न काचिच्चिन्तास्तु । सर्वथा तस्य पादपीठसमर्पणमात्रेणैवेति प्रीतो भवत्वित्याह—इत्येष इति . . . . . .

Colophon:

इति श्रीरामदेवमिश्रसूनोर्वरदराजस्य कृतौ न्यायकुसुमाञ्जलिटीकायां पञ्चमः परिच्छेदः ।
समाप्ता चेयं न्यायकुसुमाञ्जलिटीका ।

Scribe adds:

अयं ग्रन्थः विरोधिसंवत्सरे श्रावणमासे दशमदिवसे आदित्यवासरे हस्तनक्षत्रे षष्ठ्यां तिथौ विष्कम्भयोगे भवकरणे इष्टदेवतानमस्कारपूर्वक—

ग्रीष्मऋतौ आषाढमासे कर्कटकसवितरि शुक्लपक्षे तृतीयायां तिथौ भानुवासरे आर्द्रानक्षत्रे प्रीतियोगे पालवकरणे . . . . . आत्रेयेण गोविन्दपुत्रेण ज्योतिःशास्त्रपारंगतवेदविदुषा वेङ्कटनाथानुजेन नैध्रुवगोत्रजश्रीकृष्णविदुषः शिष्येण (ह)ऋषीकेशेन समापितः ।

482

PM1653 **प्रमाणमञ्जरीव्याख्या**

Beginning:

. . . . . तोरपि संभवति । ततस्तत्रातिव्याप्तिनिरासार्थं प्रमाणविरोधेन इत्युक्तम् । बाधितविषय इति कालात्ययापदिष्टसंज्ञा । आत्मा नित्यः सत्त्वे सत्यकारणत्वात् निरवयवद्रव्यत्वाच्चेत्यविरुद्धहेतुसमावेशव्यवच्छेदाय विरुद्धपदम् । अनित्यः शब्दः कार्यत्वात्, नित्यः शब्दो निरवयवत्वादिति विरुद्धहेतुसमावेशव्यवच्छेदाय समबलग्रहणम् ।

End:

. . . निगमयति—तस्मादिति । स्वाभिमते निर्वाणे प्रमाणमाह—तत्रापीति । बाधव्युदासार्थं कदाचित्पदम् । जलादिपरमाणुषु व्यभिचारवारणार्थमनित्यविशेषगुणवत्त्वादित्युक्तम् । पाके पार्थिवपरमाणूनामुक्तसाध्यवत्त्वम् । अथवा क्रमेण सर्वमुक्त्यङ्गीकारादत्यन्तोच्छेद एव पार्थिवाणुविशेष-

गुणानाम्। प्राणिभोगार्थसृष्ट्यनारम्भात् आकाशेऽनैकान्तिकमाशङ्क्याह-नाकाश इति। सपक्षत्वात् न व्यभिचार इत्यर्थः।

इति **प्रमाणमञ्जरीटिप्पणेऽभावपदार्थः।**

Colophon:

प्रमाणमञ्जरीव्याख्या समासेन विनिर्मिता।
संविदारण्यदृष्ट्यर्थमद्वयारण्ययोगिना॥

Scribe adds:

संवत् १५७१ वर्षे आश्विनमासे शुक्लपक्षे सप्तम्यां तिथौ भृगुवासरे . . वास्तव्यः सिद्धपुरस्थानं भार्गवगोत्रः पञ्चप्रवर उदीच्यजातीयः देव सोमनाथसुत वत्सराजेन आत्मनः पठनार्थं परोपकारार्थं च प्रमाणमञ्जरीटिप्पणाख्यो ग्रन्थः लिखितः।

487

71446 **सप्तपदार्थीव्याख्या—पदार्थदीपिका**

Beginning:

. . . . . पाण्डित्यदायिने।
खण्डितारातये तुभ्यं पुण्डरीकामलत्विषे॥
शुद्धस्फटिकसंकाशं चन्द्ररेखावतंसिकाम्।
बिभ्र . . . . . ताम्॥
शिरोमणिमतं कृत्स्नमन्येषां विदुषामपि।
पुनः पुनः समालोच्य शिवादित्यकृतेरियम्॥
पदार्थदीपिका नाम(व्याख्या श्रद्धा) पुरस्सरम्।
नारायणाख्यविदुषा क्रियते विदुषां मुदे॥

प्रारिप्सितपरिसमाप्तिप्रतिबन्धकदुरितनिवर्तकं शिष्टाचारपरिप्राप्त मङ्गलं कृतं शिष्यशिक्षायै श्लोकतो निबध्नाति—हेतव इति। शंभवे नम इत्यन्वयः। शंभवे सुखप्रदाय। सुखशब्दो ह्यत्र लक्षणया सुखदुःखाभावपरः, सुखदुःखाभावयोः पुरुषार्थत्वेन साम्यात्। तथा च दुःखाभावरूपमोक्षप्रदात्रे कृतं तदित्याह—संसारेति। . . . . . .

End:

अन्योन्याश्रयात्। अन्यस्याद्यस्य निर्वक्तुमशक्यत्वात् प्रागभावत्वस्यापि प्रागभावीय . . . .त्तिदेशे घटाभावो नास्तीति प्रतीतेर्घटातिरिक्ताभावविषयत्वे गौरवात्। अनवस्थाप्रसङ्गाच्च। अभावाभावस्य प्रतियोगिरूपत्वं (घटाभाव प्रा)गभावो घट एव। अतिरिक्तकल्पने गौरवात्, माना-

भावाच्च । न चैकत्र भावाभावत्वयोर्विरोधेन अभावस्यैव भाववत् . . . . प्रागभावश्च विरुद्धमिति ध्वंसप्रागभावप्रागभावध्वंसयोर्घटात् भेद इति वाच्यम् । विरोधाभावात् । न चैकघटे . . . . . त्वयोः सत्वे नित्यत्वानित्यत्वयोर्विरोध इति वाच्यम् । प्रागभावध्वंसानित्यत्वे बाधकाभावात् । न चैवं, ध्वंसमात्रस्यानित्यत्वं घ . . . . . घटोन्मज्जनरूपबाधकानित्यत्वं, अभावाभावस्यैव भावत्वात् ।

489

TR527 सप्तपदार्थीटीका

सप्तपदार्थीटीकाप्रारम्भः ।

Beginning:

ग्रन्थारम्भे अभिमतदेवता नमस्क्रियन्त इति शिष्टसमाचारः । अत्र प्रकरणं चिकीर्षुराचार्यः चिकीर्षितस्य प्रकरणस्याविघ्नेन परिसमाप्तिप्रचयपरिपन्थिकल्मषविनिवृत्तिभ्यां शिष्टाचारपरिपालनाय च विशिष्टदेवता(नमस्कार)लक्षणं मङ्गलमाचरन् विषयादि संक्षेपतो दर्शयति—हेतव इत्यादिना श्लोकेन । अस्यायमर्थः । शंभवे नमः । शं सुखं भवति यस्मात् स शंभुः तस्मै शंभवे । शंभवे नम इत्युक्ते तर्हि खगादेः कस्यचित् किंचित् सुखं भवति । तस्मै नमस्कारः कृतः स्यात् नेश्वराय तद्व्यावृत्त्यर्थमुक्तं—गुरवे । खगादेरचेतनत्वात् गुरुत्वं न संभवति । शंभवे गुरवे नम इत्युक्ते माता-पित्रोरतिव्याप्तिः स्यात् तद्व्यावृत्त्यर्थमुक्तं विद्यानां प्रभवे गुरवे नम इति । गुरवे नम इत्युक्ते व्यासादीनां नमस्कारः कृतः स्यात् नेश्वराय, तद्व्यावृत्त्यर्थमुक्तं सर्वपदम् । व्यासादीनां सर्वविद्यानां प्रभुत्वं न संभवति । सर्वविद्यानां प्रभवे शंभवे गुरवे नमः इत्युक्ते भाट्टा एवं कथयन्ति । एवंविधस्य ईश्वरस्य सद्भावे किं प्रमाणम् इति । तत्रानुमानं प्रमाणमाह—जगतां हेतवे । जगन्निमित्तकारणाय । किं तदनुमानं, क्षित्यादिकं पक्षः, सकर्तृकमिति साध्यधर्मः । कस्मात् कार्यत्वात् , यत् यद्यत्कार्यं तत्तत्सकर्तृकं दृष्टम् , यथा घटः । घटः कार्यो भवति सकर्तृकश्च भवति । तथाचेदं क्षित्यादिकं कार्यं, तस्मात् कार्यत्वात् सकर्तृकमेव । अनेनानुमानेन कश्चित् कर्तृविशेषः सिध्यति ।

End:

संबन्धोऽयुतसिद्धिरित्युक्ते अयुतसिद्धावतिव्याप्तिः स्यात् । तद्व्यावृत्त्यर्थमुक्तं विद्यमानयोरिति पदम् । संबन्धोऽयुतसिद्धिरित्युक्ते चक्रचीवरकुलालानां घटेन सह कारणत्वं संबन्धोऽस्ति । ते च पृथक्सिद्धाः । तत्रातिव्याप्तिः स्यात् । तद्व्यावृत्त्यर्थमुक्तं आधाराधेयमिति पदम् । आधाराधेयसंबन्धो अयुतसिद्धिरित्युक्ते कुण्डबदरयोरतिव्याप्तिः स्यात् तदर्थमुक्तमविद्यमानयोरिति पदम् । एकोऽविद्यमानः परो विद्यमान उच्यते तत्रायं संबन्धः । . . . . . अभ्युदयनिःश्रेयसयोः साधनाभिधायकं शास्त्रम् । अभिधायकं शास्त्रमित्युक्ते उन्मत्तशब्देऽतिव्याप्तिः स्यात् । तद्व्यावृत्त्यर्थमुक्तं साधनाभिधायकमिति पदम् । साधनाभिधायकं शास्त्रमित्युक्ते कुठारेऽतिव्याप्तिः स्यात् । तद्व्यावृत्त्यर्थमुक्तं अभ्युदयनिःश्रेयसयोरिति पदम् ।

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते, आयुष्मच्छ्रोतृकाणि भवन्ति। अतोऽन्ते मङ्गलाचरणमाचरति—सप्तद्वीपा धरा यावदिति। यावत् इयं सप्तदीपा धरा विद्यते, यावत् सप्तद्वीपा धरा मेदिन्यादयो विद्यन्ते तावत्कालं इयं सप्तपदार्थी वस्तुप्रकाशिनी अस्तु भूयात्।

Colophon:

इति **सप्तपदार्थीटीका** समाप्ता।

502

PM1491 न्यायसूत्रटीका—न्यायरहस्यम्

. . . . यमिति दिक्। तत्र प्रेक्षावत्प्रवृत्तयेऽभिधेयोद्देशपूर्वकमस्य शास्त्रस्य प्रयोजनमाह—प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।

अत्र प्रमाणानि च प्रमेयं च संशयाश्च प्रयोजने च दृष्टान्तौ च सिद्धान्ताश्चावयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलाश्च जातयश्च निग्रहस्थानानि च तेषामिति द्वन्द्वसमासार्थकथनवाक्यनिर्देशे यथावचनं विग्रहमिति वदता भाष्यकारेणान्ववेदि निर्देशः।

End:

ननु सर्वमेतदुत्पत्तिसिद्धौ स्यात्। सा च न सजातीयविजातीयाभ्यां संभवति, व्यभिचारात्। न च कारणान्तरं विहायान्योऽन्वयव्यभिचारो न दोषाय। व्यतिरेकव्यभिचारस्तु नास्त्येव, पृथिवीत्वजन्यपृथिवीत्वजन्यत्वजन्यजलत्वादिकपालघटत्वादिना हेतुहेतुमद्भावादिति वाच्यम्। नित्ये पृथिव्यादौ मानाभावेनाद्ये पृथिवीत्वादौ व्यभिचारात्। न चोक्तहेतुहेतुमद्भाव एव मानम्। मानाभावेन तस्यैवासिद्धेः। सिद्धे वासिद्धेरित्यसत्योऽयमनुपपन्नः प्रेत्यभाव इत्यत आह—व्यक्ताव्यक्तानां . . . .

720

TR528 अन्यथाख्यातिवादः (गादाधरी)

Beginning:

तत्पदं यथाश्रुतार्थकमेव न तद्विशिष्टज्ञानपरं सहकारियोग्यताया असंसर्गाग्रहरूपतां घटयितुमाह—फलतोऽत्र सहकार्येवेति। तत्संबन्धस्य तत्स्वरूपत्वादिति भावः। स च सहकारी च धर्मज्ञानधर्मिज्ञानयोरसंसर्गाग्रहस्य भेदरूपसंबन्धाभावाग्रहस्य भेदाग्रहपर्यवसितस्य सहकारित्वे युक्तिमाह—ज्ञानयोरिति। प्रवृत्त्यनुत्पत्तेरिति। ज्ञानयोर्भेदग्रहस्यैव तन्मते भ्रमत्वग्रहत्वादिति भावः। स च उक्तोभयरूपो संसर्गाग्रहश्च दोषसहकारादिति। उत्पन्नज्ञान इति परित्यज्य दोषसहकारादित्यस्य

धर्मधर्मिणोरित्यादावनुषङ्ग इति भावः। साहकार्यमाहार्यादिति। अत्र च कल्पे उत्पद्यत इत्यस्य निर्वहतीत्यर्थः। उपोद्धातेनेति। प्रमात्वरूपधर्मिणो अज्ञाने तत्र स्वतोग्राह्यत्वस्य गुणजन्यतावच्छेदकत्वस्य च व्यवस्थापयितुमशक्यतया प्रमात्वनिरूपणस्य प्रकृतोपयोगित्वेनेत्यर्थः। योग्यव्यक्तिवृत्तिजातित्वं प्रत्यक्षयोग्यताया एव नियतम्, न तु तदुपधानस्यापि योग्यवृत्तेरपि शरीरविशेषादिनिष्ठचैत्रत्वादेः संनिकर्षादिविरहेणाप्रत्यक्षत्वसंभवात्। अतो योग्यव्यक्तिवृत्तित्वेन प्रत्यक्षत्व इति मूलस्थप्रत्यक्षपदं तद्योग्यतापरतया व्याचष्टे—प्रत्यक्षयोग्यत्व इति।

P. 119: तथाविधेच्छाविषयतायामपि साध्यसत्त्वेन विषयतायां ज्ञानविशेषणमफलमित्यत आह—ज्ञानेतीति। अत्र अनुमाने प्रसिद्धाया उभयवादिसिद्धायाः बाध इति। रजतनिष्ठायास्तादृशविषयताया एव परमतसिद्धतया तत्रारजतवृत्तित्वादेः साध्यस्य स्वमतेऽप्यभावादिति भावः। अन्या शुक्त्यादिनिष्ठा तादृशरजतत्वप्रकारिका ज्ञानविषयता न प्रसिद्धा। परानभ्युपगतत्वादिति शेषः। तथा चाश्रयासिद्धिरिति भावः।

End:

अस्मन्मते विरुद्धत्वेनार्थग्राहकत्वस्य बाध्यतुल्यत्वात् स्फुटीकरणेन न्यूनत्वमस्वरसबीजम्। स्वमते शङ्खो न पीत इति बुद्धेः शङ्खे पीतभेदाग्रवगाहितया पीतार्थिप्रवृत्तिविरोधितया बाधकत्वं, न तु शङ्खः पीत इत्यादिज्ञानद्वयस्यापीतार्थप्रवृत्तिविरोधित्वं, शङ्खे पीतभेदानवगाहित्वादिति बाध्यबाधकभावेऽपि विनिगमकमाह—मूले तस्मादिति। ननु हानोपादानभिन्नभ्रमस्य स्वत एव प्रवर्तकतया कथं बाध्यत्वमत आह—उपेक्षेति। शब्दप्रयोग इति। शब्दसाधनवाक्यप्रयोगः। बाध्यः प्रतिबध्यः। तस्य प्रतिबध्यतयैव भ्रमस्य बाध्यताव्यवहार इति भावः। अन्यस्य तद्धर्मभानात् प्रत्ययस्य धर्मिणोऽन्यथा तद्धर्मवृत्तित्वप्रकारेण भानं प्रतीत्यापि न निराकर्तुं शक्यमिति प्रतीत्यैवेत्यस्यार्थमाह—दीधितौ प्रतीतिस्वाभाव्यादिति।

Colophon:

इति **गादाधरी** समाप्ता।
इति **प्रामाण्यवादटिप्पणी** समाप्ता।

Scribe adds:

வில்லியம்பாக்கத்திலிருக்கும் திருப்பக்கூழி தாததேசிக தாதாசாரியரால் எழுதி முடிக்கப்பட்டது. திரு தாத தேசிகதாதாசாரியார்.

846

PM1747 **गादाधरीव्याख्या**

Beginning:

यत्संबन्धावच्छिन्नयन्निष्ठप्रकारतेति। अत्रेदं बोध्यम्। एतादृशस्य दुष्टताव्यवहारनियामकत्वे धूमत्ववान् पर्वतो वह्निमान् धूमादित्यत्र दुष्टताव्यवहारो न स्यात्। समवायसंबन्धावच्छिन्न-

प्रतियोगिताकधूमत्वाभावत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रकारताशालिज्ञानत्वेन प्रतिबन्धकत्वात्, तेन स्वरूपसंबन्धेन धूमत्वाभावस्य धूमे असत्त्वात्। तथापि पर्वतावृत्तिधूमत्वमप्याश्रयासिद्धिः। तादृशज्ञानस्य पर्वतनिरूपितसमवायसंबन्धावच्छिन्नप्रतियोगिताकवृत्तित्वाभावनिष्ठस्वरूपसंबन्धावच्छिन्नप्रकारताशालिज्ञानत्वेन प्रतिबन्धकत्वम्। तेन स्वरूपसंबन्धेन पर्वतनिरूपितसमवायसंबन्धावच्छिन्नप्रतियोगिताकवृत्तित्वाभावस्य धूमे सत्त्वान्नानुपपत्तिः। तथापि रूपत्ववान् पर्वतो वह्निमान् तद्रूपादित्यत्र रूपत्वाभाववान् पर्वत आश्रयासिद्धिः। अत्र दुष्टताव्यवहारानुपपत्तिः। स्वरूपसंबन्धावच्छिन्नरूपत्वाभावनिष्ठप्रकारताशालित्वेन प्रतिबन्धकत्वम्, तेन स्वरूपसंबन्धेन रूपत्वाभावस्य रूपे असत्त्वात्।

End:

साध्यधर्मितावच्छेदकतापन्नेति। वह्निमान् पर्वतो घटवानित्यनुमितेः। साध्याबच्छिन्नपक्षविधेयकेति। वह्निमत्पर्वतवानयं देश इत्यनुमितेः। साधनीयत्वादिकं साधनं साध्याभाववद्वृत्तित्वनिरूपितमाधेयत्वं आधेयतासंबन्धेन न वह्नौ आधेयतासंबन्धावच्छिन्न आधेयत्वस्याप्रसिद्धत्वात्। अतः वह्नेः साध्याभाववद्वृत्तित्वमिति ज्ञानमादाय साध्याभाववद्वृत्तित्ववृत्तिवह्नौ नातिव्याप्तिः। उत्तरपदस्य उत्तरकालीनार्थतयेति। धात्वर्थः क्रिया, अत्र अभेदसंबन्धेन उत्तरकालीनस्यान्वयः। तथा च क्रियाविशेषणानां कर्मत्वमिति कर्मत्वम्। कर्मणि द्वितीयेत्यनेन तदुत्तरं द्वितीया 'स्तोकं पचति' इत्यादिवत्।

849

74102(a) गादाधरीव्याख्या (पञ्चलक्षणी)

Beginning:

अनुमानं न प्रमाणं प्रमितिकरणतावच्छेदकधर्मशून्यत्वात् इति चार्वाकाः। अनुमानं प्रमाणं प्रमितिकरणतावच्छेदकधर्मवत्त्वादिति नैयायिकाः। अत्र मध्यस्थः पुरुषः अनुमानं प्रमाणं न वेति विप्रतिपन्नः, तस्यानुमाने प्रामाण्यं कथं सिध्येत्, तत्र प्रामाण्यसिद्ध्यर्थं परोक्तहेतौ स्वरूपासिद्ध्यादिदोषोद्भावनं कर्तव्यम्। प्रकृते चायं हेतुर्दुष्ट इति ज्ञानेऽप्रामाण्यं न सिध्यतीति वक्तव्यम्। अत्र वदन्ति चार्वाकाः। भवदुक्तव्याप्तिप्रकारकनिश्चयत्वरूपहेतुः स्वरूपासिद्धः, व्याप्तिप्रकारकनिश्चयजनकसामग्र्यभावादित्याशङ्कायामुक्तं व्याप्तिग्रहोपायश्चेति। एवं च व्याप्तिप्रकारकनिश्चयजनकसामग्री तिष्ठतीति ज्ञाने जाते हेतौ सद्धेतुत्वज्ञानात् प्रामाण्यमेव सिध्यति। गादाधर्यो नोत्पत्तुमर्हतीति। अत्र भूधातोः स्थित्यर्थकत्वेन न स्थातुमर्हतीत्यर्थः स्यात्। तथा चोत्पन्नस्य क्षणमात्रमपि स्थितेः सत्त्वात् व्याप्तिनिश्चयरूपधर्मिसिद्धौ सर्वत्र व्यभिचारोपपादकग्रन्थासंगतिरिति भावः।

End:

अतः साध्यतावच्छेदककोटौ हेतुपदं, निरुक्तस्थल एव निरुक्तकूटस्य हेतुत्वे स्वरूपासिद्धिः अतो हेतुतावच्छेदककोटौ हेतुपदम्। एवं च तादृशजनकतायामव्यभिचारपदार्थावच्छिन्नपक्षविषयताभिन्नत्वसत्त्वेऽपि तादृशपदार्थावच्छिन्नहेतुविषयतावच्छिन्नत्वाभावासत्त्वेन न बाधः; न वा स्वरूपा-

सिद्धिरिति। न च हेतुपदनिवेशेऽपि वह्न्यभाववदवृत्तिधूमवन्महानसकालीनपर्वतो वह्निमान् धूमादित्यादिस्थलीयानुमितिजनकतायां बाधो दुर्वार एवेति वाच्यम्। अव्यभिचारपदार्थावच्छिन्नहेतुविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताघटित धर्मावच्छिन्नत्वाभावस्यैव साध्यत्वविवक्षणेनादोषात्। न च तथापि पर्वतो वह्निमान् वह्न्यभाववदवृत्तेरित्यादौ हेतुतावच्छेदकपर्यन्तस्य व्याप्तित्वपक्षे हेतुव्यापकवह्निसमानाधिकरणवृत्तिवह्न्यभाववदवृत्तित्वरूपहेतुतावच्छेदकवद्वान् पर्वत इत्याकारक . . . .

850

TR421 गादाधरीव्याख्या—कृष्णमाचार्यकृता (सार्वभौमपरिष्कारः)

Beginning:

नारायणं परं नत्वा गुरून् **गोपालतातयान्**।
सार्वभौमपरिष्कारव्याकृतिं तनवै मुदा ॥

प्रथमतः शिष्याणां सम्यगवबोधाय सार्वभौममतमेतादृशमिति व्याचष्टे—सामानाधिकरण्यस्येत्यादिना। यद्धेतुमदिति। तथा च स्वावयवावच्छेदेन धूमे वह्निसामानाधिकरण्याभावसत्त्वेऽपि न तस्य हेतुतावच्छेदकसंबन्धेन हेतुमदवच्छिन्नत्वमिति भावः। अत्र हेतुतावच्छेदकसंबन्धेन यत्किंचित्पदार्थवदित्युक्तौ संयोगेन जलादिमद्ध्रदावच्छेदेन धूमे वह्निसामानाधिकरण्याभावसत्त्वादव्याप्तिः स्यादिति हेतुपदनिवेशः। तत्पदं साध्यासामानाधिकरण्यपरम्। तादृशाभावपरतयेति। हेतुतावच्छेदकसंबन्धेन यद्धेत्वधिकरणं तदवच्छिन्नसाध्यसामानाधिकरण्याभावपरतयेत्यर्थः।

End:

इत्यादय इति। आदिना हेत्वधिकरणसामान्यावच्छिन्न साध्यवन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नाधेयत्वाभावाधिकरणतावच्छेदकत्वस्य परिग्रहः। हेत्वधिकरणसामान्यावच्छेदकत्वं च तादृशभेदे। एवं च द्रव्यं सत्त्वादित्यत्र सत्तायां तादृशभेदस्य द्रव्यावच्छेदेन सत्त्वेऽपि न तस्य हेत्वधिकरणसामान्यावच्छिन्नत्वं, तत्र गुणस्यानवच्छेदकत्वात्। प्रतियोगितावच्छेदकतावच्छेदकस्य तादृशप्रतियोगितावच्छेदकावच्छिन्नभेदावच्छेदकत्वायोगात्। एवं च द्रव्यं सत्त्वादित्यत्रापि नातिव्याप्तिः। इदं च मूलानुरोधेन। मूलाननुरोधे तु हेत्वधिकरणसामान्यावच्छिन्नसाध्यसामानाधिकरण्यमेव लक्षणम्। द्रव्यं सत्त्वादित्यत्र च सत्तानिष्ठं साध्यसामानाधिकरण्यं न हेत्वधिकरणसामान्यावच्छिन्नं, तत्र गुणस्यावच्छेदकत्वाभावात् इत्येतल्लक्षणे न कोपि दोषलेशः इति सकलमकलङ्कम्।

Colophon:

इति श्रीवत्सवंशपयःपयोधिराकानिशाकरस्य कोटिकन्यकादानं महामहोपाध्यायबिरुदाङ्कितश्रीकृष्णताताचार्यसूनुसत्तर्कवेदान्तवाचस्पतिमिश्र **श्रीगोपालताताचार्य**सकाशादधिगतन्यायनयस्य (रायंपेट्टैनामक) **वेङ्कटेशार्य**तनयस्य वैयाकरणसार्वभौम **चक्रपाण्याचार्य**सकाशादधिगत वैयाकरण-

नयस्य रायम्पेट्टैनामकग्रामाभिजनस्य कृष्णस्य कृतिषु सार्वभौपपरिष्कार गदाधरीयव्याख्यानं समाप्तिमगमत् ।

यदुक्तं गुरुभिः सम्यक् श्रुत्वा तल्लिखितं मया ।
न व्याख्यानान्तरोक्तार्थः संगृहीत इहोदिते ॥

Scribe adds:

जयसंवत्सरकन्यामास एकादशदिने मङ्गलवारे एकादशीतिथौ दिवा घटिकादशान्तरे लिखितमिदम् ।

851

TR890 गादाधरीव्याख्या

Beginning:

तत्फलमिति । अथात्र वह्निमान् धूमादित्यादावेव अव्याप्तिसंभवे आत्मत्वादिसाधकानुधावनं व्यर्थम् । तथा हि—साध्यतावच्छेदकेत्यादिविशेषणाक्रान्तयावदभावान्तर्गतगगनात्मकाभावस्य प्रतियोगिसामानाधिकरण्यविरहात् । न च वृत्तिमत्त्वनिवेशेन प्रतियोगित्वस्य पदार्थान्तरत्वात् गगनाभावाभावत्वे मानाभावादित्यभिप्रायेण वायं ग्रन्थ इति वाच्यम् । तावतापि प्रलयात्मकाभावमादायाव्याप्तेरवारणादिति चेन्न । स्वविशिष्टत्वविशेषणाननुसंधाने तादृशाभावस्य महाकालान्तर्भावेण प्रतियोगिसामानाधिकरण्यसत्वाल्लक्षणसंगतिः । वस्तुतस्तु तादात्म्यसंबन्धेन हेतुकस्थलानुसारेण हेत्वधिकरणेत्यस्य हेतुसंबन्धित्वार्थकतया महाकालस्यापि हेत्वधिकरणत्वसंभवात् तावत्पर्यन्तानुधावनं सफलमिति ध्येयम् ।

केचित्तु साध्यतावच्छेदकसंबन्धघटितकल्पाभिप्रायेण स्थलान्तरानुसरणमित्याहुः । तच्चिन्त्यम् । तद्भूपान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेः । एतद्भूपमात्रसमवेताप्रसिद्धेः । नन्वेतावतापि व्यापकतावच्छेदकप्रतियोगितायां साध्यतावच्छेदकानवच्छिन्नत्वविशेषणदानेनैवाव्याप्तिवारणसंभवे यत्समानाधिकरणत्वविशेषणं व्यर्थमिति चेन्न सत्तावान् जातेरित्यादावात्मवृत्तित्वविशिष्ट सत्तामावमादायाव्याप्तेः । यत्तु यत्सामानाधिकरण्यस्थाने पक्षतावच्छेदकसामानाधिकरण्यं निवेशयन्ति तत्तुच्छम् । द्रव्यम् आत्मा ज्ञानादित्यादौ पक्षतावच्छेदकसमानाधिराणात्मत्वकभावमादायाव्याप्त्यापत्तेः ।

End:

प्रतियोगितावच्छेदकं सामानाधिकरण्येन यत्रावच्छेदकमिति । यत्पदं भेदप्रतियोगितावच्छेदकपरम् । तथा च स्वसमानाधिकरणं यादृशप्रतियोगितावच्छेदकं तदवच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत्त्वम् । स्वमवच्छेदकतेत्यर्थः । सामानाधिकरण्येन प्रतियोगितायामवच्छेदकं यद्यत् तदवच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदस्येत्यर्थः । तद्व्यक्तित्वेन वह्निसामान्याभावमादाय अव्याप्तिवारणं विलक्षणावच्छेदकत्वसूचकसामानाधिकरण्येन यादृशप्रतियोगितावच्छेदकत्वनिवेशेनेति ध्येयम् ।

यद्यदित्यनुपादाने दण्डिमान् दण्डिसंयोगादित्यत्र स्वं दण्डिसामान्याभावप्रतियोगिता। तादृशप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकः हेत्वधिकरणे तद्भूतलाधेयतानवच्छेदकदण्डः। तदवच्छिन्नतत्समानाधिकरणतावच्छेदकताकभेदवत्त्वस्य हेत्वधिकरणे विद्यमानत्वेन तादृशप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं भवतीत्यव्याप्तिवारणाय यादृशप्रतियोगितावच्छेदकताव्यापकतावच्छेदकताकप्रतियोगिताकभेदलाभाय वीप्सादरः।

न च दण्डिमान् दण्डिसंयोगादित्यादावेवाव्याप्तिः कुतो नास्तीति वाच्यम्। तत्र परंपरया दण्डत्वस्य साध्यतावच्छेदकत्वमादाय वारणसंभवात् तद्दण्डिसंयोगहेतुकस्थले चानवच्छेदकसाध्यतावच्छेदकस्य प्रसिद्धत्वात् परंपरासंबन्धेन साध्यतावच्छेदकत्वस्यानादृतत्वात्। वह्नीत्यादेस्तत्प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकतयाव्याप्तिरिति वाच्यम् यत्प्रतियोगितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टं प्रमेयं तत्त्वस्य भेदप्रतियोगिताविशेषणत्वे प्रमेयसाध्यकस्थले लक्षणसंगतिः। असंभव इत्यपि वार्थः।

852

PM1564 गदाधरीयव्याख्या—कृष्णभट्टीया

Beginning:

श्रीकृष्णं मुहुरानम्य **कृष्णो** नारायणानुजः।
गदाधरमतार्थानां **काशिकां** तनुतेऽद्भुताम्॥
राङ्गनाथिः **कृष्णशर्मा** पण्डितेभ्यः कृताञ्जलिः।
याचते भूय आनम्य दृष्यं बुद्ध्वा वचो मम॥

अभिवन्द्येति। मङ्गलं पुरारिसंबन्धि यत्पादाम्भोजयुगं तद्विशेष्यकं यत्स्वोत्कर्षज्ञानं तदनुकूलाञ्जलिकरणादिनानाव्यापारानन्तरकालीनो यः शिरोमण्युच्चारितवाक्यकर्मकविवरणरूपो व्यापारस्तदनुकूलकृतिमान् गदाधर इति बोधः। विवरणं तत्समानार्थकशब्देन तदर्थकथनम्। तथाच तादृशवाक्यतात्पर्यार्थप्रतिपादकत्वं व्यापारे लभ्यते। भूयसां शिष्याणां तादृशवाक्यतात्पर्यार्थबोधाय विवरणं कृतमिति बोध्यम्।

End:

तत्रेत्यादि न पदार्थपूर्वकावतरणं, पदार्थताया निराकरिष्यमाणत्वात्। अनुमानलक्षणकथने व्याप्तीत्याद्यभेदबाधाच्चात आह—तत्रेति। प्रतिज्ञायां प्रतिज्ञानीत इत्यनेनाभिहितायाम्। तथा च प्रतिज्ञाविषयीभूतं यल्लक्षणादि प्रकारकनिरूपणं तत्कर्मीभूतेत्यर्थः। सतीति। न चाव्युत्पत्तिर्देवे पूजनीये स्नायादित्यादौ देवपूजाप्रयोजकत्वस्य स्नानेऽन्वयदर्शनात्। एवं च तादृशनिरूपणीयाभिन्नानुमानविषयकनिरूपणं प्रयोजकं यत्तल्लक्षणाभिधानं तदनुकूलकृतिमान् मणिकार इत्यन्वयबोधः। वस्तुतस्तु सप्तम्यर्थो निरूपणमेव समभि . . . .

857

PM1691 **गादाधरीव्याख्या—कृष्णभट्टीयम्**

Beginning:

सुमुखश्चैकदन्तश्च कपिलो गजकर्णिकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
हरिपादौ नमस्कृत्य **कृष्णो नारायणानुजः** ।
विवृणोत्यध्यक्षटीकां गदाधरपदाश्रयाम् ॥
प्रत्यक्षदीधितिप्रौढिप्रौढे गादाधरे मते ।
प्रचारेच्छा राङ्गनाथेः साहसं क्षम्यतां बुधाः ॥

मूले अथेति । अथात्र प्रमाणतत्त्वं विविच्यत इति योजना । अथ मङ्गलस्य कारणतानिरूपणानन्तरं । अत्र कर्तव्यग्रन्थे । प्रतिपाद्यत्वं सप्तम्यर्थः । तस्य प्रमाणतत्त्वे अन्वयः । यद्वा अधीनत्वं सप्तम्यर्थः, तस्य विविच्यत इत्यत्र धात्वर्थविवेचनघटकबोधेऽन्वयः । मयेत्यध्याहृतस्य गङ्गेशमिश्रेणेत्यर्थः ।

End:

अन्यथाख्यातिव्या(वृ)त्त्युत्पादकसामग्रीत्वं च गुरुमतेऽसिद्धमेवेति भावः । व्यवसायरूपतया स्वीकृत्य ज्ञानग्रहव्यक्तिरित्ययं तज्ज्ञानव्यक्तिपदार्थ इति सूचनाय व्यक्तिपदम् । तथा च न्यायमते अनुव्यवसायसामग्र्याः प्रामाण्यग्राहकत्वेन गुरुमतसिद्धत्वमनपवादमिति भावः । अत्र मिश्रेण समं विवादे आहत्य नैयायिकानामुद्देश्यं सिध्यत्येव, न त्वेतावता त्रिभिर्विवादे तेषामाहत्य तत्सिद्धिरावश्यकी । भट्टेन समं विवादे ज्ञाततालिङ्गकानुमितिसामग्र्याः प्रामाण्यग्राहकत्वस्य . . . .

858

TR530 **गादाधरीव्याख्या कृष्णभट्टीयम्**

Beginning:

सत्प्रतिपक्षकृष्णभट्टीयप्रारम्भः ।

समानेति । समानं बलं यस्य स समानबलः । तत्त्वे सति बोधितसाध्याभावलिङ्गकत्वमित्यर्थकं पर्यवसितार्थमाह—प्रकृतेति । उभयोरबोधकत्वादिति । हेतुप्रतिहेत्वोः साध्यतदभावानुमितिफलोपधायकताश्रयज्ञानकत्वादित्यर्थः । तादृशबलशून्यत्वं चालम्ब्यं व्याप्तिपक्षधर्मतयोरित्येव पाठः । इदानीं

बलपदार्थस्याव्यक्तत्वात् । सपक्षवृत्तित्वं च न साध्यवत्त्वेन निश्चयविषयवृत्तित्वम्, किं तु साध्यसामानाधिकरण्यमेवेत्यतः स्वयं दोषमाह । एतदिति । विरुद्धेति साध्यतदभावेत्युदाहरणं विरुद्धद्वयव्याप्त्यन्यतरस्य एकधर्म्यवृत्तित्व सामानाधिकरण्यादित्यर्थः । एकधर्मिवृत्तित्वे विरुद्धद्वयव्याप्तिसामानाधिकरण्याभावनियामादिति वार्थः ।

End:

अत्र च वह्न्यभाववान् ह्रदो वह्निमानित्याहार्यप्रतिबध्यताया अप्रसिद्धेरव्याप्तिवारणाय उद्देश्यताविधेयतावच्छेदकतातिरिक्तप्रकृतपक्षसाध्यवैशिष्ट्यबोधीयविषयतान्तःपातिप्रकारत्वाभावत्वावच्छिन्नप्रयोज्यताकत्वे सति स्वनिरूपितप्रयोज्यतावच्छेदकावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताश्रयीभूतविषयित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितात्वावच्छिन्ना या प्रयोजकता तत्त्वं यादृशविशिष्टविषयिताकत्वमर्थः । न च काञ्चनमयपर्वतो वह्निमानित्यादौ काञ्चनमयत्वाभावव्याप्यवत्पर्वतरूपाश्रयासिद्ध्युन्नायकेऽतिव्याप्तिः । तद्विषयितायाः काञ्चनमयपर्वतत्वावच्छिन्नविषयितानिरूपितवह्नित्वावच्छिन्न प्रकारताशालिबुद्धित्वव्यापकस्य पर्वतत्वावच्छिन्नविशेष्यतानिरूपितकाञ्चनमयत्वावच्छिन्नप्रकारताशालिबुद्धित्वस्याभावप्रयोजकतया तद्व्याप्यतादृशबुद्धित्वस्याभावप्रयोजकत्वादिति वाच्यम् । उन्नेयविषयितावि शेषणप्रयोजकतायां विशिष्टपक्षादिग्रहत्वाभावत्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकतानवच्छिन्नत्वस्य निवेशात् । एवं चोद्देश्यतेत्यादिरीतिर्हेयैव । प्रकृतपक्षसाध्यवैशिष्ट्यग्रहत्वाभावत्वावच्छिन्नप्रयोज्यताया एव निवेश इति बोध्यम् ।

Colophon:

सत्प्रतिपक्षकृष्णभट्टीयं समाप्तम् ।

878

73976 **गादाधरीव्याख्या**

न्यायरत्नम्—रघुनाथ(पर्वते)कृतम्

Beginning:

नौमि श्रीशार्ङ्गपाणेश्चरणसरसिजे योऽभवद् दुःखमग्ना-
नुद्धर्तुं व्यासमूर्तिस्तदनु शठरिपुर्नाथयोगीशभट्टौ ।
पश्चात् श्रीवृद्धनम्बी रघुवरसहजो मस्करिक्ष्माधरेन्द्रो
वेदान्तार्यः शठारिर्मुनिरथ रघुनाथार्यपाट्टर्यपुत्रौ ॥ १ ॥
त्रैलोक्यार्चितवीरराघवपितुः पादाब्जमाध्वीरसा-
स्वादोन्मेदुरषट्पदायितमना यो बोभवीति प्रसोः ।
जानक्यास्तु कटाक्षदुग्धतटिनीनाथोडुनाथात्मकः
त्रय्यन्तोज्ज्वलपाट्टरार्यगुरुहृत्पङ्केरुहार्कायितः ॥ २ ॥

भक्त्याराध्य गुरुं तदास्यगलितां सिद्धान्तवाणीसुधां
पीत्वा शुद्धहृदा तनोति रघुनाथार्यो बुधानां मुदे ।
भूमूर्धामणिराड् गदाधरसुधीप्रामाण्यवादार्णवं
दुष्प्रापं मितधीमतां लघुतया तर्तुं च टीकातरिम् ॥ ३ ॥
गदाधरसुधीवाचां भावः केनावगम्यते ।
तथापि तद्व्याधारो व्याख्यास्यामि यथामति ॥ ४ ॥

इह खलु प्रत्यक्षचिन्तामणिदीधितिग्रन्थार्थान् प्रकटीचिकीर्षुः गदाधरभट्टाचार्यः निर्विघ्नपरिसमाप्तये आचरितस्यामन्दानन्दसंदोहसंदाय्यमन्दसुन्दरनन्दनाङ्घ्रिवन्दनरूपस्य मङ्गलस्य शिष्यशिक्षायै ग्रन्थतो निबध्नाति—नत्वेति ।

End:

इदं चाभिधेयं, अयं च संबन्ध इति ज्ञानानन्तरं एतद्ग्रन्थप्रतिपाद्यप्रमाणतत्त्वज्ञानं मोक्षसाधनमिति ज्ञानं जायते, ततः सफलत्वज्ञानं, ततः प्रवृत्तिरित्येवं किल तत्सरणिरित्याशयेन शङ्कते—यद्यपीति । मोक्षसाधनत्वरूपख्यापनायाह—विशेष इति । द्वारेति । तथा च एतद्ग्रन्थप्रतिपाद्यप्रमाणतत्त्वज्ञानधर्मिकमोक्षसाधनत्वज्ञानद्वारेत्यर्थः । अतः निरुक्तवैषम्याद्धेतोः प्रदर्शकतेति । प्रवृत्तिसाधकताप्रदर्शकतेत्यर्थः । ननु ग्रन्थश्रवणप्रवृत्तौ, सप्र . . . .

923

PM1581 जागदीशी टिप्पणी

Beginning:

वक्ष्यमाणप्रतियोगिताविशेषणेन तत्तद्ह्रदत्वभावव्यावारणादाह—तत्तद्व्यक्तित्वेति । ननु रूपवान् पृथिवीत्वादित्यादावव्याप्तिवारणाय प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्याग्रे निवेश्यतया तत एव तत्तद्व्यक्तित्वावच्छिन्नाभाववारणसंभवः, तत्तद्व्यक्तित्वस्य स्वरूपसंबन्धेन वर्तमानत्वात् । न च तत्तद्व्यक्तित्वं वह्न्यादिनिष्ठतत्तद्रूपमेवेति वाच्यम् । तथा सत्युत्पत्तिकाले तद्व्यक्तित्वं नास्तीति प्रत्ययापत्तेः । न च तथापि तद्रूपवान् नास्तीति प्रतीतिसिद्धाभावमादायाव्याप्तिरेवेति वाच्यम् । शुद्धसाध्यतावच्छेदकस्थले प्रतियोगितावच्छेदकतायां निरवच्छिन्नत्वस्य वाच्यतया तदभावात् । न च वह्नित्वाश्रयवान् धूमादित्यादावव्याप्तिपरोऽयं ग्रन्थः । तत्र वह्नित्वाश्रायत्वस्य स्वरूपसंबन्धेनैव साध्यतावच्छेदकत्वादिति वाच्यम् । एवं सत्यग्रे महानसीयवह्न्याद्यभावमादायाव्याप्तिताद्वस्थ्यकथनासंगतेरिति । अत्र केचित् ।

End:

अप्रसिद्धेनैवेति । अप्रसिद्धस्य संसर्गतायाः पूर्वं दूषितत्वेऽपि तत्कथनं भ्रमत्वोपपादनायैव । न च विषयतादौ पीतशङ्खत्वावच्छिन्नत्वप्रसिद्धिः । तस्यान्यादृशतयाकिंचित्करत्वादिति सूचनायैवकारः ।

जातिमान्नास्ति पीतशङ्खवान्नास्तीत्यादाववच्छिन्नत्वप्रतियोगितावच्छेदकत्वादिवैचित्र्यं व्युत्पादयति —बहुतरमिति ।

Colophon:

इति पञ्चलक्षणीटिप्पणी संपूर्णा ।

यद्यपि साध्यासामानाधिकरण्यपदस्य समानमधिकरणं यस्य स तथा, तस्य भावः सामानाधिकरण्यं तस्याभावोऽसामानाधिकरण्यं, साध्यस्यासामानाधिकरण्यं इति विग्रहः । तत्र समानपदस्य साध्याधिकरणे लक्षणा, अन्यथाव्ययीभावोत्तरपदार्थेन साकं तत्समासाप्रविष्टपदार्थान्वयस्याव्युत्पन्नतयाधिकरणेन साकं साध्यपदार्थान्वयानुपपत्तेः । साध्यपदं तात्पर्यग्राहकम् । एवं च साध्याधिकरणवृत्तित्वाभावानधिकरणत्वं लक्षणम् । तस्य द्रव्यं सत्त्वादित्यादावतिव्या . . .

924

PM1582 जागदीशीटीका—रत्नमाला

Beginning:

अनुमानप्रामाण्योपपादकतया जिज्ञासितं व्याप्तिग्रहोपायमप्रतिपाद्य व्याप्तिप्रतिपादनमर्थान्तरग्रस्तमित्याशङ्कावारकतया दीधितिकृता समारब्धेत्याद्यभिहितम् । तत्र समारब्धेत्यस्य प्रतिपादनविशेषणत्वं न संभवति उपायस्य वक्ष्यमाणत्वेन बाधात् अत आह—समारब्धमिति । परीक्षणमिति दीधितौ ल्युडन्तपाठमभिप्रेत्य । परीक्ष्येत्यस्यैव वा विवरणम् । परीक्षणं परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम् । कारणीभूतान्तोपादानं उपायप्रतिपादनस्यावश्यकताप्रदर्शनाय । यद्यपि व्याप्तिग्रहोपायश्च वक्ष्यत इत्येतद्ग्रन्थावतरणादेव तल्लाभः, तथापि पूर्वानुसंधानं विनापि शीघ्रोपस्थितये तदादर इत्यपि केचित् । प्रामाण्योपोद्घातेति । प्रामाण्यव्यवस्थित्युपपादकत्वेनेत्यर्थः । तथा च व्याप्तिग्रहोपायप्रतिपादनस्य प्रामाण्योपपादकतया जिज्ञासितत्वेऽपि व्याप्तिनिरूपणं विना उपायप्रतिपादनमशक्यमिति प्रथमं व्याप्तिनिरूपणमिति भावः । अधिकमन्यत्रानुसंधेयम् ।

End:

ननु घटादिपदस्य तात्पर्यग्राहकत्वेऽपि इतरपदार्थान्वितार्थोपस्थापकत्वाभावेन समासानुपपत्तिः । लक्षणास्वीकारोऽप्यन्याय्य इत्यत आह—वस्तुत इति । विशेषान्तरं प्रदर्शयितुं पर्याप्त्युपादानस्य प्रयोजनान्तरं दर्शयति—पीत इति । यद्धर्मविशिष्टेति । वैशिष्ट्यं च वैज्ञानिकम् । अतः पीतत्वविशिष्टशङ्खस्याप्रसिद्धत्वेऽपि न क्षतिः । अप्रसिद्धत्वेनेति । एतेन संसर्गकोटावेव भ्रमत्वमिति सूचितम् । घटपटौ न स्त इत्यत्र द्वित्वं तद्धर्मितावच्छेदकतापन्नं घटत्वं पटत्वं चेति त्रितयं प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणमित्यादिकं बोध्यमित्याशयेन बहुतरमिति ।

Colophon:

इति **रत्नमालायां** भगवदर्पितायां पञ्चलक्षणी ।

926

77469 जागदीशीव्याख्या

Beginning:

.....नुपपत्तिर्मूल इव व्यधिकरणधर्मावच्छिन्नाभावसिद्धिस्तादृशावच्छेदकत्वविषयितासमानाधिकरणधर्मावच्छिन्नाभावस्थल एव यद्यानुभविकी तदा तत्तुल्यव्यधिकरणधर्मावच्छिन्नाभावस्थलेऽपि तादृशावच्छेदकत्वविषयताया निराबाधत्वेन व्यधिकरणधर्मावच्छेदकत्वं दुर्वारमेवेत्याशयः। व्याचक्कुरित्यस्वरसः। तद्बीजं तु घटत्वेन घटो नास्तीति प्रतीत्यनुरोधोनावच्छेदकत्वविषयतायाः तादृशप्रकारतावच्छेदकतापारतन्त्र्यस्य परित्यक्तव्यत्वेऽपि तद्व्याप्यत्वस्य परित्यागाभावात् घटत्वेन घटो नास्तीति प्रतीतेरवच्छेदकताविषयकत्वं दुर्घटमेव। स्वमते तु पारतन्त्र्यस्येव तादृशप्रकारतावच्छेदकताव्याप्यत्वस्यापि घटत्वेन पटो नास्तीति प्रतीत्यनुभविकत्वानुरोधेनैव परित्यक्तव्यत्वात् न दोष इति। अत्र ब्रूमः।

End:

संयोगत्वावच्छिन्नेति वाक्यमग्रिमनिरुक्त्योरपि तद्वारणपरम्। तथाहि-संयोगत्वादित्यादौ संयोगत्वस्य मुख्यावच्छेदकत्वेऽपि संयोगत्वावच्छिन्नाभाववति संयोगत्वविशिष्टस्य वृत्त्या तस्य स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वेन न संयोगत्वमादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वमिति न द्वितीयनिरुक्तावव्याप्तिः। एवं तृतीयनिरुक्तावपि उक्तरीत्या संयोगत्वस्य सा(ध्यता)वच्छेदकीभूतसंयोगत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावेन हेतुसमानाधिकरणसंयोगाभावीयप्रतियोगितायां तदवच्छेद्यत्वसत्त्वेऽपि नाव्याप्तिः। व्यापकतायां प्रतियोगिवैयधिकरण्यस्य प्रयोजनाभावेनानिवेशात्। मौलप्रतियोगिवैयधिकरण्यसार्थक्याय तन्निवेशस्य प्रक्षालनाद्धीति न्यायविषयत्वादिति हृदयम्।

933

PM1585(b) तत्त्वचिन्तामणिदीधितिप्रकाशः

Beginning:

एककार्यानुकूलत्वं, प्रकृते एककार्यानुकूलज्ञाने विषयतयावच्छेदकत्वम्। निरूपयितुमिति। पक्षताया अनिरूपणे पक्षत्वविशिष्टपक्षधर्मत्वस्यानिरूपणादिति। यादृशेति। अत्र निर्णयत्वं पक्षे साध्यप्रकारक(त्वे)सति पक्षसाध्यवैशिष्ट्यावगाहित्वे सति वा साध्ये पक्षनिष्ठात्यन्ताभावप्रतोगित्वाविषयत्वं, न तु साध्याभावाप्रकारकत्वगर्भं, केवलान्वयिन्यप्रसिद्धेः। तादृशनिर्णयनिवर्तनीयस्य पक्षे साध्याभावनिर्णयस्य पक्षतात्वाभावादाह—संशय इति। न च साध्याभावकोटिकसंशयस्य विवक्षितत्वे साध्ये पक्षवृत्तित्वकोटिकसंशयासंग्रहः, पक्षवृत्तित्वकोटिकसंशयस्य विवक्षितत्वे साध्याभावकोटिकसंशयस्यासंग्रह इति वाच्यम्, पक्षसाध्यसंबन्धावगाहिज्ञानस्यैव प्रकृते संशयपदार्थत्वात् वह्निमानिति सिद्धेर्निवृत्त्यन्तदलेनैव वारणादिति। तेनेति।

End:

तत्तद्दिन्धने तत्तद्दाहं प्रति तत्तद्दिन्धने तत्तद्दाहोत्पत्तिकालीनमण्यभावत्वेन हेतुत्वे कारणतावच्छेदकावलीढस्यैव पूर्वसत्त्वं फलोपधाने तन्त्रं, नातस्तद्दाहोत्पत्त्यधिकरणक्षणवृत्तित्वविशिष्टस्य तत्तद्दाहप्राक्कालेऽसत्त्वेऽपि क्षतिः। एवं तद्घटं प्रति तत्कालीनतत्तत्कपालत्वेन हेतुत्वं, सामान्यसामग्री च विशेषसामग्रीसहकारेण कार्योपधायिकेति न विनश्यदवस्थकपाले घटोत्पत्तिरित्यपि कश्चित्। प्रामाकरास्त्विति। क्वचिदिति। यत्रानुमित्युत्पत्तिक्षणेऽपि परामर्शान्तरसामग्री नियता तत्रेत्यर्थः। परामर्शेति। परामर्शप्रवादस्यानुमितिप्रवादस्य। एकानुमितिनाशानन्तरमेवापरानुमितिरित्यत्राह—कालभेदेति। सिद्धेरप्रतिबन्धकत्वे कथं सिद्धसाधनोद्भावनेन परस्य निग्रह इत्यत्राह—अर्थान्तरेति। सिद्धेऽर्थे आकाङ्क्षाविरहात्तदभिधानेऽर्थान्तरमित्यर्थः।

Colophon:

इति **पक्षतारहस्यम्**।

934

PM1585(c) तत्त्वचिन्तामणिदीधितिप्रकाशः

Beginning:

परामर्शत्वापेक्षया एतयोर्बहुपदार्थघटितत्वादिति भावः। कारणताद्वयकल्पनं तथापि दुष्परिहरमेवेत्याह—विनिगमनेति। यद्यपि व्याप्तिप्रकारकपक्षधर्मताधीत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकधीत्वेन वा परामर्शहेतुत्वमित्यत्र विनिगमनाविरहस्तुल्य एव। तथापि गृह्यमाणेत्याद्यनेकपदार्थघटितैकरूपापेक्षया व्याप्यतावच्छेदकप्रकारकधीत्वादिरूपद्वयस्यापि कारणतावच्छेदकत्वे विनिगमनाविरहः। एवमेतयोरपि प्रत्येकं विनिगमनाविरह इति त्वन्मते कारणताचतुष्टयं स्यादिति भावः। तवापि चेति मीमांसकोऽत्र संबोध्यः। तथा च मीमांसकस्यापि द्वयोः कल्प्यत्वे नैयायिकस्यावच्छेदकलाघवमेव विनिगमकमिति भावः। स्वतः स्वमते। अस्मदिति। यत्र देशो धूमवान्, धूमो वह्निव्याप्य इति च ज्ञानं प्रकारान्तरेण वृत्तं, वह्निव्याप्यधूमवान् स देश इति च ज्ञानं न वृत्तं, तत्र स्वमते न व्यभिचारः। परामर्शस्य च व्यभिचारो बोध्यः।

End:

स्वर्गकाम इति। अत्र हि यागाधिकरणकालोत्तरत्ववदव्यावृत्तित्वरूपयागसाध्यत्वं स्वर्गे स्वर्गत्वसामानाधिकरण्येन भासते। तत्र च यजिपदादेव यागलाभः। अधिकरणकालोत्तरत्ववति अन्यवृत्तित्वेऽभावे इष्टे च विधिप्रत्ययस्य शक्तिः। अन्वयबलाच्च यागाधिकरणकालोत्तरत्ववदन्यावृत्तीष्टको याग इति विशिष्टवाक्यार्थधीः। अनन्यथासिद्धत्वं तु प्रवृत्तितात्पर्यकत्वग्रहादुत्तरकालगम्यम्। अत एव साध्येष्टकत्वं विधिप्रत्ययार्थमुज्ञानमेव प्रवर्तकमिति। केचित्तु पूर्ववृत्तित्वमात्रं विधिप्रत्ययार्थः। अनन्यथासिद्धत्वस्येव नियमांशस्यापि उत्तरकालं प्रवृत्तितात्पर्यकत्वग्रहेणैव वैजात्यकल्पनया

कल्पनीयत्वात् । स्वरूपसंबन्धरूपसाधनत्त्वपक्षे तु तदेवेष्टीयत्वेन शक्यं, तस्य च तादृशानन्यथासिद्ध-नियतपूर्ववर्त्तित्वनियतत्वेनोत्तरकालं वैजात्यकल्पनेत्याहुः ।

Colophon:

इति **परामर्शरहस्यम्** ।

935

PM1585(d) तत्त्वचिन्तामणिदीधितिप्रकाशः

Beginning:

परिचायकपदस्य विशेषणपरत्वेऽन्यथासिद्धत्वे हेतुत्वमनुपपन्नम् । उपलक्षणपरत्वे परिचायकत्वाभ्युपगमेन तथा चेत्यादिना लिङ्गस्य हेतुत्वसाधनमनुपपन्नमत आह—परिचेये व्यावर्तकत्वमिति । अत्र परिचेयपदं विषयितया व्यावर्तकत्वसिद्धये । व्यावर्तकत्वमात्रं तु परिचायकपदार्थः । व्यावर्तकं द्विविधम् । उपलक्षणं विशेषणं च । तत्राद्याभिप्रायेण विशेषान्तराभावादिति ग्रन्थं व्याचष्टे—तच्चेत्यादिना । इत्थं च विशेषान्तराभावात् उपलक्ष्यतावच्छेदकाभावादिति मूलार्थः । तत्त्वे परिचेयव्यावर्तकत्वे । ननु यथा दण्डस्य घटजनकतायां दण्डत्वं नोपलक्षणं, उपलक्ष्यतावच्छेदकाभावात् । न विशेषणं, अजनकत्वात् । तथा लिङ्गमपि स्यादित्याशङ्कां निराकरोतीत्याह—अवच्छेदकमात्रेणेति । मात्रपदेन निरुक्तोपलक्षणत्वविशेषणव्युदासः । यथाश्रुतानुमानस्य पर्वतत्वादिजन्यतयाऽर्थान्तरं, विनिगमनविरहेण यावद्विशेषणजन्यत्वसिद्धौ उद्देश्यसिद्धावपि पक्षतावच्छेदकादीनां तज्जनकत्वमनभिमतम् । अन्यथा हेतौ व्यर्थविशेषणता स्याद् अतो यत्तद्घटितव्याप्त्यभिप्रायेण मूलं योजयति—यद्विशेषणेति । तादृशी विशेष्यविषया अशाब्दी । सामान्यव्याप्तौ यत्तद्घटितव्याप्तौ । पक्षधर्मेति ।

End:

लिङ्गविशिष्टपरामर्शस्य कारणत्वग्रहे लिङ्गविशेषणत्वमत एव कारणत्वम् । तस्य लिङ्गस्य इदं बीजम् । विशिष्टस्य लिङ्गविशिष्टपरामर्शस्य । विशेषणतावच्छेदकं प्रकृते लिङ्गत्वम् । तत् कारणत्वम् । साध्यव्याप्यत्वादीत्यादिना पक्षधर्मत्वस्य परिग्रहः । तदप्रसिद्धाविति । वृत्तिनियामकसंबन्धेन साध्यतायां गगनादिसाध्यनिरूपितव्याप्तेर्गुणपक्षके संयोगेन हेतुतायां पक्षधर्मत्वस्याप्रसिद्धावित्यर्थः । तथा सतीति । परामर्शविषयतावच्छेदकमात्रं यद्रूपाव. . . . . .

936

PM1585(e) तत्त्वचिन्तामणिदीधितिप्रकाशः

Beginning:

परिकरो व्याप्तिपक्षधर्मते । तत्प्रसंगात् हेतुनिरूपणप्रसंगात् । अव्यभिचारित्वेन पक्षधर्मत्वादिना च हेतुनिरूपणे व्यभिचारापक्षधर्मत्वादिनाऽहेतोरपि स्मृतत्वादिति भावः ।

तत्त्वनिर्णयादीति । तत्कार्यम् हेतुनिरूपणकार्यम् । स्वीयहेतोः सद्धेतुत्वव्यवस्थापनेनेव परकीयहेतोराभासत्वव्यवस्थापनेनापि तत्त्वनिर्णयवादिजययोः संभवात् । तथा चात्रैककार्यकारित्वमपि संगतिरिति भावः । हेत्वाभासपदेन हेतोराभास इति व्युत्पत्त्या हेतुदोषा उच्यन्ते; हेतुवदाभासन्त इति व्युत्पत्त्या तु दुष्टहेतवः । तत्रोभयस्यापि लक्ष्यत्वे न क्षतिरित्याह—यथाश्रुतमिदमिति । बाधादिस्थले हेतोः प्रतिबन्धकज्ञानविषयतानवच्छेदकत्वादिति भावः । तदभिप्रायेण दोषलक्षणाभिप्रायेण । उपधेयसंकरेऽपीति । दोषात्मकोपाधिविशिष्टो धर्म उपधेयस्तस्य संकरेऽपि अभेदेपि उपाधेर्दोषस्यासंकरात्परस्परं भिन्नत्वादिति तदर्थः ।

End:

असिद्धिविशेष इति । स्वरूपासिद्धिर्व्याप्यत्वासिद्धिर्वेत्यर्थः । तादृशं, वृत्तिमत्त्वग्रहविरोधि । वस्तुतः साध्यतदभाववद्वृत्तित्वग्रहस्य स्वरूपसतो वृत्तिमत्त्वग्रहविरोधित्वाभावाव्याप्यत्वग्रहदशायामेव तथात्वादाह—नो चेदिति । इदमेवेत्येवकारेण निश्चितसाध्यवद्वृत्तित्वादिव्युदासः । द्वितीयस्य साध्यवन्मात्रेत्यादिनोक्तस्य तद्वदन्यावृत्तित्वरूपव्याप्तिगर्भस्य । रीतिरिति । तत्रापि तदुभयव्याप्तिग्रहविरोधिवृत्तिमत्वग्रहाविरोधिरूपवत्त्वमर्थः । तेन सद्धेतुविरुद्धसंकीर्णेऽसाधारणे नाव्याप्तिरिति । उपाध्यायमतमाह—केचित्त्विति । असाधारण्यस्य तत्तत्पुरुषतत्तत्साध्यसाधननियन्त्रितत्वेन यत्साध्यकयद्धेतुकमसाधारण्यमप्रसिद्धं तत्र साधारणेऽव्याप्तिः । न च तत्र तन्न देयमेव ॥ . .

949

PM1593 **भवानन्दीव्याख्या**

Beginning:

भक्तानां त्राणकर्ता विविधभवमहादुःखदैन्यप्रहर्ता
संहर्ता किल्बिषाणां प्रबलदितिसुतप्राणहर्ता[सुगोप्ता] ।
भर्ता पाथोधिजाया नतजनहृदयाकाङ्क्षितानां सुकर्ता
धर्ता सर्वंसहायाः स भवतु भगवान् भव्यकर्ता सदा नः ॥ १ ॥
योऽसौ कर्कशवक्रतर्करचनाचुञ्चान्तरोद्यन्महा-
हुंकारौघनिबर्हणकरसिकः ख्यातो धरामण्डले ।
मीमांसानिपुणोऽक्षपादकणभुक् शास्त्राब्धिपारंगम-
स्तस्य श्रीशितिकण्डदीक्षितगुरोः पादाम्बुजं संश्रये ॥ २ ॥
सिद्धान्तवागीशवचोऽतिगूढं श्रीमन्महादेवबुधेन बुद्ध्वा ।
तदर्थजातं चूर्णविभाव्य युक्त्या व्याख्यायतेऽमत्सरसूरितुष्टयै ॥ ३ ॥
अन्वीक्षासक्तचित्तानां विद्वदर्कविलासिनाम् ।
भवानन्दीप्रकाशोऽयं तनोतु मुदमद्भुताम् ॥ ४ ॥

क्व भवानन्दवाग्गुम्फो मन्दस्य मम धीः क्व च ।
तथापि यत् प्रवृत्तोऽहं तत्र मे शरणं शिवः ॥ ५ ॥
यत्र कैरपि टीकायां विवृता नैव दीधितिः ।
आशयो यत्र न स्पष्टः तस्याप्युट्टङ्कनं त्विह ॥ ६ ॥
अनालोच्य **सिद्धान्तवागीशवाण्यां** वृथासूयितैः पण्डितै**र्गौडजातैः** ।
यदुद्भावितं दूषणाभासवृन्दं तदुद्धारणार्थो ममोद्योग एषः ॥ ७ ॥
स्वीयं यो ग्रन्थमन्यस्य तदीयं चान्यकर्तृकम् ।
वक्ति शीघ्रं तयोर्नाशः तावुभौ जारजातकौ ॥ ८ ॥
गुरुदेवप्रसादेन सम्यग् भावनयागते ।
योऽत्र सार्थेऽन्यथाशङ्की देवानांप्रिय एव सः ॥ ९ ॥
यद्यप्यल्पश्रुतास्तोषमेष्यन्ति न कृतौ मम ।
तथापि न क्षतिस्तुष्टा भविष्यन्त्येव पण्डिताः ॥ १० ॥

प्रारिप्सितनिष्प्रत्यूहसमाप्तिकामनया श्रीगोविन्दचरणानुसंधानरूपं मङ्गलमाचरन्नेव श्रीगोविन्दं स्वाभिलषितं प्रार्थयते—श्रीगोविन्देति । अत्र श्रीसहितगोविन्दस्य यत् पदाम्भोजं श्रीगोविन्दयोर्वा पदाम्भोजमित्यादिविग्रहः । श्रीः लक्ष्मीः । पदाम्भोजेत्यत्रोपमितसमासः ।

End:

यत्तु पापध्वंसस्य प्रायश्चित्तफलत्वं तन्न सम्यक् । तथाहि न तावत् सामान्यतः पापध्वंसत्वं प्रायश्चित्तजन्यतावच्छेदकमतिप्रसंगात् । नापि ब्रह्महत्यादितत्तत्पापध्वंसत्वं तत्तत्प्रायश्चित्तजन्यतावच्छेदकं, तत्तत् प्रायश्चित्तं विनापि प्रकारान्तरेण तत्तत्पापध्वंसेन व्यभिचारात् । किं तु तत्तद्विजातीयपापध्वंसत्वमेव तत्तत्प्रायश्चित्तजन्यतावच्छेदकम् । तत्तद्वैजात्यं च तत्तन्नाश्यवृत्ति नानेति न सांकर्यमपि । एवं च तत्तद्वैजात्यसंदेहे तत्तद्विजातीयपापरूपनिमित्तसंदेहेन बहुवित्तव्ययायाससाध्ये तत्तत्प्रायश्चित्ते प्रवृत्त्यनुपपत्तिः । निमित्तसंदेहस्य प्रवृत्तिप्रतिबन्धकत्वादिति तत्र ब्रह्महत्यादिसामान्यधर्मपुरस्कारेण निमित्तनिश्चयसत्त्वात् । कृष्यादिस्थले सतीष्टसाधनतानिश्चये इष्टवृष्ट्यादिसंदेहेऽपि प्रवृत्त्युदयेन निमित्तसंदेहस्य सहकारिसंदेहतया फलसंदेहपर्यवसन्नतया प्रवृत्तावप्रतिबन्धकत्वाच्च । अत एव वक्ष्यमाणरीत्यापादनसंभवादेव आपाद्ये . . . .

957

TR532.1 तत्त्वचिन्तामणिदीधितिव्याख्या मथुरानाथीया

Beginning:

कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलित्रयम् ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
जगद्गुरोः श्रीरामस्य चरणौ मूर्ध्नि धारयन् ।
तत्सुतो मथुरानाथो दीधितिं स्फुटयत्यथम् ॥

निर्विघ्नं चिकीर्षितग्रन्थसमाप्तिकामनया कृतं भगवन्नमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति—ओं नम इति। परमात्मने नमः। अत्र परत्वमुत्कृष्टत्वं, तच्च सर्वदर्शित्वजगदाराध्यत्वादिकमेव। आत्मपदं तु कृपावदर्थकं। न त्वात्मत्वजातिविशिष्टपरम्। समवायिकारणतावच्छेदकत्वेन सिद्धाया आत्मत्वजातेः भगवदात्मनि मानाभावात्। वस्तुतस्तु लाघवादात्मत्वजातेरेव आत्मपदप्रवृत्तिनिमित्ततया भगवदात्मनि श्रौतात्मव्यवहार एव आत्मत्वे मानम्। न च श्रुतावात्मपदं ज्ञानादिम(त्परमिति) वाच्यं, मुख्ये बाधकाभावेन लक्षणानुपपत्तेः। तथा च आत्मत्वजातिविशिष्टपरमेव प्रकृतात्मपदमिति तत्त्वम्।

कीदृशाय परमात्मने नम इत्यत आह—अखण्डेति। अखण्डौ नित्यौ आनन्दबोधौ यस्येत्यर्थः। आनन्दः सुखं, ईश्वरे स्वयमेव। नित्यसुखव्यवस्थापनादेतदुक्तम्। यद्वा अखण्डो अविच्छिन्नः प्रवाहः आनन्दो यस्मात् एतादृशो बोधो यस्य। षष्ठ्यर्थो विषयत्वम्। केचित्तु आनन्दयति सुखं जनयतीत्यानन्दः। इच्छेत्याहुः। पुनः कीदृशायेत्याह—पूर्णायेति। . . . .

End:

अत एवेति—यावत्त्वोपादानादेवेत्यर्थः। द्वित्वेति। भूतत्वमूर्तत्वोभयत्वावच्छिन्नप्रतियोगिताकाभावस्येत्यर्थः। अतथात्वात्, प्रतियोग्यसमानाधिकरणत्वात्। न च पूर्वं व्यभिचारिमात्रे अतिप्रसंगवारणस्य तदुपादानफलत्वेन कथनात् पुनरत एवेत्यादिना व्यभिचारिविशेषेऽतिव्याप्तिवारणस्य तदुपादानफलत्वकथने संदर्भविरोध इति वाच्यम्। पूर्वमुदासीनाभावमादायातिव्याप्तिनिरासस्य तत्प्रयोजनत्वेन कथनात्। इदानीं तु साध्यतावच्छेदकावच्छिन्नाभावमादायातिव्याप्तिनिरासं कथयतीत्येव विशेषादिति संप्रदायः।

केचित्तु, ननु साध्यतावच्छेदकव्यापकप्रतियोगिताका यावन्तो अभावा इत्येव उच्यताम्। किं साध्यतावच्छेदकावच्छिन्नेत्यादिना। प्रतियोगिसामानाधिकरण्यं च साध्यतावच्छेदकसंबन्धेन वाच्यम्। अतो अयमात्मा कालपरिमाणादित्यादौ नातिव्याप्तिरित्यत आह—अत एवेति। निरुक्ताभाव एव यावत्त्वविशेषणं दत्तं, न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे, अत एवेत्यर्थः। ईदृशाभावस्य यावत्त्वे विवक्षिते उदासीनमनोऽन्यत्वाभावमादायातिव्याप्त्युद्धार इति प्रदर्शनायाह मनोऽन्यत्वेति इत्याहुः। तदसत्। इदं तु तदा संगच्छते यदि साध्यतावच्छेदकेत्याद्यननुगतोऽयं पाठः स्यात् समुदायव्यावृत्तेरनन्तरमेव प्रत्येकव्यावृत्तेरुचितत्वात्। केचित्तु—ननु साध्यतावच्छेदकनिष्ठव्यापकताकप्रतियोगिताकाभावो यद्धर्माविशिष्टाधिकरणावच्छेदेन साध्यतावच्छेदकसंबन्धेन प्रतियोगिसमानाधिकरणस्तद्वत्त्वमेव लक्षणमस्तु किं यावदभावविवक्षया। एवं च लाघवमपि यावत्त्वविवक्षणे . . .।

959

TR532.3 तत्त्वचिन्तामणिदीधितिव्याख्या—मथुरानाथीया

Beginning:

. . . . करण्याभावस्य सत्त्वात्। एवं कालिकसंबन्धेन गगनादेरवृत्तित्वे समवायेन द्रव्यत्वकालपरिमाणादौ साध्ये कालिकसंबन्धेन गोत्वादिहेतावतिव्याप्तिः। तेन संबन्धेन वृत्तिमत्त्वपक्षे तु

वाच्यत्वादिसाध्यके कालिकसंबन्धेन हेतावव्याप्तिः, कालिकसंबन्धेन साध्यवद्वृत्तित्वाभावस्याप्रसिद्धेः। वाच्यत्वादिसाध्यके तादात्म्येन हेतावव्याप्तिश्च तदात्मकाप्रसिद्धेरिति भावः। यदि च साध्यतावच्छेदकसंबन्धेन साध्याधिकरणे येन संबन्धेन वर्तमानत्वं यस्य यस्य हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणे तेनैव संबन्धेनावर्तमानत्वं तस्य तस्येत्युच्यते। यद्वा साध्यसामानाधिकरण्यं साध्यतावच्छेदकसंबन्धेन साध्याधिकरणे विशेषणताविशेषेण वर्तमानत्वम्, हेतुसामानाधिकरण्यं च हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणे विशेषणताविशेषेण वर्तमानत्वं इत्युच्यते, तदा न कोऽपि दोष इत्यवधेयम्। विवक्षिते च मूलोक्तदोषसंगतेराह—यथाश्रुतमिति। यथासंभवमिति। दूषयतीत्यनेनान्वितम्। यत्र वैकल्ये यद् दूषणं घटते तत्र तदेवोच्यत इत्यर्थः। तेन तदधिकरणानधिकरणत्वस्य केवलान्वयिनि प्रसिद्धावपि न क्षतिः। प्रतियोगितावच्छेदकावच्छिन्नमिति।

End:

ननु स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकान्यसाध्यतावच्छेदकेत्यादिलक्षणे नैष दोष इत्यत आह—उपदर्शितेति। स्वेति। स्वेषामन्तत्वादिति भावः। अत एवेति। यत एव घ्राणग्राह्यगुणत्वादेर्गुरुधर्मस्यापि प्रतियोतावच्छेदकत्वमत एवेत्यर्थः। अन्यथा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धया व्यभिचारलक्षणस्य तत्रासंभवादिति भावः।

पल्लवितेनेति ग्रन्थानन्तरं यत्रासद्धेतुविशेषे साध्यतावच्छेदकं तत्प्रतियोगितावच्छेदकं, तत्रै(वातिव्या)तिरुपादेयेत्यपि वदन्तीति क्वचित् पाठः। तत्र। तत्रैवेत्यनन्तरं व्यभिचारलक्षण इति शेषः। इयं रीतिरिति। साध्यतावच्छेदकावैशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नाभावो निवेशनीय इत्यर्थः।

वदन्तीत्यनेनास्वरसः सूचितः। स च गुरोरवच्छेदकत्वं विना घ्राणग्राह्यगुणवान् द्रव्यत्वादित्यादौ साध्यतावच्छेदकावच्छिन्नसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वमेव दुर्वचम्। घ्राणग्राह्यगुणसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य गन्धसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षया गुरुत्वेन तदवच्छिन्नान्योन्याभावाप्रसिद्धेरिति संक्षेपः।

Colophon:

अवच्छेदकतानिरुक्तिः समाप्ता।

Scribe adds:

வில்லியம்பாக்கத்திலிருக்கும் திரு தாததேசிக தாதாசாரியரால் எழுதி முடிக்கப்பட்டது.

966

PM1587 तत्त्वचिन्तामणिदीधितिव्याख्या

Beginning:

उद्देशादिति स्वयं संगतिकथनम्। तल्लक्षणानन्तरमित्यत्र तल्लक्षणा . . . मर्थः। लक्षणा . . . [illegible] तदवयवकत्वं दर्शयितुं तल्लक्षणमाह—पूर्वापरेति। अर्थेक्यादेव

वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति जैमिनिसूत्रम् । तत्रार्थैक्यमात्र उक्ते भगो वां विभजतु पृथ्वी वां विभजतु इत्येतयोरप्येकवाक्यत्वं स्यादित्यत उक्तं—विभागे साकाङ्क्षमिति । तावन्मात्रे कृते स्योनं ते सदनं कृणोमि, घृतस्य धारया सुशेवं कल्पयामि । तस्मिन् त्सीदामृते प्रतितिष्ठ । व्रीहीणामेध सुमनस्यमानः इति मन्त्रार्थयोरेकवाक्यत्वं स्यात् । तस्मिन्नित्यस्य पूर्वसाकाङ्क्षत्वादुक्तमर्थैक्यादिति । तथा चार्थैक्ये सति विभागे साकाङ्क्षत्वमेकवाक्यत्वम् ।

End:

नन्विदमयुक्तं । एवं सति तर्कविरोधिन्या आहार्यशङ्काया निवृत्तये तर्कान्तरानुसरणेऽनवस्थापातादित्यरुचेराह—वयं त्विति । यथाश्रुत इति । उपादानमेव तन्निष्ठशङ्काविरहे लिङ्गमित्यर्थे उपादानपदं यथाश्रुतमेवेत्यर्थः । मैवं शङ्किष्ठाः । एवं शङ्कसे त्वं वञ्च्योऽसि । ग्रह इत्यनन्तरम् इति प्रतिपादिते, पराजय इति शेषः । इत्यादेः । व्यतिरेकमुखेनेति शेषः । शङ्कापिशाची हि प्रतिबन्धकम् । शङ्काविरहोन्नायकत्वादित्यर्थः । अत्र वह्न्यसमवहितानुपादानप्रयोजको वह्न्यसमवहिताजन्यत्वनिश्चयः सहेतुकत्वनिश्चयश्च शङ्काश्रये यथायोग्यं निवर्तक इत्युपाध्यायमतमपि सम्यक् । तत्र हि सहेतुकत्वनिश्चयश्च यस्यानुमित्यात्मक . . .

967

PM1588 तत्त्वचिन्तामणिदीधितिव्याख्या—गूढार्थप्रकाशिनी

Beginning:

प्रसंगात् व्याप्तिग्राहकप्रसंगेन स्मृतायाः सामान्यलक्षणाया अनुपेक्षणीयत्वात् । समानाधिकरणयोरेवेति । अन्यथा धूमव्यायकवह्निसमानाधिकरणवृत्तिधूमत्वं व्याप्तिरिति पक्षे महानसे धूमवह्निसंनिकर्षेणानुभूताया एकस्या व्याप्तेः स्मरणसंभवात् तद्विशिष्टस्य परामर्शसंभवात् न सामान्यलक्षणादर इति भावः । स च पर्वतीयवह्निव्याप्तिग्रहः । सामान्यलक्षणां विना नेति । पर्वतीयवह्निव्याप्तिग्रहश्च न पर्वतीयवह्निग्रहं विना । पर्वतीयवह्निग्रहश्च न वह्नित्वसामान्यलक्षणां विनेति भावः । लक्षणं अनुमितिलक्षणम् । उपोद्घातोऽपीत्यत्रापिना प्रसंगसंगतेः संग्रहः । आहुरित्यनेनास्वरसः सूचितः । तद्बीजं तु सामान्यलक्षणां विनापि अनुमितिलक्षणसंभवान्नोपोद्घातः संभवतीति ।

Colophon:

इति **अवयवदीधितेः गूढार्थप्रकाशिनी** समाप्ता ।

End:

अथ हेत्वाभासाः । प्रबन्धेन ग्रन्थेन, परिकरः व्याप्तिपक्षधर्मते । तत्प्रसंगात् सद्धेतुनिरूपणप्रसंगात् व्याप्तिपक्षधर्मतावत्त्वेन हेतुनिरूपणेऽसद्धेतोरपि स्मृतत्वात्, उपेक्षानर्हत्वाच्चेति भावः । सर्वसाधारणप्रसंगसंगतिमुक्त्वासाधारणसंगतिमाह—तत्त्वनिर्णयादीति । अत्रादिपदात् वादिविजयस्य परिग्रहः । तत्कार्यं हेतुनिरूपणकार्यम् । यथा स्वकीयहेतोः सद्धेतुत्वव्यवस्थापने तत्त्वनिर्णयः वादि-

विजयश्च भवति, तथा परकीयहेतोरसद्धेतुत्वव्यवस्थापनेनापि तत्त्वनिर्णयः वादिविजयश्च भवतीति भावः। तथा च सद्धेतुनिरूपणासद्धेतुनिरूपणयोस्तत्त्वनिर्णयादिरूपैककार्यत्वमपि संगतिः संभवतीति भावः। तदाभासः हेत्वाभासः। अत्र हेत्वाभासपदेन हेतोराभासः हेत्वाभास इति व्युत्पत्त्या हेतुदोषाणां व्यभिचारादीनां लक्षणम्। हेतुबदाभासते इति हेत्वाभास इति व्युत्पत्त्या दुष्टहेतूनां लक्षणम्। तत्रोभयस्यापि लक्षणत्वे क्षतिविरहादित्याह—यथाश्रुतमिति। दुष्टहेतोर्लक्षणत्वे बाधित-हेतावव्याप्तिः, बाधस्थलेऽनुमितिकारणीभूताभावप्रतियोगियथार्थ . . . .

968

TR1206 तत्त्वचिन्तामणिदीधितिप्रकाशव्याख्या—गूढार्थप्रकाशिनी

Beginning:

यत्समानाधिकरणेत्यादि। अत्र यत्समानाधिकरणा इत्यनुक्तौ अयमात्मा ज्ञानादित्यादौ तादृशयावदन्तर्गतस्य आत्मत्वसामान्याभावस्य व्यापकताघटकसमवायेन प्रतियोग्यधिकरणे केनापि संबन्धेनावर्तमानत्वादव्याप्तिः। अतो यत्समानाधिकरणा इत्युक्तम्।

न च समानकालीनत्वादिसंबन्धस्य वृत्त्यनियामकत्वेऽपि तेन संबन्धेन आत्मत्वसामान्याभावस्य प्रतियोग्यधिकरणे संबन्धित्वनिवेशादेवाव्याप्तिवारणं संभवतीति यत्समानाधिकरणा इति व्यर्थमिति वाच्यम्। गगनाभावाभावस्य यावदन्तर्गतस्य समानकालीनत्वादिसंबन्धेन प्रतियोग्यधिकरणसंबन्धित्वेन विनापि व्यधिकरणधर्माविच्छान्नाभावं लक्षणसमन्वयसंभवात् प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुपपत्तेः।

न च समानकालीनत्वं च कालिकसंबन्धेन तदधिकरणे कालिकसंबन्धेन वर्तमानत्वम्। एवं च कालिकसंबन्धेन गगनादेः वृत्तिमत्त्वानुपगमे गगनादेः संबन्धित्वं न संभवति। गगनादेर्वृत्तित्वं कालिकसंबन्धेनाङ्गीकृत्य संबन्धित्वस्वीकारे तु प्रतियोग्यधिकरणवृत्तित्वनिवेशेऽपि गगनाभावाभाव-मादाय लक्षणसमन्वयसंभवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुपपत्तिः तदवस्थैवेति वाच्यम्। स्वविषयकनित्यज्ञानविषयत्वसंबन्धेनापि संबन्धित्वसंभवात्।

End:

न च प्रतियोगिनोऽभावविरहात्मत्वे संयोगसंबन्धावच्छिन्नघटाभावः कपाले नास्तीत्यपि प्रतीतिः प्रमा स्यात्, घटात्मकतादृशघटाभावविरहस्य समवायेनैव कपाले सत्त्वादिति वाच्यम्। कपालस्य समवायेन घटत्वावच्छिन्नवत्त्वेऽपि समवायेन संयोगसंबन्धावच्छिन्नघटाभावाभाववत्त्वाप्रसिद्धयैव तत्प्रतीतेः प्रमात्वासंभवात्। संयोगादिसंबन्धेन घटाभावाभावत्वावच्छिन्नाधिकरणतायाः परमार्थकत्वात् तत्तद्धर्मावच्छिन्नप्रकारेण प्रमात्वस्य तत्तद्धर्मावच्छिन्नविशेष्यकत्वघटितत्वात्। अन्यथा विशिष्ट-सत्तानतिरिक्तसत्तावद्भुणो विशिष्टसत्तावानिति प्रतीतेः प्रमात्वापत्तेरिति ध्येयम्। केवलान्वयिग्रन्थे जगदीशलेखनस्वारस्यात् यथा संयोगसंबन्धावच्छिन्नप्रतियोगिताकघटाभावत्वरूपानुयोगिताका-भावत्वरूपानुयोगितावविशेषणताविशेषसंबन्धावच्छिन्नाधेयतावच्छेदिकका एवं सिद्धान्तनिरुक्तदैशिक-

विशेषणतया वृत्तित्वनिवेशे घटत्वाभावस्य कालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य दैशिक-विशेषणतासंबन्धेन साध्यतायाम् आकाशत्वादिरूपहेतावतिव्याप्तिः, घटत्वाभावरूपसाध्याभावस्य काले दैशिकविशेषणतासंबन्धेन वर्तमानतया तत्प्रति . . .

969

69494(a) **तत्त्वचिन्तामणिदीधितिप्रकाशव्याख्या—गूढार्थप्रकाशिनी**

Beginning:

. . . प्रतियोग्यवृत्तिश्चेत्यस्यावतारिकामाह—नन्विति । पारिभाषिकमेवेति । अर्थविशेष शास्त्रकारसंकेतितमेव . . . . . व्यभिचारित्वम् । अव्यभिचारित्वपदं तमेवार्थविशेषमाह—तथा हीति । यत्समानाधिकरणा इति । यत्पदं हेतुपरम् । सा . . . . . त्र यदभावप्रतियोगि । एतादृशा यावन्तोऽभावा इत्यर्थः । वह्निमान् धूमादिदं वाच्यं ज्ञेयत्वादित्यादौ घटत्वादिना वह्नि . . . . . वह्नेरित्यादौ च धूमत्वादिना धूमादेः धूमप्रकारकप्रमाविशेष्यत्वत्वादिना धूमप्रकारकप्रमाविशेष्यत्वादेः अ . . . . . देश्चाभावस्य यावदन्तर्गतस्य प्रतियोग्यसमानाधिकरणत्वान्न लक्षणसमन्वय इति भावः । सर्वत्रेति व्यभिचार . . . . . त्वादेर्व्यधिकरणधर्मावच्छिन्नाभावस्य तथात्वात् प्रतियोगिसमानाधिकरणत्वात् । तथा चातिव्याप्तिरिति ।

End:

न चैवं व्यापकत्वं प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं च द्वयमेव साध्यतावच्छेदकसंबन्धेनाभिधीयतां, किं स्थलत्रयेऽप्येकसंबन्धप्रवेशेनेति वाच्यम् । तथा सति प्रतियोग्यवृत्तिधर्मस्य प्रतियोगितावच्छेदकत्वाभावेऽपि व्यधिकरणसंबन्धावच्छिन्नाभावं साध्यभेदं चादायैतल्लक्षणोपपत्तेरवतरणिकत्वासंगतेः, यथासंनिवेशे च वैयर्थ्याभावात् इत्याहुः । तदसत् । स्थलत्रये संबन्धप्रवेशे गौरवादिति । नन्वत्रापि धूमवान् वह्नेरित्यादावतिव्याप्तिः, धूमत्वेन धूमाभावस्यापि वह्नित्वेन धूमवद्वृत्ति किमपि नास्तीत्यादिप्रतीतिसिद्धाभावाभिन्नतया स्वविशिष्टहेत्वधिकरणावच्छेदेन वह्नित्वरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वात् । न च पर्वते वह्निकाले धूमस्य प्रागभावदशायां धूमो नास्तीति प्रतीतिर्वर्तते । तदानीं च वह्नित्वेन धूमवद्वृत्तित्वसत्त्वात् तदभावस्य धूमाभावान्न्यूनवृत्तित्वात् कथमभेद इति वाच्यम् । वह्नित्वेन धूमकालीनत्वविशिष्टधूमवद्वृत्त्यभावं वह्नित्वेन धूमविशिष्टस्याभावं वादाय तथापि वह्नित्वेन धूमवद्वृत्त्यभावस्य तद्दोषतादवस्थ्यात् । न च तथापि धूमप्रकारकप्रमाविशेष्यकायोगोलकान्यत्वाद्यभावस्यातथात्वान्नातिव्याप्तिरिति वाच्यम् । धूमप्रकारकप्रमाविशेष्यत्वाभावस्य धूमवत्सामान्यभेदधूमप्रकारकप्रमाविशेष्यत्वान्यतरत्वरूपेण धूमप्रकारकप्रमाविशेष्यवृत्ति किमपि नास्तीति प्रतीतिसिद्धाभावभिन्नतयायोगोलकान्यत्वाभाव . . . .

970

69494(e) **तत्त्वचिन्तामणिदीधितिप्रकाशव्याख्या—गूढार्थप्रकाशिनी**

Beginning:

अखण्डानन्दबोधाय पूर्णाय परमात्मने ।

अस्यार्थः—ब्रह्मविष्णुरुद्रवाचकानां (अकारो ब्रह्मविष्वीशकमठेष्वंकणेर . . . . . हरे हरौ। मः शंभौ धातरीन्दौ ना चन्द्रे मासे च माः पुमान् ॥) अकारोकारमकाराणां समासे . . . पे ओमिति रूपम्। विशेषणं चेदम्। तेन चोपस्थापिताः ब्रह्मविष्णुरुद्राः परमात्मपदार्थे सामानाधिकरण्यलभ्येनाभेदेन संबन्धेन . . .। अत्र जगत्पालनादिकर्तृत्वं नाकारादिपदवाच्यतावच्छेदकम्। परमपदार्थभूतोत्कर्षस्यापि तद्रूपतया उद्देश्यतावच्छेदकविधेय . . . ण्डवानित्यादाविव शाब्दबोधासंभवात्। किं तु विग्रहविशेषाणां जातिविशेषावच्छिन्नानां स्वनिष्ठचेष्टानुकूलयत्न . . . न प्रवृत्तिनिमित्तत्वम्। न च पदार्थस्य परमात्मन एकत्वात् अकारादिपदत्रयस्य न द्वन्द्वः संभवति। कर्मधारयस्तु न शङ्क्यम्। ब्र . . . . . रमात्मविशेषणत्वेऽपि परस्परविशेषणत्वाभावात् 'विशेषणं विशेष्येण बहुलम्' इति सूत्रेण विशेष . . . ष्टत्वादिति वाच्यम्। नीलपटयोरभेद इत्यादौ पदार्थतावच्छेदकयोः नीलत्वपटत्वयोः भेदेने . . . . . नारायणादिशरीराणां भेदेन द्वन्द्वस्य साधुतोपपत्तेः।

End:

अन्तस्तद्धर्मोपदेशात्। सर्वत्र प्रसिद्धोपदेशात्। इत्याद्यधिकर . . . तत् साम सर्वकर्मा सर्वकाम इत्यादि श्रुत्युक्तसर्वात्मकत्वस्य सर्वोपादानत्वप्रयुक्तस्य जीवव्यावृत्तब्रह्मलिङ्गता अथ क्ष . . । शवलमीश्वररूपमेव ब्रह्मोपादानम्। अन्यथा समानन्यायत्वेन ब्रह्मपरत्वनिर्णायकतत्तदधिकरणोदाहरणवाक्यविशेषाणा . . . नामपि सर्वात्मत्वबोधकानां लक्षणया तात्पर्येण प्रतिपाद्यम्। जीवेश्वरानुस्यूतं शुद्धचैतन्यमेव व्या . . . नफलं न सिध्येदिति। **विवरणानुसारिणां** मते तु न काप्यनुपपत्तिः। न च निर्गुणस्य ज्ञेयत्वमेव नोपास्यत्वमिति उपासीतेत्युपासनायाःश्रवणात् अभ्युपगतत्वाच्च। अन्ततो निदिध्यासनावश्यंभावाच्च। ननु श्रोतव्यो मन्तव्यो . . . . . .

971

69896(b) तत्त्वचिन्तामणिदीधितिप्रकाशव्याख्या—गूढार्थप्रकाशिनी

Beginning:

मूले अनुमानस्य प्रामाण्यं नास्तीत्याशङ्कमानान् प्रति सिद्धान्तिभिः अनुमानं प्रमाणं प्रमितिकरणतावच्छेदकरूपशून्यत्वादिति साधितम्, तदुपरि पूर्वपक्षिभिरनुमानात्मकपक्षस्यैवाभावेन प्रामाण्यं साधयितुं न शक्यत इत्याक्षिप्तम्। अत उपाध्यन्तेन ग्रन्थेन व्याप्तिनिरूपणं कृतम्। तथापि पक्षधर्मताज्ञानाभावे व्याप्तिविशिष्टपक्षधर्मताज्ञानात्मकपक्षसिद्धिः न संभवतीति मनसिकृत्य पक्षधर्मतानिरूपणं क्रियते—व्याप्तीत्यनेन। व्याप्तिनिरूपणानन्तरं पक्षधर्मतानिरूपणे संगत्यप्रदर्शनेन मूलस्य न्यूनतां परिहरन् तादृशग्रन्थमवतारयति—अनुमितीति। अनुमितिलक्षणं तत्स्वरूपं यत् एकं कार्यं तत्प्रयोजकत्वसंगत्या। अनुमितिं प्रति व्याप्तिज्ञानस्य कारणत्वेन व्याप्तेः प्रयोजकत्वं पक्षधर्मताज्ञानस्य कारणत्वेन पक्षधर्मतायाः प्रयोजकत्वम्। तथा च व्याप्तिनिरूपणनिरूपिता संगतिः पक्षधर्मतानिरूपणे प्रदर्शिता भवति।

End:

इदानीं स्वक्षणे तद्विशेषणस्य पूर्वोक्तप्रयोजनं न निर्वहति, पूर्वोक्तस्थले स्वपदेन सिद्धेरुपादाने स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिध्यभावरूपपक्षतायाः तत्र सत्त्वात् व्यर्थमिति चेत्, स्वक्षणे तन्निवेशनीयमेव, तथापि स्वोत्तरक्षणे निवेशनीयम्, अन्यथा तत्रैव प्रथमक्षणे पक्षतावारणाय उत्तरक्षणे तन्निवेशनीयम्। सिद्धौ तद्विशेषणं तु द्वितीयक्षणे पक्षतानुपपत्तिवारणायेति बोध्यम्। पूर्वोक्तस्थले द्वितीयक्षणे अनुमित्यापत्तिवारणं प्रकारान्तरेण संभवति। कथमिति चेत्, अनुमितिं प्रति इच्छाजनकसामग्र्याः प्रतिबन्धकत्वात् तदभावरूपकारणाभावादेव अनुमितिवारणसंभवात्।

972

70645 तत्त्वचिन्तामणिदीधितिप्रकाशव्याख्या—गूढार्थप्रकाशिनी

Beginning:

. . . नञ्व्यत्यास इत्यत्र व्यत्यासश्चात्र स्थितस्य पदस्यान्यत्रानुसंधानम्। एवं च प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीति मूले यत्पदोत्तरनञ् प्रतियोगितापदोत्तरमनुसंधेय इति भावः। अथ नञ्व्यत्यासेऽपि महानसीयवह्न्याद्यभावप्रतियोगितावच्छेदकत्वस्य वह्नित्वादौ वृत्तित्वेनाव्याप्तिरस्त्येवेति चेत्। न। पर्याप्तिसंबन्धेन प्रतियोगितावच्छेदकत्वावच्छिन्नभेदरूपस्य प्रतियोगितानवच्छेदकत्वस्य विवक्षणात् प्रतियोगितानवच्छेदकावच्छिन्नेनेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो धर्मः तद्धर्मावच्छिन्नेनेत्युक्तौ बीजमित्याह—वह्निमानित्यादि। संयोगेन साध्यतायां दोषमुक्त्वा समवायेन साध्यतायां तमाह—पृथिवीति। वस्तुतस्तु—

Colophon:

इति सामान्यलक्षणाग्रन्थः।

End:

उपाधिज्ञानादितिमूलस्य मिश्रोक्तमुपोद्घातपरत्वं विहाय दीधितिकृत्संमतं प्रसंगपरत्वमुपपादयति—मूले इत्यादिना। इतीति। एवंरूपेत्यर्थः। योजनायामिति। अयमाशयः—उपाधिज्ञानादिति। मूले नोपोद्घातसंगतिः प्रदर्श्यते। तथाहि—मूले तादृशयोजनया व्यभिचारज्ञानविषयोपाधिज्ञापकत्वलाभेनोपाधेर्व्यभिचारव्यापकता अर्थाल्लभ्यते, तद्व्यापकतां विना तज्ज्ञानज्ञाप्यत्वानुपपत्तेः। तथा सत्युपाध्यभावस्य व्यापकाभावविधया व्यभिचाराभावे ज्ञापकत्वलाभादुपाधेश्च प्रतियोगितया तदभावज्ञानजनकज्ञानविषयतायाश्च स्वत एव लाभेन प्रकृतस्य व्यभिचाराभावरूपव्याप्तिज्ञानस्य प्रयोजकज्ञानविषयत्वरूपोपपादकत्वमुपाधेर्लभ्यत इति मूलस्योपोद्घातसंगतिप्रदर्शकत्वम्। अत एव अन्यथा योजना, यथाश्रुतयोजनायामुक्तरीत्योपोद्घातलाभस्यासंभवादिति प्रामाणिकं गौरवं न दोषायेत्यत आह—नञ्व्यत्यासीति। अङ्कत्वादिति।

973

70728(a) **तत्त्वचिन्तामणिदीधीतिप्रकाशव्याख्या—भावबोधिनी**

Beginning:

व्याप्तिनिरूपणे सति तज्ज्ञानात् तद्घटितानुमितिलक्षणं संभवतीति प्रकृतघटकत्वरूपोपोद्घात-संगत्यानुमितिनिरूपणानन्तरं व्याप्तिर्निरूप्यते । तत्र नाव्यभिचरितत्वं व्याप्तिः । तस्य दुर्वचत्वात् । अत्र केचित् साध्याभाववदवृत्तित्वं तत्, वह्निमान् धूमादित्यादौ तु वह्न्यभाववति जलह्रदादौ धूमस्यावर्तमानत्वाल्लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ तु धूमाभाववति अयोगोलके वह्नेर्विद्यमान-त्वान्नातिव्याप्तिः । न चायोगोलकस्येव जलह्रदस्यापि धूमाभाववत्तया तत्र वह्नेरवर्तमानत्वेनाति-व्याप्तिवारणसंभव इति वाच्यम् । साध्यामाववन्निरूपितवृत्तित्वसामान्याभावस्य लक्षणे निवेशात् । धूमवान् वह्नेरित्यादौ तु तथाविधसामान्याभावासत्वादतिव्याप्तिविरहात् . . .

End:

न च साध्यत्वसाधनत्वयोरैक्याभावेन साध्यसाधनभेदेनानुमितिपरामर्शयोः कार्यकारणभाव-भेदावश्यकत्वे गौरवानवकाशः प्रत्युत लाघवमेव । व्यतिरेकिसाध्यकानुमितिं प्रति तथाविधगुरुरूपेण हेतुत्वकल्पनेनेति वाच्यम् । व्यतिरेकिसाध्यके केवलान्वयित्वभ्रमदशायां अनुमित्युत्पत्त्यर्थं तत्रा-प्युपदर्शितकेवलान्वयित्वविशिष्टसाध्यसामानाधिकरण्यप्रकारकज्ञानहेतुत्वे कल्पनीये वृत्तिमत्त्व(व)घंशे साधनपदादिकं निवेश्यैव कार्यकारणभावादिकल्पनात् व्यतिरेकिसाध्यकस्थले कार्यकारणभावद्वय-कल्पनापेक्षया तथाविधैककार्यकारणभावकल्पने लाघवादिति दिक् । अधिकं तु **केवलान्वयिग्रन्थे** अनुसंधेयम् ।

Colophon:

इति श्रीमहोपाध्यायभट्टाचार्यविरचितायां **निरुक्तिप्रकाशिकायां दीधितिभावावबोधिन्यां** व्याप्तिवादे पूर्वपक्षरहस्यं संपूर्णम् ।

अत्रोच्यते-प्रतियोग्यसमानाधिकरणयद्रूपावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकं य-द्रूपं तद्रूपावच्छिन्नेन सह तद्रूपावच्छिन्नस्य व्याप्तिः ।

974

TR535.1 **तत्त्वचिन्तामणिप्रकाशः—तर्कवार्त्तिकम्**

Beginning:

अशेषभूमीभृदलङ्घिताज्ञो राज्ञोऽन्ववायोऽजनि वैरिजिष्णुः ।
अलंकरिष्णुः किल साल्वेन्द्रकुलं गुणी कुण्ड इति क्षितीन्द्रः ॥ १ ॥
तदात्मजः क्ष्माधिपराजराजिचूडामणीभूतपदारविन्दः ।

. . . . . प्रशास्ति साक्षाद्बलिजिन्नृसिंहः ॥ २ ॥
आपूरयन्नेव विपक्षनारीवक्षःस्थलीरस्रजलैरजस्रम् ।
उदारयद्बाहुयुगान्तनिर्यत्पराक्रमाग्निर्बहु दंदहीति ॥ ३ ॥
श्लाघ्यान्वयां क्षोणिपतीन्द्रपुत्रीं तिम्मांबिकामाहितलक्षणां सः ।
पुलोमकन्यामिव पूर्णचन्द्रमुखीं वृषेवोद्वहति स्म योग्याम् ॥ ४ ॥
Page 5. अप्राप्तपूर्वं पृथिवीपतीन्द्रः प्राप्तुं यशः प्रार्थ्यं जनार्दनं सः ।
श्रीतिम्मभूभृद् विदुषां हितैषी चिन्तांमणेरातनुते प्रकाशम् ॥ १४ ॥

निर्विघ्नं प्रारिप्सितपरिसमाप्तिकामनया कृतं पुरश्चिद्रूपेष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थादावुपनिबध्नाति—गुणातीतोऽपीति ।

975

TR535.2 तत्त्वचिन्तामणिप्रकाशः—तर्कवार्त्तिकम्

Beginning:

अथ अनुपलब्ध्यप्रामाण्यवादः ।

प्राङ्नास्तितायाम् इन्द्रियव्यापारामावेऽपि योग्यानुपलब्धेः अभावग्रहात् अन्यत्रापि सैव तद्ग्राहिका, न इन्द्रियम् इति शङ्कते—नन्विति । नियामकमाह—तदुपलम्भ इति । तदुपलम्भे प्रतियोग्युपलम्भे तदभावाग्रहादित्यर्थः । एवं च सत्यपि इन्द्रियसंनिकर्षे योग्यानुपलब्ध्या विना न अभावग्रह इति, सैव हेतुः न इन्द्रियमिति भावः । तर्हि भावबुद्धिरपि अभावानुपलब्ध्यैव अस्तु अभावोपलम्भे भावाग्रहात् इत्यत आह—न चैवमिति । इन्द्रियानुविधानादिति । न च अभावग्रहेऽपि तदनुविधानमविशिष्टं प्राङ्नास्तितायां व्यभिचारादिति भावः ।

ननु भावग्रहेऽपि इन्द्रियानुविधानमवर्जनीयसंनिधिकमित्यत आह—अन्यथेति । घटधीप्रसंग इति । न चेष्टापत्तिः । अनुभवविरोधादिति भावः । अत एवेत्यस्य अर्थमाह—इन्द्रियेणेति । अन्यथासिद्धिं स्पष्टयति—न हीति । इन्द्रियानुविधानस्याभावग्रहेऽपि अविशेषात् तत्रापि तद्धेतुरिति शङ्कते—अभावग्रहेऽपीति । अन्यथासिद्ध्या परिहरति—नेति । प्राग्भावेनेति । संयोगसमवाययोः भावमात्रधर्मत्वादिति भावः । अधिकरणग्रहस्य इन्द्रियव्यापारत्वेन न तेन तदन्यथासिद्धिः, अन्यथा अतिप्रसंगादिति शङ्कते—अथेति ।

End:

ननु अस्त्वेवं ततः किमित्यत आह—एवं चेति । अयथार्थैवेति । अतो न प्रमेति शेषः । ननु पूर्वं स्मृतिविषयस्य वर्तमानत्ववैशिष्ट्यात् कथं सा अयथार्थेत्यत आह—न चेति । यथार्थत्वप्रसंगादिति । न चेष्टापत्तिः । अपसिद्धान्तादिति भावः । प्रमुष्टतत्तांशा स्मृतिः नायथार्था, किं तु यथार्थैवेत्याह—प्रमुष्टेति । न भासत इति । अन्यथा तत्तोल्लेखापत्तेरिति भावः । अत्र वृद्धसंमति-

माह—तदाहुरिति। अयाथार्थ्यमपि कुत इति। किंतु याथार्थ्यमेवेत्यर्थः। कथं तर्हि सा न प्रमेति चेत् न। अनुभवप्रामाण्यपरतन्त्रप्रामाण्यत्वात्, तत्र अप्रमाव्यवहार इति सर्वसिद्धेः। अतो न किंचिदनुपपन्नमिति भावः।

. . . स्मृतिवदप्रामाण्यं क्वापि यस्य न।
कृतिः कृतिमुदे तस्य स्तादेषा तिम्मभूभुजः॥

इति श्रीमन्महामण्डलेश्वरवीरवेश्याभुजंगसाळुवनरसिंहरायनन्दन **श्रीतिम्मभूपालीये** श्रीतत्त्वचिन्तामणिप्रकाशे तीरभुक्तिदेशीयालयग्रामीणमहामहोपाध्याय **श्रीजनार्दन** कृतौ **सविकल्पकवादः** प्रत्यक्षखण्डः समाप्तः

983

TR536 तत्त्वचिन्तामणिप्रकाशव्याख्या—तर्कचूडामणिः

Beginning is same as in MD 4102.

End:

एतदपेक्षयेति। विपक्षबाधकतर्कमाह—अत एवेति। एतया निषादस्थपतिं याजयेदिति श्रूयते। तत्र निषादानां स्थपतिरिति षष्ठीसमासकल्पने संबन्धलक्षणागौरवप्रसंगेन कर्मधारय एव कल्प्यते। तत्कल्पनानन्तरं शूद्रस्य विद्याप्रसक्तिरपि कल्प्यते। फलमुखगौरवस्यादोषत्वादिति परस्यापि सिद्धान्त इत्यर्थः। एतच्चोपलक्षणं तत्र गौरवस्य दोषत्वे सुखत्वावच्छेदेन तद्धेतुत्वं तदा स्वस्य शरीरादिकल्पनापत्तिरिति तर्कगौरवस्य प्रतिबन्धकतया सुखविशेषण एव शरीरहेतुत्वकल्पनापत्तेरिति द्रष्टव्यम्। ननु व्याप्यत्वनियमधर्मप्रकारकज्ञानत्वमाह— . . . . यत्र साधारणमवच्छेदकं स्वस्यापि स्वव्याप्यत्वादित्यत आह—एतेनेति। नन्विति सामान्ये . . . . . विशेषणमादाय कार्यकारणभावग्रहः। अन्यथा संयोगसमवायि कारणतावच्छेदकं स्यात्, न तु द्रव्यत्वमिति भावः। नन्विति। तस्योपाधितया गुरुत्वादिति भावः। ननु यत्र सामा . . . . . यास्तुल्यशरीरता तत्रैव सामान्ये तद्ग्रहः। अत्र विशेष्यस्य लघुशरीरत्वात् तदवच्छेदेनैव तद्ग्रह इत्यत आह—अत एवेति।

985

71728 तत्त्वचिन्तामणिप्रकाशव्याख्या—तर्कचूडामणिः

Beginning:

(Fol. No. 2) . . . न तु स्वपदान्तर्भाव इत्यत आह—तत्रेति। उभयोरपि सर्वनामतया प्रकृतप . . . . विशेषादिति भावः। अभावाप्रसिद्धिर्द्वेधा प्रतियोग्यप्रसिद्धया तस्याप्रसिद्धया वा। नाद्य इत्यत आह—न हीति। द्वितीयं दूषयति—न चेति। तत्रेति विपक्ष इत्यर्थः। अन्यत्र योग्यशब्द इत्यर्थः। तथा अयोग्यस्थलीयप्रतियोग्यप्रसिद्धयेत्यर्थः। अभावप्रतियोगिसमर्पकसर्व . . . . न

प्रकृतपरत्वं, किं तु योग्यमिति भावः। तत्र संगतिमाह—अत एवेति। ननु स्वरूपायोग्ये घटः कर्मत्वमित्यादावतिव्याप्तिः। तस्यापि स्वशक्त्यनिरूपितसंसर्गात्मकस्वार्थगोचर . . . . नमन्यत्वादित्यत आह—अपार्थत्वं चेति।

ननु पुरुषविशेषं प्रति घटः कर्मत्वमित्यादेः संसर्गबोधकताया वक्ष्यमाणत्वाद् दोषतादवस्थ्यमित्यत आह—स्वरूपयोग्यस्येति। ननु प्रमा . . . व्यवह्रियमाणस्य कुतो लक्ष्यत्वमित्यत आह—प्रमाणेति। न व्यवहारार्थमिदं लक्षणं किं तु व्यावृत्त्यर्थमिति भावः। **जयदेव**मतमाह—काकाक्षीति। अयोग्येऽपीति। तस्यापि वा . . . . . आचारभ्रमजनकत्वादिति भावः। पूर्वेति। सार्थतत्त्वज्ञानजन्यत्वमित्यर्थः। स्वरूपायोग्ये स्वप्रतिपाद्यार्थाभावादेवातिव्याप्तिनिरासे विशेषणान्तरप्रक्षेपे . . . . . रसं सूचयति—तत्रापीति। अयोग्येऽपीत्यर्थः। वैज्ञानिकसंबन्धेनेति शेषः। ननु पदप्रयोगे पदावलीज्ञानमेव कारणं, न तु वाक्यार्थज्ञानम्। . . . . . पत्तिप्रामाण्ये व्यवस्थापितम्। तथा च तज्जन्यत्वगर्भलक्षणासंभव इत्यत आह—एतच्चेति। मौनिश्लोकेति।

End:

मुख्यपरत्वे शक्तेर्मूलयुक्त्यभावाद् अत आह—तात्पर्येति। तथा च मुख्यप . . . . . क्षणास्वरूपमिष्टमेव, बोधकत्वं तु तस्या नास्तीति तात्पर्यज्ञानविरहादिति मूलार्थः। तत्र संमतिमाह—त . . . तात्पर्यबलाद् वृत्तिः कल्प्यते, न वृत्तिबलात्तात्पर्यकल्पनमिति मूलार्थः। तदाभाव इ . . . . . ल . . . . . त्रैवर्णिकपरत्वसंभवे अनेकायासबहुल . . . . . स्यति वचनात् वृषोत्सर्जनकर्मणि विद्याप्रयुक्तिरप्रसक्ता तथापि विद्याप्रयुक्ति व्य . . . . . वत्। नन्वेवं श्राद्धविधानात् तदुपयुक्तमन्त्रकल्पनं शूद्रस्यापि स्याद् अत आह—श्राद्धावितिं। शेष ए . . . . इति।

Colophon:

तर्कचूडामणौ शब्दखण्डः समाप्तः।

989

68555 तत्त्वचिन्तामणिप्रकाशव्याख्या—न्यायशिखामणिः

Beginning is same as in TCD 600.

End:

नन्वनुपलम्भस्य कारणत्वं मतद्वये च क्लृप्तमिति कारणत्वमात्रं कल्प्यम्। इन्द्रियस्य तूभयं कल्प्यम् इति गौरवम्। किं च तव मते विशेषणतत्कारणत्वयोः कल्पनमिति गौरवम्। न चैतत् गौरवं फलमुखमिति न दोष इति वाच्यम्। इन्द्रियकरणतासिद्धेः फलमुखत्वस्यासिद्धेरिति चेत्। अत्र ब्रूमः। न तावद्विशेषणता कल्प्या, परमतेऽपि तत्स्वीकारात्। अन्यथा संबन्धं विना भूतलादेरधिकरणत्वानुपपत्तेः। स च संबन्धः संयोगादिबाधात् विशेषणतैव। नापि तत्कारणताकल्पनं दोषः।

अभावविशिष्टप्रतीतिर्विशेषणसंबन्धजन्येति धर्मिग्राहकमानकारणत्वेनैव तत्सिद्धेः। न च तत्र विशिष्ट-प्रत्यक्षत्वं लिङ्गम्। तच्चाभावग्रहे परेणानङ्गीकृतमित्यन्यतरासिद्धिरिति वाच्यम्। ज्ञानाकरणत्वस्य प्रत्यक्ष-पदेन विवक्षितत्वात्, तेन चाप्रयोजकत्वात्। विशेषणसंबन्धाजन्यत्वेन समूहालम्बनाविशेषप्रसंगात्। न चाधिकरणज्ञानस्य करणत्वसंभवासंभवाद्धेत्वसिद्धिरिति वाच्यम्। न तावदन्वयव्यतिरेकाभ्यां कारणत्वग्रहः। तयोः कारणतामात्रग्राहकत्वात्, नापि कारणान्तरानुपपत्त्या, इन्द्रियस्य तादृशस्य सत्त्वात्। यदुक्तमिन्द्रियस्योभयकल्पने गौरवमिति तदयुक्तम्। अन्वयव्यतिरेकाभ्यामेव तत्कारणत्व-सिद्धेः। न चान्यथासिद्धिः। अप्राप्तौ ह्यधिकरणग्रहे तदुपक्षयः प्राप्तिसत्वे। एवं चाभावप्रतीतौ ज्ञानाकरणकत्वेनेन्द्रिय . . . मेव विषयीकरणमिति नानुपलब्धिर्न वाधिकरणज्ञानम्। तस्मादिन्द्रियमे-वाभावप्रतीतौ कारणमिति संक्षेपः।

यद्यपीति। यद्यपि नासीदिति विपर्ययोऽभावविषय एव तथापि तत्रासीदिति पाठाभिप्रायेणेदं, नत्वेवं विपर्ययस्य श्रुताभावान्वितत्वपरित्यागः अश्रुतमैत्रपदकल्पनं चेति गौरवमित्यनुशयादाह—अभावपदमिति। ननु तत्र नासीदित्येव सार्वत्रिकः पाठः। तथा चाभावपदस्य न गौणाभावपरत्वम्। किंचैवं स्मरणाभावस्य मैत्राभावप्रमापकत्वे मैत्रविपर्ययानुपपत्तिरित्युक्तं स्यात्। तच्चायुक्तमन्यत्र विपर्यये विरोधाभावात्। न हि रूपप्रमापकं चक्षुरिति रसेन विपर्यय इत्यरुचेराह—वस्तुत इति। ननु ज्ञानान्तराकरणेऽपि प्रवृत्त्यादिलिङ्गात्तदनुमीयत इत्यत आह—एतच्चेति। ज्ञानातीति . . .।

1047

71036 तत्त्वचिन्तामणिव्याख्या

Beginning:

. . . ऽपि संशयमात्रविरोधित्वात्।

अन्ये तु संशयोत्तरप्रत्यक्षे विशेषदर्शनं न परामर्शरूपजनकम्; किंतु करादि पुरुषत्वव्याप्यम्, अयं च करादिमानिति ज्ञानद्वयात्मकमेव। तत एव तदुत्पत्तौ तत्कल्पने मानाभावात्। तथा च न तत्रातिव्याप्तिरिति। तन्न। यत्र दैववशात् प्रथममेव तादृशः परामर्शः तज्जन्यप्रत्यक्षे तथाप्यतिव्याप्तेः। लाघवेन तादृशपरामर्शस्यैव तत्र कारणत्वाच्च। अन्यथा अनुमितावपि ज्ञानद्वयस्यैव कारणत्वापत्तौ असंभवापत्तेः।

अन्ये तु सिषाधयिषाविरहदशायां सिद्धेरनुमानेतरसाधकमानस्य चानुमितौ प्रतिबन्ध-कत्वमिति सर्वजनसिद्धम्। तथा च सिषाधयिषाविरहसहकृतसिद्ध्यनुमानातिरिक्त सिद्धिकारणान्योन्या-भावः पक्षता। एवं च तत्र पुरुषादौ सिषाधयिषाविरहसहकृतस्यानुमानातिरिक्तस्य प्रत्यक्षस्यैव साधकमानस्य सत्त्वेन तत्र पक्षताविरहादुक्तलक्षणागमनान्न तत्रातिव्याप्तिः। न च सिषाधयिषाविरहे सति सिद्धिदशायामेव न पक्षता। न त्वनुमानातिरिक्तसाधकमानदशायामपीति वाच्यम्। तर्हि पक्षतासत्वे तत्रानुमित्या . . . . . सामग्र्याः प्रतिबन्धान्न तथेति चेत्, तर्हि प्रत्यक्षसामग्र्यां सत्याम् अनुमित्सादशायामप्यनुमितिर्न स्यात्।

End:

पक्षवृत्तित्वेनास्य सत्प्रतिपक्षोत्थापनेऽप्यसमर्थत्वात् . . . . . भावेन तद्वुन्नयनस्यासंभावितत्वात् । तथा च तत्रातिव्याप्तिर्वज्रलेपायितैवेति दूषणे सत्येव दूषणान्तरमाह . . . । समवेतत्वपर्यवसानवारणायाह—सावयवत्व इति । अन्यत्र परमाण्वसिद्धिदशायां मनसोऽणुत्वाद्यसिद्धिदशायां गगनादौ व्या . . . जन्यपदम् । अखण्डाभावे च न वैयर्थ्यमित्यन्ये । . . . वान्तरजातिविशेष एवेति न च वैयर्थ्यमित्यपरे । . . . स्पर्शेति । अत्र द्रव्यपदं समव्याप्त्यभिप्रायेणेति ध्येयम् । नन्वत्र पक्ष एव साध्यव्यापकत्वात् पर्यवसितसाध्यव्यापका . . . . तिव्याप्तिरित्यपरितोषादाह—किंचेति । कर्तव्योपाधिलक्षणस्य प्रथमं संग्राह्यमाह—यद्वयभि . . . . . व्यभिचारित्वेन लिङ्गेन साधनस्य साध्यव्यभिचारित्वं प्रतीयते स उपाधिरित्यर्थः । न चाकाशादि . . . . . धितापत्तिः । घटव्यभिचारित्वेनाकाशादिव्यभिचारित्वप्रमासंभवादिति वाच्यम् । घटव्यभिचारित्व . . . . . च साधिकरणमात्रस्यैव गमकत्वे शेषवैयर्थ्यात् । यस्य साध्यसामानाधिकरण्यस्य व्यभिचार . . . . . वच्छिन्नसाध्यव्यापकोपाधिव्यभिचार . . . . . .

1054

66755 तत्त्वचिन्तामण्यालोकदर्पणनिरोधिनी

Beginning:

. . . जात्याश्रयकरणं न प्रमाणमिति साधने क्व व्याघात इत्यत्राह—प्रत्यक्षव्यावृत्तेति । जातिविशेषणं व्याघात इति तादृशजात्याश्रयकरणस्य परैरनभ्युपगमात् प्रसिद्धमेवोभयवादिनोः पक्षीकृत्य साधनीयत्वात् . . . अनुमानं न प्रमाणम् . . . इति भावः । ननु प्रत्यक्षव्यावृत्तानुमितित्वजात्याश्रयकरणं न प्रमाणमिति साधने व्याघातेऽपि अनुमानं न प्रमाणमिति साधने न व्याघातः । अनुमानशब्दस्य सामान्यतोऽनुमितित्वजात्याश्रयपरत्वात् । प्रत्यक्षत्वव्याप्यतादृशजात्याश्रयकरणस्य . . . तादृशजात्याश्रयकरण . . . च नैयायिकैरङ्गीकारादतो न व्याख्येयम् । धूमेत्यादिनेत्यत्रायमेकः पक्ष इत्यभिसंधायाह—वस्तुत इति । नन्वनुमानपदेन प्रमानुमितिकरणाभिधानाद्प्रमाणमिति व्याहतमित्यत्राह—धूमेतीति । सिद्धाञ्जनं चिन्त्यम् । तथा च सति भ्रम . . . नुमितिकरणे तद्व्यवहारस्य सार्वजनीनस्याप्रसङ्गादनुमीयते येनेति व्युत्पत्त्या अनुमितिकरणत्वमात्रलाभाच्च । धूमदर्शनानन्तरमित्यालोकप्रत्यक्षकरणे अंशतो बाधनिरासाय प्रत्यक्षजन्यत्वलाभाय प्रवृत्ता ।

Fo. 33 (marked 9):

आलोके—तर्हि, अन्यत्र स्वधर्मासंजकत्वस्य प्रवृत्तिनिमित्तत्वे सति । आलोके तेनैवेत्यनन्तरं भविष्यतीति शेषः । आलोके—अन्यथा, व्यभिचारोन्नायकत्वस्य निमित्तत्वाकल्पने । मूले उपाधित्वमुपाधिपदनिमित्तम् । नन्वेतादृशोऽर्थः कस्माल्लब्ध इत्यत्राह—तथा च मूल इति । तथा च विषमव्याप्ते उपाधिपदस्य गौणत्वापादनमिष्टमिति भावः ।

Colophon:

इति श्रीमदद्वैतविद्याचार्यात्रेयगोत्रोद्भवस्य श्रीमन्मन्देलवेङ्कटाध्वरिविद्वद्वरीयसः सूनोः रघुनाथयज्वनः कृतौ अनुमानदर्पणनिरोधिन्यां व्याप्तिलक्षणं संपूर्णम् ।

End:

न चाव्यभिचारज्ञानं न सामान्यकारणम् । नीलघटत्ववदर्थसिद्धत्वेन सामानाधिकरण्यविषयतापर्यन्तस्य कार्यतावच्छेदकत्वाभावेन अव्यभिचारज्ञानत्वेनैव जन्यतायाम् अव्यभिचारज्ञाने अव्यभिचारज्ञानकारणतायामनवस्थानादिति वाच्यम् । सहचारज्ञानेऽपि तुल्यत्वात् । तत्राप्यव्यभिचारविषयत्वस्यार्थसिद्धत्वेन जन्यतावच्छेदकतया सहचारज्ञानत्वेनैव जन्यतायां सहचारज्ञाने सहचारज्ञानस्य कारणतायामनवस्थायास्तुल्यत्वात् अतिप्रसङ्ग इति अन्यसहचारज्ञानादन्यव्याप्तिग्रहप्रसङ्ग इत्यर्थः । यस्मिन् साध्य इति । तथा च स्वाधिकरणीयव्यभिचारधीविरोधित्वमुभयानुगमकमित्यर्थः । व्यतिरेकसहचारस्य व्यभिचारधीविरोधित्वमुपपादयति—आलोके भवतीति । तस्मिन्नधिकरण इति । अत्र धूमाभाव इति ज्ञाने, अत्र धूम इति ज्ञानस्यात्र वह्निरिति ज्ञाने, अत्र वह्न्यभाव इति ज्ञानस्य चानुत्पादादित्यर्थः । हेतुसत्त्वस्य यदवगाहनमिति । हेतुसत्त्वावगाहि यज्ज्ञानमित्यर्थः । तदधिकरणेति । साध्ये तदधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वावगाहि यज्ज्ञानमित्यर्थः ।

1055

PM1732 तत्त्वचिन्तामण्यालोकदर्पणनिरोधिनीव्याख्या

Beginning:

मङ्गलप्रकरणं समाप्य मङ्गलस्य सफलत्वसाधकप्रमाणादिकमभिसंधाय, एतेनानन्तर्यपरेणाथशब्देन तदभिधानानन्तर्यं प्रत्याय्य तादृशप्रमाणाद्याकाङ्क्षानिवृत्तिं प्राप्य तादृशप्रमादिज्ञाने सिद्धत्वं सूच्यते इत्यवसरसंगतिप्रदर्शकत्वमप्यथशब्दस्य उपपद्यते इति सूचितम् । प्रेक्षावत्प्रवृत्त्येति । निश्रेयसान्यफले तुच्छत्वधीमतां प्रवृत्तिप्रयोजकज्ञानविषयेत्यर्थः । निश्रेयसफलवदान्वीक्षिकीसंबन्धस्य निश्रेयसप्रयोजकप्रमाणादितत्त्वज्ञानजनकज्ञानविषयान्वीक्षिकीप्रतिपादितप्रमाणतत्त्वबोधकज्ञानविषयत्वरूपस्य निश्रेयसार्थिप्रवृत्तिजनकज्ञानविषयनिश्रेयससाधनत्वहेतुतया तज्ज्ञानस्य तादृशप्रवृत्तिप्रयोजकत्वं बोध्यम् ।

End:

इति केचित् । तदसत् । ज्ञानव्यक्तिभेदेन प्रामाण्यभेदे यद्यज्ज्ञानव्यक्तौ भ्रमत्वाद्यारोपवशात् प्रामाण्यं न गृहीतं तत्तज्ज्ञानीयप्रामाण्यबाधवारणायाप्रामाण्यारोपाविषयज्ञानपरतायां पक्षीयज्ञानपरतायाः पक्षीयज्ञानपदस्यावश्यकतया तत एवोक्तसमूहालम्बनस्यापि पक्षबहिर्भावेन व्यावृत्तिदानासंगतेः । यादृशधर्मिप्रकारकं समूहालम्बनं एकं ज्ञानं तत्र च गृह्यमाणे नियमत एकविशेष्यांशे अप्रामाण्यारोपः तद्धर्मविशिष्टार्थपरमेव बहिष्पदमित्यप्यन्ये । तदपि न सत् । अनुगतरूपेण निखिलप्रामाण्यानां पक्षत्वे यद्धर्मप्रकारकज्ञाने गृह्यमाणे नियमत एवाप्रामाण्यमारोपितं न तु क्वचिदपि प्रामाण्यमगृहीतप्रका-

रघटितप्रामाण्यस्य पक्षबहिर्भावायानुसरणीयया सरण्या दर्शितस्यापि प्रामाण्यस्य पक्षमध्याभ्यासनिरासात् । अवच्छेदकत्वार्थकसप्तमीसमासादासादितं दर्शितसमूहालम्बनसंविदग्राहकसामग्रीतो व्यावर्तमानमग्राहकान्तं स्पष्टयति—तथा चेति । तदंश इति । यद्धर्म्यंशे प्रामाण्यस्य ग्राह्यत्वमभिप्रेतं तदंशावच्छेदेनेत्यर्थः । यद्यपि सप्तम्यर्थोऽवच्छिन्नत्वं यद्यप्रामाण्यमन्वेतीति मन्यते तदा तादृशमप्रामाण्यमप्रसिद्धपदवीं मध्यमां चक्रे । न हि विरोधिवस्त्वाधारतासमाक्रान्तमंशमभिक्रामदुत्तरस्तदभावं न विजहाति कारकविभक्तितया ग्रहरूपकि . . .

1060

66325(a) तत्त्वचिन्तामणिव्याख्याव्याख्या

Beginning:

हेत्वोरिति मूलस्यासाधारणहेतुकदोषत्वावच्छेदेन अव्याप्तिरित्यर्थे असंगतिमाह—शब्द इति । अन्यथेति । प्रतिबन्धकत्वादित्यर्थे प्रतिबन्धकत्वे पञ्चम्यर्थप्रयुक्तत्वानन्वयः स्यादतो अनुमित्यनुकत्वादिति दीधितौ व्याख्यातम् । किंत्विति जिज्ञासादिविषयवारणाय । ज्ञानसंबन्धित्वेति ज्ञानपदं निश्चयपरम् । विषयस्यापि संग्रहाय वृत्तित्वत्यागदोषाणां कालिकादिसंबन्धेन अतिरिक्तवृत्तित्वाद्यत्किंचित्संबन्धेनेति । संबन्धिघटकसंवन्धेनेत्यन्वयतात्पर्यम् । स्वरूपसंबन्धेन अवच्छेदकतागर्भस्यैकदेशे अतिव्याप्तिरत आह—यद्रूपेति । उक्तयुक्तिरिति । पर्वतो निर्वह्निरित्यादिभ्रमविषयवह्न्यभावनिवारणार्थत्वं युक्तिः । लक्ष्ययोः प्रथमलक्षणवाक्यव्यभिचारज्ञानकालीनत्वविशिष्टपरामर्शकादेः प्रतिबन्धकत्वं न कस्याप्यनुमतमिति विषयितासंबन्धेन व्यभिचारादिसत्वेन प्रतिबन्धकतामादाय लक्षणसमन्वयो वाच्यः । स च न संभवतीत्याह—कथं चेति ।

End:

एवं च संसर्गतावच्छेदकांशे भ्रमस्य तादात्म्यसंबन्धावच्छिन्नप्रतियोगितावच्छेदके वान्यतराश्रयत्वं तत्र दीयते तदापि घटभिन्नं कपालादित्यत्राव्याप्तिरेव । घटेऽपि घटभेदाभावत्वावच्छिन्नप्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वात्तादात्म्यसंबन्धावच्छिन्नत्वाच्चेति चेत् गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ अव्याप्तिवारणाय साध्याभावत्वविशिष्टाधिकरणत्वनिवेशनमावश्यकं, तथा च कपाले घटभेदो नास्तीति प्रतीतिभयेन घटभेदाभावत्वविशिष्टवैशिष्ट्यमिति वाच्यम् । तथा सत्यधिकरणभेदेनाधिकरणतानां भेदादेव संयोगसाध्यकाव्याप्तिनिरासे संयोगाभावभेदानुधावनस्य निर्बीजत्वापातात् । इदं तु बोध्यम् ।

1061

TR1205 तत्त्वचिन्तामणिदीधितिव्याख्याव्याख्या

Beginning:

. . . गगनत्वस्य घटाद्यभावप्रतियोगितावच्छेदकत्ववारणाय व्यापकत्वं यादृशधर्मविशेषणम् । एवं च व्यधिकरणसंबन्धेषु घटरूपाभावप्रतियोगितावच्छेदकसंबन्धत्वं रूपत्वव्यापीति गगनाभावो

नाङ्गीक्रियते । जातिभेदप्रतियोगितावच्छेदकत्वं न तद्घटसमवेतत्वरूपमात्रस्य तन्निरूपकभेदवत् गुण . . . व्यधिकरणतानवच्छेदकत्वासंभवात् । किंतु दलद्वयरूपजातित्वस्येति बोध्यम् ।

ननु प्रतियोगितासामानाधिकरण्यनिवेशाद्घटप्रागभावात्यन्ताभावप्रतियोगितावच्छेदकत्वं घटत्वस्य न संभवत्येवेत्यतो रूपणान्तरमाह—जातित्वस्येति । नन्वेवं चेत्तर्हि यथाश्रुत एव धूमसाध्यके व्यभिचारिण्यतिव्याप्त्यभिधानं स्यादत आह—तादृशेति । तथा च धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकमहानसीयवह्नित्वभिन्नत्वं वह्नित्वे नास्तीत्यव्याप्तिः स्यादित्यनवच्छेदकपदस्यार्थकरणावश्यकतया यथाश्रुतेऽतिव्याप्तिरित्याशयः । घ्राणग्राह्यजातिमान् । तादृशजातित्वेन साध्यत्व इत्यर्थः । निवेशनिमित्तेति । तथा च सामानाधिकरण्येन तादृशजातिविशिष्टगुणत्वे साध्यत्वमभिप्रेतमिति । स्वपदेन गुणत्वेन गन्धविषयकप्रत्यक्षविषयताया उपादानम् ।

End:

तत्रैव पृथिवीवृत्तिगुणाभावैतत्पृथिवीवृत्तिगुणवन्मात्रसमवेताभावयोरैक्यान्न वायुत्वादावतिव्याप्तिः । वस्तुतोऽत्यन्ताभावस्य ध्वंसविरोधित्वे हेत्वधिकरणवृत्तितायां निरवच्छिन्नत्वस्य निष्प्रयोजनतया समनियताभावैक्यमते ह्येतत्पृथिवीवृत्तिगुणाभावस्यैतत्पृथिवीगुणवन्मात्रसमवेताभावरूपतया तदभावानां साधनसमानाधिकरणानां कूटाधिकरणाप्रसिद्धयैव प्रागुक्तस्थले नातिव्याप्तिः । विशिष्टसत्तानिरूपितसमवायेन विशिष्टसत्तात्वस्य साध्यतायां जातेः व्यभिचारित्वेन तादृशसंबन्धेन केवलविशिष्टाभावस्य केवलान्वयितया विशिष्टसत्ताभावस्यैव लक्षणघटकतया न तत्रातिव्याप्तिरिति भावः ।

विशेषणतावच्छेदकविशिष्टस्य शुद्धसंबन्धेन अधिकरणतावादिमते तत्र विशिष्टाभावोऽक्षतः । तत्रैव तद्रूपमात्रसमवेतसत्वात् साध्याभाववत्वरूपानुयोगितायां तद्विशेषणं वक्तव्यम् । अन्यथा व्यधिकरणधर्मावच्छिन्नाभावस्य आकाशाभावाभिन्नतया कथमपि तत्र लक्षणागमनात्तथा घटवृत्तित्वविशिष्ट आकाशाभाववान् मेयत्वादित्यादौ अव्याप्त्या साध्याभावत्वविशिष्टाधिकरणत्वं वक्तव्यमित्यर्थः ।

1096

69523(a) तर्कभाषाप्रकाशिकानिरुक्तिव्याख्या

Beginning is same as in 1097.

End:

अभावो नाम नञर्थोल्लिखितधीविषयः । नञर्थोल्लिखिता नास्ति न भवति इत्याकारा या धीः तद्विषय इत्यर्थः । भावषट्कव्युदासाय नञर्थोल्लिखित इति । यद्यपि घटाभावो नास्तीत्यभावाकारेण घटादेः प्रतीतेः तत्रातिव्याप्तमिदं लक्षणं, तथापि तन्मात्रविषयत्वं विवक्षितम् । तथा च घटादिना इत्यादिरूपेणापि प्रतीतेः नातिव्याप्तिः, अभावस्य तु असाधारणनञर्थमात्रप्रतीतिविषयत्वमेवेति नासंभवः । अथवा असमवायिकारणत्वे सति असमवायो वा अभावः । समवायो अस्यास्तीति

समवायि। स न भवतीत्यसमवायि। तत्त्वे सति असमवायः समवायभिन्न इत्यर्थः। द्रव्यत्वादिव्युदासाय सत्यन्तं, समवाये अतिव्याप्तिवारणाय उत्तरपदम्। प्रमाविषयत्वं प्रमेयत्वम्।

निरुक्तिग्रन्थः समाप्तः।

Colophon:

चेन्नुभट्टीये काठिन्यवाक्यार्थप्रकाशकनिरुक्तिः।

1097

77554(c) **तर्कभाषाप्रकाशिकानिरुक्तिव्याख्या**

Beginning:

प्रणम्य दक्षिणामूर्तिं साम्बं संसारभेषजम्।
निरुक्तिव्याकृतिं कुर्वे बालव्युत्पत्तिदायिनीम्॥

अज्ञातकरणजन्यज्ञानानुवृत्तो ज्ञानकरणजन्यज्ञानव्यावृत्तो धर्मविशेषः साक्षात्त्वम्। यद्यपि साक्षात्त्वजातेरखण्डतया सखण्डोपाधिवन्निर्वचनापेक्षा नास्त्येव, तथापि साक्षात्त्वजातिः कुत्र वर्तत इत्यपेक्षायां ज्ञातकरणजन्यज्ञानेषु न वर्तते, किंतु अज्ञातकरणकरणजन्यज्ञानेषु वर्तत इत्याह—अज्ञातेति। यद्वा साक्षात्त्वस्य जातितया शरीरनिर्वचनापेक्षाभावेऽपि तस्य किं लक्षणमित्यपेक्षायां साक्षात्त्वमेवासाधारणतया तत्स्वरूपमात्रं निरुच्यत—इति।

End is same as in 1096.

1117

71345 **तर्कभाषाव्याख्या—नृसिंहराजीया**

Beginning:

(कलश)जलधिकन्यापीनवक्षोजकुम्भ-
द्वितयरचितशुद्धस्फारकस्तूरिकाङ्कः।
अरिदरशरचापाद्यायुधो वेणुपाणिः
कलयतु कुशलं नः कोपि गोपाल(संज्ञः)॥
(महाविष्णुकराम्भो)जगृहीतपदपङ्कजम्।
लक्ष्म्याः करोतु कुशलं विवाहसमयोचितम्॥

कर्तव्यस्य ग्रन्थस्य उपादेयत्वसिद्धये आह—बालोऽपीति। बालबोधार्थत्वेन ग्रन्थस्य सार्थकत्वम्। तत्त्वज्ञानस्य मोक्षप्राप्तिहेतुत्वं न संभवति, 'श्रोतव्यो मन्तव्यः' इत्यादिश्रुत्या निदिध्यासनादेरेव मोक्षहेतुताप्रतिपादनादित्यत्राह—अस्यार्थ इति। प्राप्तिशब्दो . . . . . निश्रेय साधिगमशब्दस्य मोक्षहेतुनिदिध्यासनाद्यात्मकसाक्षात्कारपरत्वात्तत्त्वज्ञानस्य तद्धेतुत्वादिति भावः।

End:

सर्वनिग्रहाणामिति । अर्थान्तराप्रातकालादीनामित्यर्थः । जल्पकथाया . . . . . थानन्तरं स्वपक्षस्थापनं कर्तव्यमित्येव नियमः, न तु वैपरीत्यं . . . एवेत्याह—परपक्ष इति । परपक्षनिराकरणाभावे स्वपक्षस्य प्रतिष्ठा न स्यादिति सा . . . . . प्रतिबन्धकत्वात् । प्रतिबन्धकाभावस्य प्रथममपेक्षितत्वात् । परपक्षनिरसनपूर्वकस्वपक्षस्थापनमिति । तदवसानेति भावः । तदुक्तम् यावत्परमतं न निरस्तं . . . . . पनाहीनेति; विजिगीषुकथेत्यनुषङ्गः, विजिगीषुकथा जल्पः इत्यर्थः । आप्तेति । स्वपक्षस्थापनाहीनेति । स्वपक्षस्थापनाहीनेत्यनुक्ते . . . . . .

1120

68457 तत्त्वप्रबोधिनीव्याख्या—न्यायविलासः

Beginning is same as in TD 6315.

End:

ननु तथापि प्रामाण्यसंशयप्रामाण्यव्यतिरेकनिश्चययोरर्थनिश्चयप्रतिबन्धकतया यत्संशयेति व्याप्त्या प्रामाण्यनिश्चयस्यार्थनिश्चयहेतुत्वेन सर्वत्रार्थनिश्चयार्थं प्रामाण्यानुमानेऽनवस्थेति स्वत एव प्रामाण्यग्रह इति चेन्न; त्वन्मतेऽपि प्रामाण्यनिश्चयस्यार्थनिश्चयपश्चाद्भावित्वं समानकालीनत्वे वेत्यर्थनिश्चयपूर्ववृत्तित्वाभावेन हेतुत्वासंभवात् । किं च प्रामाण्यनिश्चयस्यार्थनिश्चयहेतुत्वे प्रामाण्यस्याप्यर्थत्वेन तन्निश्चयार्थं तद्घटितप्रामाण्यनिश्चयावश्यंभावः । एवमुत्तरोत्तरमित्यनवस्थाया दुरपह्नवत्वात् । स्वप्रकाशपक्षे प्रामाण्यघटितप्रामाण्यस्यापि व्यवसायेन ग्रहाङ्गीकारोऽपि । एवमुत्तरोत्तरप्रामाण्यग्रहाङ्गीकारावश्यंभावेन विषयानन्त्यानुभवापत्तेः । तस्मात् प्रामाण्यनिश्चयस्य तत्संशयाधीनविषयसंशयोत्तरनिश्चय एव विशेषदर्शनत्वेनोपयोगात् । प्रामाण्यसंशयस्थले तदनुमित्यवश्यंभावेऽपि स्वतःसिद्धशङ्काविरहेऽपि नानुमानापेक्षेति नानवस्थेति तदेतदभिसंधायाह—इत्यास्तामिति ।

नन्वर्थापत्तेः पूर्वमेव तानि चत्वारीत्यनेन प्रमाणानामुपसंहाराच्चत्वार्येवेत्येतस्य वैयर्थ्यमाशङ्क्याह—एतावतेति ।

इति श्रीमहोपाध्याय **यज्ञयार्यसूनुना** महोपाध्याय**विश्वनाथभट्टारक**विरचिते **तत्वप्रबोधिनीप्रकाशे न्यायविलासे** प्रमाणपरिच्छेदः समाप्तः ।

1123

TR541 तर्कभाषाव्याख्या—तर्कभाषातात्पर्यम्

Beginning:

लक्ष्मीलालनसंतुष्टं लीलापालितविष्टपम् ।
प्रह्लादप्रार्थितं धाम भूयाद्वो भूतयेऽन्वहम् ॥

गणेश्वरं प्रणम्याथ पतञ्जलिमथो गुरून् ।
श्रीरामविदुषा तर्कभाषातात्पर्यमीर्यते ॥

अथ सदाचारादनुष्ठितविनायकार्चनादिलक्षणमङ्गले प्रेक्षावत्प्रवृत्त्यर्थं विषयादीन् दर्शयति—बालोऽपि य इति । यः अधीतसाङ्गस्वाध्यायो बालोऽपि अश्रुतमीमांसादितन्त्रोऽपि । अलसः न्यायमहाशास्त्रविषये अनवपातमतिः सन् । अल्पेन श्रुतेन परिमितेन प्रकरणेन । न्यायनये भगवताक्ष्**पादेन गौतममहर्षिणा** प्रणीते न्यायमहाशास्त्रे । प्रवेशं तत्र प्राधान्येन प्रतिपादितानां प्रमाणादिपदार्थानां स्वरूपलक्षणविभागमात्रज्ञानम् । परस्परमितरभिन्नज्ञानमिति यावत् ।

End:

ननु गगनारविन्दं सुरभि अरविन्दत्वात्, शब्दो नित्यः चाक्षुषत्वात्, वह्निरनुष्णः पदार्थत्वात् इत्यादीनां कथासु प्रयोगदर्शनात् कथं त्रित्वावधारणमित्यत आह—अत इति । उक्तेभ्योऽन्ये हेतुवदवभासन्त इति तथोक्ताः । गगनारविन्दमित्यादयो हि कतिपयरूपयोगात्केवलहेतुत्वभ्रमविषयाः । न तु वस्तुतो हेतव इत्यसाधकास्त इत्यर्थः । ते कतीति जिज्ञासुं प्रत्याह—ते चेति । तर्ह्यनन्तत्वाद् दुर्ज्ञेयत्वं प्राप्तमिति, तद्व्यावृत्तस्य सद्धेतोरपि ज्ञानं दुर्घटमित्याह—असिद्धेति । अनेकप्रकाराणामप्येषां महर्षिणा कथंचित्संगृह्य पञ्चधा विभागकरणात्तज्ज्ञाने तद्व्यावृत्तस्य सद्धेतोरपि । यद्वा आश्रयेणासिद्ध इत्याश्रयासिद्धः । गोभिर्दरिद्र इतिवदाश्रयाभावादसिद्ध इत्यर्थः । एवमन्यत्रापि । अत्रानुगतलक्षणदूषकताबीजासंकीर्णोदाहरणादिविवेकोऽग्रे स्यात् . . .

1125

PM1698 तर्कभाषाव्याख्या—वादरत्नावलिः

Beginning:

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥

ननु ग्रन्थादौ मङ्गलमाचरणीयं तथैव शिष्टाचारदर्शनात् । अत्र चादौ मङ्गलाचरणं नेतीत्यकृतमङ्गलेन कृता तर्कभाषा अनुपादेयैवेति न तत्र प्रेक्षावत्प्रवृत्तिः स्यादिति चेन्न । ग्रन्थतो मङ्गलाकरणेऽपि ग्रन्थाद्बहिरेव मङ्गलस्य कृतत्वात् । न च तत्र प्रमाणाभावः । विमतः **केशवमिश्रः** ग्रन्थादौ कृतमङ्गलो भवितुमर्हति ग्रन्थकर्तृत्वे सति शिष्टत्वात् संप्रतिपन्नवत् इत्यनुमानस्य प्रमाणत्वात् । मङ्गलस्य च विनायकार्चनदधिदूर्वाङ्कुरदर्शनेष्टदेवतानत्यनुस्मरणाद्यन्यतमरूपस्य केशवमिश्रेण कृतत्वात् तत्कृतग्रन्थे प्रवृत्तिः संभवत्येव ।

End:

अपरे तु गन्धप्रागभावावच्छिन्नघटो गन्धवान् पृथिवीत्वादित्येतद्बाधस्यासंकीर्णोदाहरणत्वमाहुः । तदयुक्तम् । अत्र पृथिवीत्वरूपहेतोः विशेषणे गन्धप्रागभावे असिद्धत्वेन तद्विशिष्टघटे-

ऽप्यसिद्धेः असिद्धिसंकीर्णत्वेन असंकीर्णोदाहरणत्वायोगात् गन्धवत्प्रागभावोपलक्षितघटस्य पक्षत्वेऽपि तदुपलक्षितघटे गन्धवत्त्वेन बाधाभावात् । बाधोदाहरणत्वाभावेन सुतरामसंकीर्णबाधोदाहरणत्वसंभवः । तस्मादितर . . स्युः इति दे . . बाध . दो . . मिति ध्येयम् । एवं हेत्वाभासस्वरूपे ज्ञाते त . . . . सद्धेतुज्ञानं संभवति । तत्रायं स्वार्थपरार्थ . . . . . सप्रपञ्चं निरूपितमिति ध्येयम् . . . . न परिश्री. . . .

Colophon:

वादावल्यां द्वितीयपरिच्छेदः ।

1126

69432 तर्कभाषाव्याख्याव्याख्या

Beginning:

धर्मिनिर्देशरूपतया प्रथमोद्दिष्टमुद्देशं निर्वक्ति । उद्देशस्त्विति मूलम् । नन्विति । अत्र नाममात्रेणेति तृतीया । कर्तृत्वं करणत्वं वा न प्रतिपादयितुं युज्यते । नाम्नोऽचेतनत्वेन यत्नाश्रयत्वरूपकर्तृत्वायोगात् । संकीर्तनस्य ताल्वादिव्यापारस्य नामाजनकतया तत्र तस्य करणत्वायोगाच्चेति कारकविभक्तित्वायोगात् । सहयोगे तृतीयामाश्रित्य नाममात्रलक्षणविशेषणविशिष्टवस्तुप्रतिपादकशब्दत्वं लक्षणार्थो वाच्यः । संकीर्त्यते प्रतिपाद्यते अनेनेति करणव्युत्पत्तिसंभवादिति मूलाभिप्रायो वा । आहोस्विन्नाममात्रेणेत्यत्र तत्प्रतीतीच्छालक्षणया नाममात्रप्रतीतीच्छाकरणकवस्तुवाचकपदत्वमुद्देशत्वम् । संकीर्तनशब्दस्य करणव्युत्पत्त्या पदपरत्वादित्याशय इति विकल्पाभिप्रायेणाह—नामेति । विशेषणेति । 'सह युक्तेऽप्रधाने तृतीया' इत्यनुशासनात् विशेषणत्वं लभ्यत इति भावः ।

End:

शास्त्रेति । यत्सात्मकं न भवति तत्प्राणादिमन्न भवति यथा घट इत्यादिगत इत्यर्थः । लक्षणाभिधानेति उद्देशे कृते किमस्य लक्षणमिति जिज्ञासायां लक्षणशास्त्रमवतरेदितीच्छापूर्वकत्वे सतीत्यर्थः । न तु लक्षणाभिधानप्रतीतीच्छयोच्चरितत्वं संभवतीति बोध्यम् । उक्तघटादिपदस्य व्यतिरेकव्याप्त्यभिधानतात्पर्यकत्वादिति भावः । परिहरति—उदासीनेति । लक्षणशास्त्रत्वेनानादरणीयेत्यर्थः । तत्रापीति । उद्देशलक्षणघटकतया ज्ञा . . . !

1251

66782(a) व्युत्पत्तिवादव्याख्या

Beginning is same as in MT 4510(a).

End:

तथा च सामग्र्या अभावेन भेदप्रकारकबोधासंभवात् व्यासस्थले सर्वत्राभेदसंसर्गकबोध इति न हेतुताद्वयकल्पनादिप्रयुक्तगौरवं, प्रत्युत प्रकारतामत एव वृत्तिकल्पनम् । तत्र तथोपस्थितेः

हेतुत्वकल्पनं शाब्दात् प्राङ् नियमेन पदजन्याभेदोपस्थितिकल्पनादिकमिति गौरवम्। तस्माद् अभेदसंसर्गकबोध एव उचित इत्याशयः।

ननु अन्यत्र पदजन्याभेदोपस्थितिदशायामभेदप्रकारकबोधोदयेन शक्तिभ्रमादिस्थले अभेदप्रकारकबोधानभ्युपगमः। तत्रत्यस्य सामग्रीत्वाकल्पनं चायुक्तमित्यत आह—दिगिति। यदि शक्तिभ्रमादिस्थले अभेदप्रकारकबोधो अवश्यंभावी तदा यत्र नीलो घट इत्यादौ विशेषणविभक्तेर्निरर्थकत्वभ्रमः; तत्र तत्संसर्गकबोधोऽप्यवश्यंभावीति प्रकारतामतेऽपि हेतुताद्वयकल्पनादिकमिति प्रसज्येत। तस्मात् मदुक्तप्रकारस्त्वयाप्यनुसरणीय एवेति न दोष इत्यर्थः।

1267

69198(e) अत्यन्ताभावघटितकेवलान्वयिवादः

Beginning:

वृत्तिमदत्यन्ताभावाप्रयोगित्वं केवलान्वयित्वमिति मणिकृत ऊचुः। अत्र वृत्तिमत्त्वविशेषणानुपादाने आकाशात्यन्ताभावे अव्याप्तिः। तस्य स्वात्यन्ताभावरूपाकाशप्रतियोगित्वात्, अभावाभावस्य भावरूपत्वात्। तद्वारणार्थं वृत्तिमत्त्वविशेषणम्। नन्वेवमपि संयोगात्यन्ताभावे अव्याप्तिः, तस्यापि वृत्तिमत्संयोगरूपाभावप्रतियोगित्वात्। नैष दोषः। स्ववृत्तिविरोधित्वस्य वृत्तिविशेषणत्वस्वीकारात्। तथा च स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति पर्यवसितार्थः। नन्वत्र वृत्तिमद्विशेषणं व्यर्थम्, स्ववृत्तिविरोधीत्यनेनैव चान्योन्याभावनिरासे अत्यन्तपदमपि व्यर्थम्। न च वृत्तिमद्विशेषणानुपादाने स्ववृत्तिविरोधीत्यनेन स्वाधिकरणानधिकरणत्वस्य विवक्षितत्वेन आकाशरूपाभावस्य तादृशतया तत्प्रतियोगित्वसत्त्वेन आकाशात्यन्ताभावे अव्याप्तिः स्यात्, तद्वारणार्थं वृत्तिमद्विशेषणं सार्थकमिति वाच्यम्। एवं सति संयोगे अतिव्याप्तिः।

End:

स्वानधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्। एतेन भावत्वे केवलान्वयिलक्षणस्यातिव्याप्तिः, अभावमात्राधिकरणताभावानभ्युपगमेन स्वरूपसंबन्धारोप्यकभावत्वाभावस्याभावेन समवायारोप्यकभावत्वाभावस्य वाच्यतया तस्य च भावत्वाधिकरणाधिकरणत्वेनान्याभावस्यैव तादृशस्य वाच्यतया तदप्रतियोगित्वसत्त्वादिति परास्तम्। स्वशब्दार्थत्वेनाभिमतभावत्वानधिकरणाभावाधिकरणकसमवायसंबन्धारोप्यकभावत्वाभावप्रतियोगित्वात् भावत्वस्येत्यतिव्याप्तेरनवकाशात्। न च प्रमेयत्वानधिकरणाप्रसिद्धप्रमेयत्वलक्षणाप्रसिद्धिरिति वाच्यम्। स्वपदस्य प्रसिद्धपरतायाः प्रागेवोक्तत्वात् इति न संकटं किंचित्।

Colophon:

अत्यन्ताभावघटितकेवलान्वयिवादः समाप्तः।

1268

73880(e) अनुपलब्धिवादः

Beginning is same as in MT 3663(e).

End:

अथैवमपि यत्राधिकरणतावच्छेदकरूपेणानुपस्थित एव अधिकरणतावच्छेदकरूपेण प्रतियोग्युपलम्भविषय एव अधिकरणे यत्र चक्षुःसंयोगादिघटितसामग्री तत्राभावे इन्द्रियसंबन्धविशेषणतावलाद् विषयतया प्रत्यक्षापत्तिर्दुर्वारैव। न च तत्तदधिकरणतावच्छेदकप्रकारकज्ञानतत्तदधिकरणतावच्छेदकप्रतियोग्युपलम्भाभावतत्तदधिकरणवृत्तिचक्षुःसंयोगत्वादिना कारणत्वाभावात् तदवच्छिन्नानां सामग्रीघटकतानुपपत्तिः कारणतावच्छेदकीभूतचक्षुःसंयोगत्वाद्यवच्छिन्नस्य यत्रकुत्रचित् सत्त्व एव . . . . संभवादिति चेत्। मैवम्। तत्तदधिकरणविषयकज्ञानं प्रति तत्तदधिकरणनिष्ठविषयतासंबन्धेन प्रत्यक्षोत्पादकसामग्री ऐकाधिकरण्यापन्नतत्तदधिकरणचक्षुःसंयोगादिघटित . . . . . धिकरणतावच्छेदकरूपेण यद्यदधिकरणे यद्यदभावप्रत्यक्षमुत्पद्यते तादृशाधिकरणतावच्छेदकप्रकारकज्ञानतादृशाधिकरणतावच्छेदकप्रतियोग्युपलम्भाभावादिघटिततया आत्मनिष्ठप्रत्यासत्त्या कार्योत्पादकसामग्र्या तत्तदधिकरणज्ञानचक्षुःसंयोगादिघटितया तत्तदधिकरणनिष्ठविषयताप्रत्यासत्त्या कार्योत्पादकसामग्र्या च समवहिताया एव तत्तदधिकरणरूपविषयेन्द्रियसंबन्धविशेषताघटिताया अभावनिष्ठविषयताप्रत्यासत्त्या प्रत्यक्षोत्पादकसामग्र्याः कार्योत्पादप्रयोजकतया तत्राधिकरणे चक्षुःसंयोगादिघटितसामग्रीतदधिकरणवृत्त्यधिकरणतावच्छेदकप्रकारकज्ञानादिघटितात्मनिष्ठसामग्र्यसत्त्वे न अभावप्रत्यक्षतापत्तिः। न च तत्तदधिकरणवृत्तिविषयतासंबन्धेन ज्ञानं प्रति तत्तदधिकरणवृत्तिविषयतासंबन्धेन ज्ञानस्य हेतुताकल्पने गौरवमिति वाच्यम्। तादृशहेतुताकल्पनस्योभयवादिसिद्धत्वात् तदकल्पने भूतलादिसंनिकर्षशून्यकालेऽपि अधिकरणान्तरनिष्ठसंनिकर्षादिघटितसामग्रीसहकृतया भूतलं घटाभाववदित्यादिबाधाभावघटितात्मनिष्ठसामग्र्या फलजननप्रसंगादिति दिक्।

Colophon:

इति योग्यानुपलब्धिवादः।

1269

73879(a) अनुपलब्धिवादः

Beginning:

अनुपलब्धिः प्रमाणान्तरम्, अन्यथा अभावप्रत्ययानुत्पत्तेः। चक्षुरादिकं त्वधिकरणज्ञाने पर्यवस्यति, अभावेन प्राह्यभावेन . . . . . गात्। घटाभावादौ घटाभावाद्युपलम्भे त्विन्द्रियं कारणकारणोपक्षीणम्। तदयं प्रयोगः—विवादविषया भूतले घटाभावधीर्न चक्षुरादिकरणिका चक्षुराद्यसंनिकृ . . . . त्वादिवत्। न चासिद्धिः, विशेषणतात्मकसंनिकर्षस्याभावे सत्त्वादिति

वाच्यम् । विशेषणतायाः संनिकर्षत्वासिद्धेः । स्वरूपात्मकानन्तविशेषणतायाश्च संनिकर्षत्वं कार्यानुपलम्भे साक्षात्त्वचाक्षुषत्वादिकल्पनायां गौरवात् । अभावं साक्षात्करोमि पश्यामीत्यनुभवस्त्वसिद्धः ।

End:

अण्वाद्युपस्थितौ तथाविधालोकसंयोगदशायां तत्र घटादेरुपलम्भापादनसंभवादिति तन्न । निरुक्तसंनिकर्षाभावात् । अन्यथा पृथिवीत्वाभावादेरपि तत्र प्रत्यक्षापत्तेः । एतेन आश्रयनाशजन्यवायुस्पर्शध्वंसः काले प्रत्यक्ष इति शब्दानित्यतायां **मिश्रोक्त**मपास्तम् । अभावीयविशेषणताया एव प्रत्यासत्तित्वात् स्पर्शध्वंसस्य च काले कालिक एव संबन्धो न त्वभावीयस्वरूपसंबन्धः । अत एव आश्रयनाशजन्यगुणनाशात्यन्ताभावः केवलान्वयीति **मणिः** । इदं तु बोध्यम् । कालिकविशेषणतायाः अप्यस्तु प्रत्यासत्तित्वं, स्पर्शध्वंसः योग्यानुपलब्धिसत्त्वाद् गृह्यते, न तु द्रव्यभेदादिति । जन्यमात्रस्य क्रियामात्रस्य वा कालत्वे नैतत् युक्तं, घटाभावादौ घटाद्यत्यन्ताभावप्रत्यक्षापत्तेरिति ।

1272

69198(m) अनुमानादिप्रमाणखण्डनवादार्थः

Beginning:

प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणानि । एतदयुक्तम् । क्लृप्तप्रत्यक्षप्रामाण्येनैव निखिलव्यवहारोपपत्तौ तदतिरिक्तप्रामाण्यायोगात् । न च तर्हि असंनिकृष्टवह्निधर्मादिज्ञानं कथमिति वाच्यम् ; ज्ञानसंनिकर्षमादाय शुक्तौ रजतज्ञानवत् अलौकिकप्रत्यक्षस्यैव तत्रोपपत्तेः । न च तर्हि शुक्तिरजतज्ञानवत् तत्र परामर्शाद्यपेक्षा न स्यादिति वाच्यम् ; प्रमायामगुणवत् संशयोत्तरप्रत्यक्षे विशेषदर्शनवच्च अनुमितिरूपप्रत्यक्षादावपि विशेषसामग्रीत्वेन तदपेक्षोपपत्तेः । शाब्दप्रत्यक्षादिस्थले विशेषणज्ञानसंपादकत्वेन ज्ञानसंनिकर्षसंपादकत्वेन वा शाब्दाद्यपेक्षोपपत्तेश्च । न चैवं सति वह्निं साक्षात्करोमीत्यनुव्यवसायापत्तिरिति वाच्यम् ; परमाणुं साक्षात्करोमि, सुरभिं पश्यामीति, घटो नास्तीत्यत्र घटं पश्यामीत्याद्यनुव्यवसायाभावेन अलौकिकप्रत्यक्षे तादृशनियमासिद्धेः ।

End:

न चैवं चत्वारि प्रमाणानीति व्यवहारविरोधः । तदा षट्प्रमाणानि इति व्यवहारविरोधस्य तुल्यत्वात् । सर्वत्र व्यवहारस्याप्यसिद्धेः । न चैवं वेदप्रामाण्याभावे सर्ववैदिकविरोध इति वाच्यम् ; परस्य इष्टापत्तेः । वेदस्य पृथगेव प्रामाण्यात् । तज्जन्यज्ञानस्य प्रामाण्याभ्युपगमेन धर्मादिज्ञानार्थं मनःसहकारितया वेदस्यापेक्षणीयत्वेन वेदप्रामाण्यव्यवहारोपपत्तौ तद्विरोधाभावात् । मीमांसकमतेऽपि तस्यैवाभ्युपगमाच्चेत्येषा दिक् । अतो मनोरथमात्रं प्रमाणचतुष्टयमिति

Colophon:

अनुमानादिप्रमाणखण्डनवादार्थः समाप्तः ।

1273

PM1661 **अनुमितिपरामर्शविचारः**

Beginning:

नत्वा शिवपदाम्भोजं **महादेवः** सतां मुदे ।
विचारयत्यनुमितौ परामर्शस्य हेतुताम् ॥ १ ॥
यद्यपीह बहुभिर्विचारितं पण्डितैस्तदपि नूतनमत्र ।
यद्यदस्ति तदिहावलोक्यतां सूक्ष्मदृष्टिमवलम्ब्य सज्जनाः ॥ २ ॥
प्रसिद्धार्थविशेषस्तु स्वयमेव प्रसिध्यति ।
अतः प्रसिद्धं संत्यज्य प्रवृत्तिरिह मे बुधाः ॥ ३ ॥
स्वीयं यो ग्रन्थमन्यस्य तदीयं चान्यकर्तृकम् ।
वक्ति शीघ्रं तयोर्नाशः तावुभौ जारजातकौ ॥ ४ ॥

तत्रान्वयव्यतिरेकाभ्यां अनुमितौ परामर्शस्य हेतुतेति सिद्धान्तः । तच्च सामान्यतोऽनुमितित्वावच्छिन्नं प्रति परामर्शत्वेन, पर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयत्वादिना, तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन वेति त्रिविधम् । अत्र केचित् ।

End:

. . . . . परामर्शशून्यक्षणावच्छिन्नानुमितित्वावच्छिन्नाभावाधिकरणत्वं प्रति तत्तद्धर्मावच्छिन्नाभावकूटाधिकरणत्वस्य प्रयोजकत्वकल्पनमपेक्ष्य तत्तत्क्षणावच्छिन्नानुमितित्वावच्छिन्नाभावाधिकरणत्वं प्रति परामर्शत्वावच्छिन्नाभावाधिकरणत्वस्यैकप्रयोजकत्वाभ्युपगमे लाघवादित्याहुः । तदसत् । एतादृशप्रयोजकत्वकल्पनस्य कार्यकारणभावकल्पकत्वेऽनुमितित्वावच्छिन्नं प्रति अनुमित्साविरहविशिष्टाप्रामाण्यग्रहाभावविशिष्टानुमित्यभावत्वेनापि हेतुतापत्तिः । अत्रापि परामर्शद्वितीयक्षणोत्पन्नानुमित्यव्यवहितक्षणावच्छिन्नानुमितित्वावच्छिन्नाभावाधिकरणत्वं प्रति सिषाधयिषाविरहविशिष्टनिश्चयत्वघटितसिद्धित्वावच्छिन्नाभावाभावत्वाधिकरणत्वस्य गुरोः प्रयोजकत्वकल्पनापेक्षया तादृशाभावाधिकरणत्वं प्रति अनुमित्साविरहविशिष्टानुमित्यभावाभावाधिकरणत्वस्य लघोः प्रयोजकत्वकल्पने लाघवादित्यलमसद्ग्रहेणेति ।

Colophon:

इति श्रीभट्टाचार्य **रघुदेव**कृतोऽनुमिति**परामर्शविचारः** समाप्तिमगमत् ।

1274

69198(n) **अनुमितिवादार्थः**

Beginning:

व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति मणिकृतः । अत्र किंचिद्विचार्यते । ननु किमिह व्याप्तिविशिष्टश्च पक्षधर्मश्च इति द्वन्द्वसमासः । उत व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति वा,

व्याप्तिविशिष्टा च सा पक्षधर्मता चेति वा कर्मधारयो वा। आहोस्वित् व्याप्तिविशिष्टस्य पक्षधर्मतेति षष्ठीतत्पुरुषो वा। न प्रथमः, प्रमानुमित्यव्याप्तेः, द्वन्द्वप्रतिपाद्यस्य वास्तवपदार्थभेदस्य तत्राभावात्। परामर्शस्याभेदावगाहितया व्याप्तिविशिष्टपक्षधर्मभेदानवगाहितया इतरभेदे द्वन्द्व इति विवक्षायामसंभवापत्तेः। न द्वितीयः, भ्रमानुमित्यव्याप्तेः, तदप्रतिपाद्याभेदस्य तत्र बाधितत्वात्।

End:

ननु विशकलितं व्यभिचाराभावं सहचारं च स्मरतः पक्षवृत्तिहेतौ विशेष्ये विशेषणमिति न्यायेन तदुभयवैशिष्ट्यज्ञानात् साधनसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणो धूम इत्याकारकाद्यत्रानुमितिस्तत्राव्याप्तिः, व्याप्तिघटकपदार्थोपस्थितावपि विशिष्टव्याप्तेः पूर्वमनुपस्थितत्वेन तत्राप्रकारत्वात्। न च व्याप्तिप्रकारकत्वस्यानुमितिहेतुतावच्छेदकतया तादृशपरामर्शादनुमितिर्न भवत्येव येनाव्याप्तिशङ्का स्यादिति वाच्यम्; लाघवेनाव्यभिचारप्रकारकत्वस्यैव हेतुतावच्छेदकतया तत्रानुमित्यपलाप अनुभवविरोधादिति चेन्न; व्यभिचारज्ञानप्रतिबन्धकज्ञानविषयधर्मप्रकारेण व्याप्तिविषयकत्वस्यैव व्याप्तिप्रकारकपदेन विवक्षितत्वात्। स च धर्मो व्याप्तिघटकयत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वरूप इति न विशकलितस्थलीयानुमितावव्याप्तिः। न च व्यभिचारज्ञानविरोधिप्रकारेणेत्येतदपेक्षया अव्यभिचारप्रकारकत्वमेव लाघवेन विवक्ष्यतामिति वाच्यम्। अन्योन्याभावगर्भाव्यभिचारस्य नानात्वेन उक्तरूपेण तदनुगमस्यावश्यवाच्यत्वादिति सर्वं समञ्जसमिति संक्षेपः।

Colophon:

अनुमितिवादार्थः समाप्तः।

1277

70905(c) आकाङ्क्षावादः

Beginning:

सिद्धायां शाब्दबोधाख्यविलक्षणप्रमायां तत्करणतया शब्दज्ञानस्य स्वतन्त्रप्रमाणता। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रे शब्दपदं शब्दज्ञानपरम्। अतीतानागतशब्दानुसंधानादपि शाब्दबोधात्, शब्दस्य तद्धेतुत्वासंभवात्। शब्दज्ञानस्य शाब्दत्वावच्छिन्नं प्रति शब्दज्ञानत्वेन वर्णज्ञानत्वेन वा हेतुता। वर्णत्वं च ध्वनिव्यावृत्तः शब्दनिष्ठो जातिविशेषः। सामान्यसामग्र्याश्च विशेषसामग्रीसहिताया एव कार्योत्पादकत्वात् निराकाङ्क्षादिशब्दज्ञानान्न शाब्दत्वरूपसामान्यधर्मावच्छिन्नापत्तिः। तदर्थविषयकशाब्दत्वावच्छिन्नहेतुभूतपदज्ञानजन्यतदर्थोपस्थितिरूपायाः तदर्थविशेष्यकतत्तत्संसर्गकतदर्थप्रकारकशाब्दत्वावच्छिन्नहेतुभूततत्तदर्थोपस्थापकपदनिरूपितपरस्पराकाङ्क्षादिज्ञानादिरूपायाश्च विशेषसामग्र्या विरहात्।

End:

न चैवमाकाङ्क्षाज्ञानस्यैव शाब्दबोधहेतुत्वमकिंचित्करम्। घटः कर्मत्वमित्यादौ तादृशतात्पर्यविरहेणैव शाब्दबोधानुत्पादसंभवादिति वाच्यम्; तादृशतात्पर्यज्ञानस्यैवाकाङ्क्षाज्ञानहेतुकतया तद्धेतुकतयैवाकाङ्क्षाज्ञानहेतुतासिद्धेः। आनुपूर्वीविशेषघर्मितावच्छेदकतात्पर्यग्रहस्य तात्पर्यघर्मितावच्छेदकानुपूर्वीविशेषज्ञानस्य वा हेतुत्वमित्यत्र विनिगमनाविरहेण कारणताद्वयस्य प्रसक्तावपि पदव्यक्तिभेदेन कारणताभेदकल्पनापेक्षया लाघवस्याक्षतत्वात्। न च मन्मतेऽपि विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकनिराकाङ्क्षत्वज्ञानाभावस्य विशिष्टविशेष्यकतात्पर्यज्ञानत्वेन हेतुत्वोपगमात् नोक्तदोष इति वाच्यम्। निराकाङ्क्षत्वज्ञाने तत्पुरुषीयत्वनिवेशे गौरवात्।

Colophon:

इति **आकाङ्क्षावादः समाप्तः**।

1290

68078(e) **आश्रयत्ववादः**

Beginning:

जानाति चैत्र इत्यादौ आश्रयत्वे लक्षणा दीधितिकृदुदीरिता। चैत्रो ग्रामं गच्छति, पचति चैत्र इत्यादौ आख्यातस्य कृतिवाचकत्वसाधनात् ग्रामकर्मकगमनानुकूलकृतिमानित्यादिराख्यातार्थप्रकारकशाब्दबोध इति सर्वे तान्त्रिकाः। जानातीच्छतीत्यादावाश्रयत्वसंसर्गकधात्वर्थप्रकारकचैत्रादिविशेष्यकशाब्दबोध इति चिन्तामणिकृन्मतानुयायिनः। जानातीत्यादौ आश्रयत्वे लक्षणाभ्युपगमात् आश्रयत्वप्रकारकचैत्रादिविशेष्यकशाब्दबोध इति दीधितिकृन्मतानुयायिनः। चैत्रः पचति तण्डुलम् इत्यादौ कर्मतासंबन्धेन तण्डुलस्य पाके अन्वयवारणाय नामार्थनिष्ठाभेदातिरिक्तसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबन्धेन हेतुत्वमस्तु।

End:

एवं च चैत्रेण ज्ञायते इत्यत्राधेयत्वरूपतृतीयार्थस्य चैत्रविशेष्यकत्वात् चैत्रो जानातीत्यत्राधेयतानिरूपकतारूपाधारतायाश्चैत्रांशे प्रकारतासिद्धयर्थमाख्यातस्याश्रयत्वार्थकत्वमावश्यकम्। न च चैत्रेण ज्ञायत इत्यत्राधेयत्वं संसर्ग एव, न तु विशेषणमिति वाच्यम्। तथा सति आत्मना ज्ञायते न घटेनेत्यत्र घटादिवृत्तित्वाभावबुद्धेरनुपपत्तेः। आधेयत्वस्य तृतीयार्थतायाविरहेण तृतीयान्तार्थघटादिवृत्तित्वरूपप्रतियोग्यनुपस्थितेः। आधेयत्वसंबन्धस्य प्रतियोगितावच्छेदकतया तत्संबन्धावच्छिन्नघटाभावबोधस्य तत्रोपगमासंभवात्। अत एव **मणिकृता** चैत्रः पचतीत्यादौ कृतिमत्त्वरूपकर्तृत्वादेराख्यातार्थतां स्वीकृत्य प्रकारता स्वीकृता, न तु संसर्गता। न पचति चैत्र इत्यादौ अन्वयबोधानिर्वाहात् तादृशसंबन्धस्य वृत्त्यनियामकतया अभावप्रतियोगितानवच्छेदकत्वेन तत्संबन्धावच्छिन्नक्रियाविरहप्रत्ययस्य तत्रोपगमासंभवात्। तस्माज्जानातीत्यादावाख्यातस्याश्रयत्वे लक्षणेति सिद्धम्।

1291

68078(b) **आसत्तिवादः**

Beginning:

गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादौ अनासन्नगिर्यग्निमदादिपदार्थयोः परस्परमन्वयबोधानुदयादासत्तेरन्वयबोधोपयोगिताङ्गीकरणीया । तत्रासत्तिरेकपदार्थोपस्थित्यव्यवहितापरपदार्थोपस्थितिः । गिरिर्भुक्तमित्यदौ गिर्यादिपदानामुच्चारणक्रमेणैव ज्ञानात्तादृशक्रमेणैव पदार्थानामुपस्थितेः गिरिपदार्थोपस्थित्यग्निमत्पदार्थोपस्थित्योरव्यवहितत्वाभावात् न तत्रासत्तिः । न च गिरिरग्निमानित्यादौ यत्र गिरिपदज्ञानात् गिरेरुपस्थितिः तदनन्तरमग्निमत्पदज्ञानात् अग्निमदुपस्थितिः तत्रासत्त्यनुपपत्तिः, पदज्ञानेनोपस्थित्योर्व्यवधानादिति वाच्यम् ।

End:

एतन्मते च पदविषयकज्ञानजन्यतत्तदर्थोपस्थितिविशिष्टशाब्दबोधे तादृशोपस्थितित्वेन, पदज्ञानाजन्यतत्तदर्थोपस्थितिविशिष्टशाब्दबोधे च तथाविधोपस्थितित्वेन हेतुता । शाब्दबोधोत्पादकसामग्री च द्विविधा । एका पदज्ञानजन्ययावदर्थोपस्थितिघटिता । अपरा च पदज्ञानाजन्ययावत्पदार्थोपस्थितिघटिता । तज्ज्ञानघटितसामग्र्यां च पदजन्योपस्थितेर्न निवेशः, अतो यत्र पदात् केषांचित्, केषांचिच्चानुमानादितो यत्रोपस्थितिस्तत्र तन्मतेन शाब्दबोधः । न च पदज्ञानाजन्यपदार्थोपस्थितिघटितायाः सामग्र्या आवश्यकत्वे गौरवं सांपातिकं सामग्र्यन्तरकल्पनमफलमिति वाच्यम् । उक्तस्थले श्वेतोऽश्वो धावतीत्यपि प्रकारान्तरेणानिर्वाह्यात्तादृशसामग्र्यन्तरकल्पनस्यावश्यकत्वादिति । तदसत् । उक्तस्थले यथाकथंचिदनुमानादित एव श्वेतोऽश्वो धावतीत्यादिबोधोपपत्तेः शाब्दसामग्र्यन्तरकल्पनाया अयुक्तत्वात् । तादृशबोधानन्तरं शृणोमीत्याद्यनुव्यवसायस्यासिद्धत्वादिति । तस्मात् पदवृत्तिज्ञानजन्या पदार्थोपस्थितिरेव शाब्दबोधाङ्गमिति स्थितिः ।

Colophon:

इत्यासत्तिविचारः ।

1293

69198(d) **ईश्वरवादः**

Beginning:

ननु क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत्, घटे कार्यत्वरूपहेतुर्वर्तते सकर्तृकत्वलक्षणसाध्यमप्यस्ति । एवं क्षित्यादिकं पक्षीकृत्य कार्यत्वेन हेतुना सकर्तृकत्वे साध्ये ज्ञानचिकीर्षाकृतिमदीश्वरः अस्मादनुमानात् सिध्यति । न च हेतुरस्तु साध्यं मास्तु इत्यप्रयोजकत्वात् नेदमनुमानं साध्यसाधकमिति वाच्यम्; घटादिरूपकार्यविशेषकुलालादिरूपकर्तृविशेषयोः अन्वयव्यतिरेकाभ्यां कार्य-

कारणभावग्रहात्। द्वयोर्विशेषयोः यः कार्यकारणभावः बाधकं विना स सामान्ययोरपीति न्यायेन कार्यत्वावच्छेदेन कर्तुः कारणत्वेन कृतया कृतकारणं विना कार्यानुपपत्तिलक्षणबाधकसद्भीचीनतया अप्रयोजकत्वशङ्काया अनवकाशात्।

End:

न चैवं पूर्वोक्तशरीरगौरवत्रयं तवापि तुल्यमिति वाच्यम्; नानात्वगौरवापेक्षया शरीरगौरवस्याभ्यर्हितत्वेनादोषत्वात्। अत एव घटत्वादीनां जातिरूपतया लघुत्वेऽपि तच्छरीरलाघवं तिरस्कृत्य कार्यत्वसकर्तृकत्वयोरुपाधिरूपतया गुरुत्वेऽपि कर्तृजन्यतायां कार्यत्वं शरीरजन्यतायां सकर्तृकत्वमवच्छेदकमित्युभाभ्यामावाभ्यां कल्प्यते। ततश्चैकस्यैव कार्यस्य ज्ञानादिजन्यतावच्छेदकत्वमिति एकत्वलाघवचतुष्टयमिति एकत्वलाघवप्रबलसद्भीचीनतया सकर्तृकत्वानुमानस्य प्रबलत्वात् निष्प्रतिपक्षसत्कर्तृकत्वानुमानेन ईश्वरसिद्धिरप्रतिहतैव।

पक्षीकृत्याङ्कुरादि प्रतिहतविमतापादितोपाधिभेदं
कार्यत्वं हेतुमेत्य प्रबलतरमहालाघवं चाभिधाय।
दूरीकृत्यान्यदोषानभिहितमुदढप्रक्रियाव्याक्रियाभिः
विद्वद्भिर्न्यायशास्त्रे स च खलु जगतः साध्यते कर्तृभावः॥

Colophon:

ईश्वरवादः समाप्तः।

1294

PM1637(a) उपसर्गद्योतकत्वखण्डनवादः

Beginning:

ननु प्राद्युपसर्गो द्योतको बोधको वेति चेत् अत्रान्यानुयायिनः। प्राद्युपसर्गो द्योतक एव न बोधकः। द्योतकत्वं च प्रकृष्टप्रक्रियायां तात्पर्यग्राहकत्वम्। अत एव प्रणम्येत्यत्र भक्तिश्रद्धातिशयलक्षणप्रकर्षः प्रशब्देन द्योत्यत इति द्रव्यकिरणावल्यामाचार्यचरणाः। इत्थं च प्रणमतीत्यादौ नमादिधातोरेव लक्षणया प्रकृष्टनमस्कारादिकमर्थः। प्राद्युपसर्गस्तु धातोस्तत्र तात्पर्यग्राहक इति प्राहुः। कन्दलीकारप्रभृतयस्तु प्रशब्दस्यैव प्रकर्षोऽर्थः। धातोश्च नमस्कारादिकमर्थः। एतयोर्वैशिष्ट्यं तु संसर्गमर्यादया लभ्यम्। अव्ययातिरिक्तनामार्थस्यैव धात्वर्थनमस्कारादावन्वयस्य व्युत्पन्नत्वात्। अन्यथा न कलञ्जं भक्षयेदित्यादौ परनये कलञ्जभक्षणाभावविषयकं कार्यमित्यन्वयो न स्यात्।

End:

दुर्गलिखितस्य युक्तिविरुद्धत्वेन अनुपादेयत्वादित्याचार्यानुयायिमतमेव साधु। न च तादृशोपसर्गमात्रस्य बोधकत्वे व्यतिसे इत्यत्र धात्वभावे उपसर्गमात्रात् कथमर्थप्रत्ययः,

तत्रास्तेरादेः 'श्नसोरल्लोपः' इत्यनेनाकारस्य, 'तासस्त्योर्लोपः' इत्यनेन च सकारस्य लोपादिति वाच्यम्। ह्रुधातुस्मरणादेव तत्रार्थप्रत्ययात्। धातुरूपमजानतः तत्र अर्थप्रत्ययाभावादिति संक्षेपः।

Colophon:

उपसर्गाणां द्योतकत्वखण्डनवादः।

1295

PM1556(a) **एवकारवादः**

Beginning:

एवकारस्यात्यन्तायोगायोगान्ययोगानां प्रत्येकं व्यवच्छेदोऽर्थः। अत्र नीलं सरोजं भवत्येवेत्यादौ सर्वत्र क्रियासंगतैवकारस्थले अत्यन्तायोगव्यवच्छेदः। शङ्खः पाण्डर एवेत्यादौ सर्वत्र विशेषणसंगतैवकारस्थलेऽयोगव्यवच्छेदोऽर्थः। पार्थ एव धनुर्धर इत्यादौ सर्वत्र विशेष्यसंगतैवकारस्थले अन्ययोगव्यवच्छेदोऽर्थः। इत्थं चैवकारार्थेऽत्यन्तायोगव्यवच्छेदकबोधनैवकारस्य क्रियासंगतत्वं, तत्र अयोगव्यवच्छेदबोधने विशेषणसंगतत्वं नियामकमुक्तं, अत्यन्तायोगव्यवच्छेदकत्वं नीलं सरोजं भवत्येवेत्यादौ नीलभवनायोगव्यवच्छेद एवार्थः, अन्यस्य दुर्वचत्वात् कथमेवकारस्य व्यक्तित्रयमिति चेत्, सत्यं, य एवायोगव्यवच्छेदः स एवात्यन्तायोगव्यवच्छेदः, परं तु एकस्यैव अत्यन्तायोगव्यवच्छेदायोगव्यवच्छेदरूपपरिभाषाभेदमात्रम्।

End:

रूपं पृथिव्यां वर्तत एवेत्यादौ आख्यातस्याश्रयलक्षणया पृथिवीनिरूपितवृत्तित्वाश्रयान्वयिबोध्यव्यवच्छेदरूपसामानाधिकरण्येनेति ... अन ... मन्वयमादाय ... एवकारः न कुत्रापि शक्तः। किंतु तात्पर्यग्राहकः। पृथिव्यामेवेत्यादौ च कुत्रचित् पदे लक्षणया पृथिव्यन्यसमवेतत्वव्यवच्छेदादि प्रतीयत इति ... वकारः। श्वेत एवायं भ्रान्त इत्यादौ इदंपदार्थे चैत्रजनकजन्यतदवच्छेदकीभूतेतरवृत्तिधर्मविशिष्टा या ... न्यत्र जनकजन्यतदवच्छेदकस्य बोधो भवति। वैशिष्ट्यं च स्वावच्छिन्नप्रतियोगिताकभेदवा ..... त्वसंबन्धेन बोध्यम्। व्युत्पत्तिवैचित्र्या ..... चान्ययोगः। व्युत्पत्तिभङ्गस्तु ...

Colophon:

इत्येवकारवादः।

1296

66831(b) **एवकारवादः**

Beginning:

ननु पदार्थाः सन्तीवेत्यत्र एवकारार्थो विचार्यते। स ह्यष्टमपदार्थनिषेधो वा, न्यूनसंख्याव्यवच्छेदो वा। अधिकसंख्याव्यवच्छेदो वा, अयोगव्यवच्छेदो वा, अन्ययोगव्यवच्छेदो वा,

अत्यन्तायोगव्यवच्छेदो वा, स्वसमभिव्याहृतपदार्थतावच्छेदकनिरूपितेतरपदार्थतावच्छेदकनिष्ठ-व्याप्यत्वं वा। नाद्यः, सद्धर्यामेवाधिकरणप्रतियोगिभ्याममावो न निरूप्यत इति न्यायेन प्रतियोगि-प्रसिद्धेर्निषेधबुद्धिं गतया निषेध्याष्टमपदार्थाप्रसिद्धया अवधारणेन अष्टमपदार्थनिषेधायोगात्। अष्टमपदार्थप्रसिद्धौ तु तत एव निषेधायोगः।

End:

तथा हि। अत्यन्तायोगव्यवच्छेद इत्यत्र अत्यन्तपदमयोगपदेन संबध्यते वा। व्यवच्छेदपदेन वा। आद्ये अत्यन्तपदस्य अत्यन्तदुःखनिवृत्तीत्यादौ साकल्यार्थतायाः प्रसिद्धत्वात् साकल्येन सरोजे यो अयोगः, सरोजत्वावच्छेदेनायोग इति यावत्, तस्य व्यवच्छेद इति पर्यवसितोऽर्थः। स च अशक्यवचनः। सरोजत्वावच्छेदेन नैल्यायोगप्रतियोगिनः प्रसिद्धौ सरोजे तन्निषेधायोगात्। अप्रसिद्धौ प्रतियोग्यप्रसिद्धया निषेधायोगात्। द्वितीये नैल्यायोगस्य सरोजे साकल्येन व्यवच्छेदः सर्वविधसरोजे तस्य व्यवच्छेद इति पर्यवस्यति। स च अनुपपन्नः श्वेतसरोजे नैल्यायोगस्य प्रत्यक्ष-सिद्धत्वात्। तस्मात् सर्वत्रान्ययोगव्यवच्छेद एव एवकारार्थः इति वदन्ति। तन्न। एवं सति पदार्थाः सत्तैव प्रमेयं वाच्यम्। वाच्यमेवेत्यादावसंगत्यापत्तेः। तत्र हि सत्तान्यतमोपाधिमदन्यस्मिन्पदार्थत्वा-योगव्यवच्छेदः, वाच्यान्यस्मिन्प्रमेयत्वायोगव्यवच्छेदोऽवधारणार्थतया वाच्यः। स चायुक्तः। सत्तान्यतमोपाधिमदन्यस्य वाच्यान्यस्य चाप्रसिद्धत्वात्। तस्मादेवकारः किमस्तीति चिन्त्य इति दिक्।

Colophon:

इत्येवकारवादः समाप्तः।

1307

PM1677 कालसर्वाधारताविचारः

Beginning:

जगदाधारः काल इति प्राञ्चः। तच्चिन्त्यम्। कालस्य जगदाधारत्वे मानाभावात्। न चेदानीं जगदिति प्रतीत्या जगदाधारत्वं सिद्धमिति वाच्यम्। तादृशप्रतीतेः कालजगतोः संबन्धविषयकत्वेन तदधिकरणविषयत्वाभावात्। अन्यथा कालस्य सर्वाधारत्वे घटत्वपटत्वाद्यधिकरणत्वेन घटपटादिशब्द-वाच्यत्वप्रसंगात्। तत्पदप्रवृत्तिनिमित्ताधिकरणत्वस्य तत्पदवाच्यत्वप्रयोजकत्वात्। न च समवायेन तत्पदप्रवृत्तिनिमित्ताधिकरणत्वं तत्पदवाच्यत्वे प्रयोजकम्, न तु तत्पदप्रवृत्तिनिमित्ताधिकरणत्वमात्रं, अतो न दोष इति वाच्यम्, एवं सति समवायादीनां समवायपदवाच्यत्वानुपपत्तेः।

End:

अपि च सर्वाधारत्वं महाकालस्य लक्षणं वा (क्षणा)दिकालस्य वा। नाद्यः। इदानीमिति प्रतीतेः क्षणकालत्वविषयत्वेन महाकालविषयत्वामावात्। अन्यथा इदानीं घट इति प्रतीतौ घटे-ष्वसाधनज्ञानेन च घटप्रत्ययानापत्तेः। तद्घटज्ञानस्य महाकालविषयत्वेन एतत्कालावच्छिन्नत्वरूप-

वर्तमानत्वावगाहित्वाभावेन विषयसत्तारूपनिश्चयत्वाभावात् । न द्वितीयः, इदानींकालस्य क्षणरूपस्य क्षणान्तरकालेन पदार्थान्तराधिकरणत्वादिदानींकालस्य घटतदभावोभयाधिकरणत्वे इदानींकाले घटो नास्तीत्यापत्तेश्च । तस्मात् कालस्य सर्वाधिकरणत्वं संसर्गत एवेति प्राचां पक्षो दक्ष इति दिक् ।

Colophon:

कालस्य सर्वाधारताविचारः समाप्तः ।

1308

PM1679 **चित्ररूपवादः**

Beginning:

स्ववृत्तिचित्रत्वातिरिक्तरूपत्वादिभिन्नविचित्रत्ववद्रूपे सत्त्वात् । साहित्यं च स्वसमानाधिकरण-द्रव्यसामानाधिकरण्यम् । अथ चित्रत्वावच्छिन्नं प्रति रूपत्वेनैव हेतुता; प्रत्यासत्तिश्च स्वविजातीय-रूपसामानाधिकरण्यविशिष्टस्वसामानाधिकरण्यं, वैजात्यं च पूर्वनिरुक्तमेव, अतो न पूर्वोक्तानुपपत्तिः इति वाच्यम् । स्वत्वघटितत्वेनाननुगमात् । तदनिवेश्य वृत्तिमच्चित्रत्वातिरिक्तजातिभिन्नजातीयत्वनिवेशे च वृत्तिमत्त्वस्याप्रयोजकतया चित्ररूपमात्रस्यैव तथात्वेन नीलपीतादिस्थले चित्ररूपानुत्पादप्रसंगात् । एतेन रूपत्वेनानुगतस्वपदार्थनिवेशोऽपि प्रत्युक्तः ।

End:

न चानन्तपुरुषभेदेनानन्तसंनिकर्षस्य कारणतायास्त्वन्मतेऽवच्छेदकगौरवात् स्वावच्छेदकता-नियामककतिपयकारणतानां मन्मते आधिक्येऽपि न गौरवावकाश इति वाच्यम् । उत्पत्तिनियामक-कार्यकारणभावलाघवेन चित्ररूपसिद्धौ संनिकर्षस्य कारणताकल्पनस्योदीच्यतया न गौरवम् । व्याप्यवृत्तिमते नीलादिभेदेन पुरुषभेदेन भिन्नसंनिकर्षहेतुताया बाहुल्यादव्याप्यवृत्तिमतमेव साधीय इति दिक् ।

चित्रवादस्तु सचित्रो **हरिराम**विचित्रितः ।
. . . . . लिखापयत् ॥

Colophon:

इति श्रीन्यायालंकारतर्कवागीश **हरिरामभट्टाचार्य**विरचितश्चित्ररूपवादः समाप्तिमगमत् ।

1309

73880(d) **चित्ररूपविचारः**

Beginning:

प्रत्यक्षविलक्षणप्रतीतिबलादपि चित्ररूपसिद्धिः । तादृशप्रत्ययस्य नीलाद्यवलम्बनत्वे नीलो घट इत्यादिप्रत्ययात् तद्वैलक्षण्यानुपपत्तिः । एतेन चित्रस्पर्शोऽपि व्याख्यातः । चित्रत्वावच्छिन्नं प्रति

च अवयवनीलादीनां न रूपत्वेन हेतुता केवलनीलाद्यारब्धेऽपि तदुत्पादप्रसंगात्। नापि नीलत्व-पीतत्वादिना पीतशुक्लादिजन्यचित्रे व्यभिचारात्। परं तु नीलेतररूपत्वपीतेतररूपत्वादिना। केवलनी-लादिमदारब्धे च नीलेतररूपाद्यात्मककारणविरहान्न चित्रप्रसंगः। नीलपीताद्यारब्धे नीलेतररू-पाद्यात्मककारणतावच्छेदकाक्रान्तस्य पीतस्य पीतेतररूपाद्यात्मककारणतावच्छेदकाक्रान्तस्य नीलस्य रक्तेतररूपाद्यात्मककारणतावच्छेदकाक्रान्तस्य च तदुभयस्यैव सत्त्वात् न चित्राद्यनुपपत्तिः।

End:

एतेन नानाजातीयरूपवदारब्धावयविनि रूप एव न चाक्षुषत्वप्रसंगो बाधकः, रूपस्य चाक्षुषत्वहेतुत्वे मानाभावात्। न चैवं सति गगनादीनां चाक्षुषत्वप्रसंग इति वाच्यम्, गगनाद्ये-कत्वव्यावृत्तजातिविशेषं कल्पयित्वा चाक्षुषं प्रति विजातीयैकत्वेन हेतुत्वोपगमात् तादृशकारण-विरहादेव गगनादीनां चाक्षुषत्वासंभवात्। एवं चानुद्भूतरूपवतां चक्षुरादीनां परमाण्वादेश्च चाक्षुषत्ववारणायानुद्भूतरूपाभावानां महत्त्वस्य . . .

1330

PM1650 नियोज्यान्वयविवरणम्

Beginning:

. . . प्रकारीभूतं कार्यत्वमेव न तु कार्यमिति भावः। वस्तुतः स्वर्गकामो यजेतेति विधिप्रति-पाद्यप्रवर्तकज्ञानप्रकारत्वेन पक्षता। अतो मङ्गलं कुर्यादित्यादिकामनामादाय न दोषः। न चौपादा-निकक्रियाकार्यत्वं बोधमादाय सिद्धसाधनम्। अनुपपत्तिज्ञानाजन्यत्वस्यापि ज्ञाने विशेषणीयत्वात्। विज्ञजन्यत्वमपि विशेषणम्। तेन क्रिया स्थिरेति भ्रमवतो बोधमादाय न दोषः। यद्यपि यदेव कार्यत्वम् अनुपपत्तिज्ञानजन्यज्ञाने प्रकारः तदेवानुपपत्तिज्ञानजन्यक्रियायां प्रकारः, तदुभयनिष्ठकार्यत्व-स्यैकत्वात्, तथापि तादृशप्रवर्तकज्ञानप्रकारीभूतो यो धर्मः सोऽनुपपत्तिज्ञानाजन्यज्ञानीयक्रियानिष्ठ-विशेष्यतानिरूपितप्रकारताश्रयो न वेति बोध्यम्।

End:

एवं चापूर्वोपस्थितौ तस्य यागनिष्ठकार्यत्वान्वयः, यागनिष्ठकार्यत्वोपस्थितौ चापूर्वे कार्यत्वान्वयः इत्यन्योन्याश्रय इति वदन्ति। तन्न समीचीनम्। प्रथमं यागविषयकं कार्यमित्येवान्वयबोधात्, न तु स्वर्गकामस्य नियोज्यतया तत्र भानम्। एवं च यागविषयककार्योपस्थितौ तद्द्वारा यागे स्वर्गसाध-नत्वबोधात् स्वर्गकामनियोज्यको यागः कृतिसाध्य इति द्वितीयो बोधः। ततः स्वर्गकामो यागकर्तेति तृतीयो बोधः। मदंशोपरागेण बोधे तु उक्तैव गतिः।

Colophon:

इति श्रीन्यायवाचस्पतिभट्टाचार्यविरचितं **नियोज्यान्वयविवरणं** समाप्तम्।

वाचस्पतिनिर्णीतः समन्वयोऽयं नियोज्यात्मा।
पुस्तकलालसमनसो विदुषो मनसोऽस्तु तोषाय॥

The scribe adds:

श्रीवृन्दावनविहारिणे बालवेषिणे नमः

गुणानामज्ञाता प्रचुरधनदातापि न मुदे
मुदे विद्याज्ञाता भवति मितदातापि गुणिनाम् ।
दृशौ ग्राम्या दत्ते न पुनरवधत्ते हि चतुरो
दृशः कोणं दत्त्वा सुखयति नितान्तं कुलवधूः ॥

1331

69198(c) **निर्विकल्पकवादार्थः**

Beginning:

गौरिति विशिष्टप्रत्यक्षं विशेषणज्ञानजन्यम्, विशिष्टप्रत्यक्षत्वात्, दण्डीति विशिष्टप्रत्यक्षवत् इत्यनुमानान्निर्विकल्पकसिद्धिः। नन्वप्रयोजको हेतुः आवश्यकेन्द्रियसंनिकर्षादिनैव विशिष्टप्रत्यक्षोत्पत्तौ विशेषणज्ञानस्य हेतुत्वे मानाभावात्। न च विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वात् यद्विशेषयोरितिन्यायेन विशिष्टज्ञानमात्रे विशेषणज्ञानस्य हेतुत्वमिति वाच्यम्। विशेष्ये विशेषणं, तत्र च विशेषणान्तरमिति न्यायेन विशिष्टवैशिष्ट्यज्ञानोपपत्तौ व्यभिचारेण विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वे मानाभावात्। भावे वा विशेषणतावच्छेदकप्रकारकज्ञानस्य प्रसिद्धदण्डविषयकत्वेन दण्डीत्यादिज्ञानविषयीभूतविशेषणविषयकत्वाभावेन यद्विशेषयोरिति न्यायानवतारात्।

End:

न चैवं विशेषणज्ञानस्यापि हेतुत्वं न स्यात्, विशेषणसंनिकर्षादेर्विशिष्टज्ञानोपपत्तौ तत्रापि यद्विशेषयोरितिन्यायानवतारादिति वाच्यम्, नोक्तन्यायेन तस्य हेतुत्वं ब्रूमः। किं तु प्रकारान्तरेण। तथाहि—अभावरूपसप्रतियोगिकपदार्थज्ञाने प्रतियोगिज्ञानं तावत् हेतुः। तथा च तत्र लाघवात् प्रतियोगिपदार्थत्वावच्छिन्न एव तस्य हेतुत्वकल्पनात्, विशिष्टज्ञाने च विशेषणप्रतियोगिकसंबन्धभाननियमाद् विशेषणज्ञानहेतुत्वसिद्धिः। न च तत्र प्रतियोगिज्ञानमात्रं न हेतुः। किं तु प्रतियोगितावच्छेदकप्रकारकज्ञानम्। अन्यथा निर्विकल्पकादप्यभावधीप्रसंगात्। एवं च विशेषणनिर्विकल्पकं न प्रतियोगितावच्छेदकप्रकारकम्।

1333

PM1688 **पक्षतावादः**

Beginning is same as in MD 4260 and TD 6631.

End:

एवं च तादृशसिद्धिकाले बाधबुद्धावसत्यां प्रत्यक्षादिवारणाय तादृशसिद्ध्यभावमनिवेश्य तथाविधबाधाभावं निवेश्यापरप्रतिबन्धकत्वं कल्पनीयम्। तत्र च प्रत्यक्षादिस्वीकारो न संभवति।

अवच्छेदकावच्छेदेनानुमितेः सामग्रीसत्त्वात् तादृशानुमितेरेवोत्पत्तेः। यथा तु सिद्धयभावं तादृशबाधाभावं निवेश्य तादृशपरामर्शघटितसामग्र्या एकमेव प्रतिबन्धकत्वं कल्प्यत इति। एवं लाघवज्ञानजन्यया पर्वतो महानसीयवह्निमानित्याकारकानुमितौ पर्वतो वह्निमानित्येतादृशसिद्धेरविरोधित्वमते वह्नेर्महानसीयत्वे लाघवमित्यादि लाघवज्ञानघटितशुद्धवह्निमत्वावच्छिन्ननिरूपितव्याप्यवगाहिपरामर्शानुपठितानुमितिसामग्र्या प्रतिबन्ध्युत्तरं दिङ्नामादिपर्यन्तं ज्ञानान्तरानुत्पादप्रसङ्गात् तस्य चानुभवविरुद्धत्वादित्यवधेयम्।

Colophon:

इति **पक्षतविचारः**।

After the colophon:

कालभैरवहट्टे तु वाराणस्यां हि पुस्तकम्।
रौप्यार्धं चैव दत्त्वा तु गृहीतं श्रीप्रसादतः॥
यज्ञेश्वरेण विप्रेण नाम्ना ओतिवेन च?।
यः करोत्यस्य हरणं तस्य नाशः सदा भवेत्॥

1338

69198(o) **परामर्शवादार्थः**

Beginning:

पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः। अत्र मीमांसकाः—व्याप्यतावच्छेदकप्रकारकव्याप्तिवैशिष्ट्यज्ञानं, तत्प्रकारकपक्षधर्मताज्ञानमनुमितिहेतुः। ननु पक्षधर्मस्य व्याप्तिवैशिष्ट्यज्ञानं पक्षधर्मताज्ञानानन्तरं व्याप्तिस्मरणस्थलेऽपि तद्द्वयासिद्धविशिष्टज्ञानकल्पनागौरवादिति चेन्न। व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्यत्वप्रकारकत्वस्य लघुत्वेन कारणतावच्छेदकतया व्याप्तिवैशिष्ट्यविषयकपक्षधर्मताज्ञानस्यैव हेतुत्वौचित्यात्। अत एवोक्तलाघवसहायेनान्वयव्यतिरेकसहकृतप्रत्यक्षेणानुमितित्वावच्छिन्नं प्रति विशिष्टज्ञानकारणतासिद्धावुत्तरकालमन्यत्रापि कार्यानुपपत्त्या विशिष्टज्ञानकल्पनमिति प्रमाणमूलकत्वेन कल्पनागौरवस्यादोषत्वम्। न चानुमितेः प्राक् परामर्शाभावेन उक्तावच्छेदकद्वयस्य एकधर्मिगतत्वाभावे युगपदुपस्थित्यभावेन त्वदुक्तलाघवानवतार इति वाच्यम्। व्याप्तिस्मरणानन्तरं यत्र पक्षधर्मताज्ञानं तत्रोपनीतव्याप्यत्वस्य धूमत्वस्य पक्षधर्मवैशिष्ट्यज्ञानसंभवेन उक्तावच्छेदकयोर्युगपदुपस्थितौ लाघवावतारे विरोधाभावात्।

End:

न च मनःसंयुक्तसमवायत्वं जातिघटितमपि विशेषत्वात् गुरु। इन्द्रियसंयुक्तसमवायत्वमुपाधिघटितमपि सामान्यत्वात् लघु। ततश्च कारणतावच्छेदकलाघवं पुरस्कृत्य द्रव्यसमवेतप्रत्यक्षमात्रे इन्द्रियसंयुक्तसमवायो हेतुरिति सामान्यतः कारणता कल्पिता, न तु कार्यतावच्छेदकलाघवप्राबल्यं

पुरस्कृत्येति वाच्यम्। गुरुशरीरसमानलाघवापेक्षयानुगतविशेषशरीरलाघवस्यैव बलीयस्त्वात्। अत एवाख्यातवाच्यतावच्छेदकं विशेषभूतमपि यत्नत्वमेव। न तु सामान्यमपि व्यापारत्वमिति सिद्धान्तः। तस्मादिन्द्रियसंयुक्तसमवायमात्रस्य सामान्यतो हेतुत्वे कारणतावच्छेदकगतं न किंचित् विनिगमकम्। किंतु कार्यतावच्छेदकलाघवप्राबल्यमेव। एवमत्रापि धूमलिङ्गकानुमितित्वापेक्षया वह्न्यनुमितित्वकार्यतावच्छेदकस्य लाघवानुरोधेन व्याप्यत्वप्रकारकज्ञानमेवानुमितिहेतुः।

1340

PM1687(a) प्रतिबध्यप्रतिबन्धकताविचारः

Beginning:

. . . त्स्यादेके, यदि तथा च व्याप्यवत्तानिर्णयस्य प्रत्यक्षानुमित्यादिसाधारणालौकिकान्यवद्विशिष्टबुद्धित्वावच्छेदेन प्रतिबध्यता कल्पयितुं शक्यते, तदेव च न। इच्छाया उत्तेजकत्वानुरोधेन विशिष्टलौकिकान्यवत्प्रकारकचाक्षुषत्वावच्छेदेनैव तथात्वस्य कल्पनीयत्वात्। तथा हि तदभावव्याप्यवत्तानिर्णये सत्यपि सत्यां तत्प्रकारकचाक्षुषादिगोचरेच्छायामाहार्यतत्प्रकारकचाक्षुषाद्युत्पत्त्या इच्छाया उत्तेजकत्वमवश्यं स्वीकरणीयम्।

तत्र च चाक्षुषस्पार्शनादिगोचरनिखिलेच्छायाः तत्प्रकारकज्ञानगोचरेच्छात्वेन, तत्प्रकारकप्रत्यक्षगोचरेच्छात्वेन वा उत्तेजकत्वं यदि स्वीक्रियते तदा पर्वतो वह्न्यभावव्याप्यवानित्याद्याकारकनिर्णयदशायां पर्वते वह्निस्पार्शनं जायतामित्याकारकेच्छासत्वेऽसत्यां स्पार्शनादिसामग्र्यां पर्वतो वह्निमानित्यादिचाक्षुषापत्तिः।

End:

अपि च तदभावव्याप्यवत्ताज्ञानादिप्रतिबध्यतावच्छेदकं यदि विशेष्ये विशेषणमिति रीत्या वह्न्यादिविशिष्टबुद्धित्वं तदा नित्यसाधारणप्रसंग इति जन्यत्वमपि तत्राधिकं निवेशनीयम्। तथा च विनाशित्वस्य कालिकसंबन्धेन घटादिमत्त्वस्य च निवेश्यतया विनिगमनाविरहेण कार्यकारणभावानान्त्यप्रसंगः, तन्निवेशेनापि नित्यसाधारण्यस्य चारोपितुं शक्यत्वात्। अतस्तादृशचाक्षुषत्वादीनामेव प्रतिबध्यतावच्छेदकत्वमुचितमिति संशयानुमितिः निरावाधैव। अथालौकिकसंनिकर्षजन्यबुद्धौ व्यभिचारवारणायावश्यनिवेशनीयस्य लौकिकविषयताजन्य . . .

1341

69963(g) प्रमाणतत्त्वविवेचनम्

Beginning:

मोक्षजनकसाक्षात्कारविषयषोडशपदार्थमध्ये प्रमाणपदार्थस्य सर्वाभ्यर्हितत्वात् प्रमाणतत्त्वमत्र विविच्यते। यद्यपि षोडशपदार्थज्ञानमेव मोक्षकारणम्। तच्च प्रमाणनिरूपणमात्रेण न जायत इति न

तद्द्वारा तस्य फलवत्त्वम्। न च प्रमाणस्यापि षोडशपदार्थमध्यप्रविष्टतया तज्ज्ञानमपि मोक्षकारणमिति तज्जनकप्रमाणनिरूपणं सफलत्वाद्युक्तं पाकसामग्रीमध्यप्रविष्टवह्न्यर्थिनः काष्ठादौ प्रवृत्तिदर्शनादिति वाच्यम्। प्रमाणादिसकलपदार्थज्ञानस्यैव इष्टसाधनत्वबलवदनिष्टाननुबन्धित्वादिविषयकज्ञानस्य प्रवृत्तिं प्रतीव समूहालम्बनरूपज्ञानस्य मोक्षजनकतया तज्जनकभूततावत्पदार्थनिरूपणस्य सफलतया केवल-प्रमाणनिरूपणस्य निष्फलत्वात्।

End:

न च तत्त्वज्ञानप्रामाण्ये अनुमितिग्राह्यत्वेन सिद्धसाधनवारणे तत्प्रामाण्यानाश्रयत्वस्य तृतीय-ज्ञानविशेषणस्य वैयर्थ्यमिति वाच्यम्; प्रामाण्यग्राहकलिङ्गाप्रयोज्येत्यत्र ज्ञाने ज्ञेयपदार्थतत्त्वस्य प्रामाण्यविशेषणत्वेन ज्ञान .... नुमितौ विशिष्टाभावसत्त्वेन सिद्धसाधनवारणाय प्रामाण्यानाश्रय-त्वस्य तृतीयज्ञानविशेषणस्यापेक्षितत्वात्। न च ज्ञानत्ववत्त्वाघटितेति व्यर्थम् ज्ञानत्ववत्त्वाघटित-प्रामाण्यग्राहकलिङ्गाप्रयोज्यत्वस्याखण्डोपाधितया विवक्षितत्वेन वैयर्थ्याभावात्। प्रथमज्ञानपदं च ज्ञानत्ववत्त्वघटितप्रामाण्ये व्यवहारलिङ्गकानुमितिग्राह्यत्वेनार्थान्तरवारणायेत्याहुः।

1342

66358(d) प्रमात्वविचारः

Beginning:

स्वव्यधिकरणप्रकारत्वावच्छिन्ना या या विषयता तत्तदनिरूपकत्वं प्रमात्वमित्यस्य स्वाधिकरणा-वृत्तिपदार्थनिष्ठप्रकारतानिरूपितविशेष्यत्वानिरूपकत्वमित्यर्थो वाच्यः। स्वाधिकरणनिरूपितवृत्तित्वं तु प्रकारतावच्छेदकसंबन्धेनावश्यं वाच्यम्। अन्यथा ह्रदो वह्निमानिति ज्ञानस्यापि प्रमात्वापत्तेः। कालिकसंबन्धेन ह्रदे वह्नेः सत्त्वात्। तथा च जातिः सत्तावतीति समवायेन सत्ताप्रकारकभ्रमस्य तादृक्प्रमात्वापत्तिः। जातिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धया स्वपदेन जातिनिष्ठविशे-ष्यताया धर्तुमशक्यत्वात्। गुणो विशिष्टसत्तावानित्यस्यापि तादृशप्रमात्वापत्तिश्च। विशेष्यवृत्तिधर्मस्य विशिष्टानुयोगिकत्वाभावानङ्गीकारात्। विशिष्टसत्तायां गुणवृत्तित्वस्याक्षतत्वात्। नापि स्वानधिकरण-निष्ठप्रकारतानिरूपितविशेष्यत्वानिरूपकत्वं, गुणः सत्तावानित्यादेस्तादृशप्रमात्वानुपपत्तेः।

End:

वस्तुतस्तु स्वसामानाधिकरण्यस्वप्रतियोगिकत्वोभयसंबन्धेन किंचिद्विशिष्टान्यत्वमेवाभावे प्रति-योगिवैयधिकरण्यमिति नोक्तानुपपत्तिः। न वाननुगमवार्तापीति ध्येयम्। न च वृक्षः कपिसंयोगीति प्रमायामव्याप्तिः। वृक्षनिष्ठविशेष्यतायाः स्वावच्छेदकावच्छिन्नाभाववद्वृत्तित्वघटितान्यतरसत्वादिति वाच्यम्; स्वावच्छेदकावच्छिन्नाभाववद्वृत्तित्वघटकाधिकरणत्वस्य निरवच्छिन्नदैशिकविशेषणतासंबन्धा-वच्छिन्नत्वेन निवेशादिति वदन्ति। परे तु स्वव्यधिकरणेति। स्वं विशेष्यता तद्वैयधिकरण्यं स्वाधि-करणावृत्तित्वम्, सत्तावान् गुण इत्यादेः प्रमात्वानुपपत्तेः। अथैवमपि विशिष्टसत्तावान् गुण इति

ज्ञानस्य प्रमात्वापत्तिः, विशिष्टसत्तायां गुणवृत्तित्वाभावादिति चेन्न; गुणे गुणान्यत्वोपलक्षितसत्ताबुद्धेः प्रमात्वात् तद्विशिष्टबुद्धेश्च तादृशसत्त्वविशिष्टनिरूपितसमवायावगाहितया तेन संबन्धेन गुणावृत्तित्वस्य तादृशसत्तायां सत्त्वेन प्रमात्वाभावात्। विषयतायां स्वव्यधिकरणप्रकारावच्छिन्नत्वं च स्वरूपसंबन्धविशेषः। स्वव्यधिकरणनिष्ठप्रकारतानिरूपकत्वं चेति निगदन्ति।

1343

PM1690 प्रामाण्यविचारः

Beginning:

अत्र च प्रामाण्यपदस्य प्रमाकरणत्वार्थत्वभ्रमनिरासाय ज्ञानपदम्। तेन च ज्ञानत्वनियतधर्मलाभेन तद्व्यावृत्तिः। तत्र मीमांसकाः। प्रामाण्यं स्वतोग्राह्यमेव। तत्र प्रामाण्यस्य स्वतोग्राह्यत्वं **गुरुमते** अप्रामाण्यग्रहसमवधानकालीनयावत्स्वाश्रयविषयकत्वम्। **मुरारिमिश्रमते** च अप्रामाण्यग्रहासमवधानकालीनयावत्स्वाश्रयविषयकलौकिकप्रत्यक्षविषयत्वम्। **भाट्टमते** प्रामाण्यग्रहासमवधानकालीनज्ञाततालिङ्गकानुमितिविषयत्वम्। अत्र नैयायिकेन सह विवादे मतत्रयसाधारणी विप्रतिपत्तिरपेक्षिता। सा च ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वेति। अत्र विधिकोटिः मीमांसकानाम्। निषेधकोटिः नैयायिकानाम्। अत्र क्वापि प्रामाण्ये यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वाभावेन बाधवारणाय साध्यस्थज्ञानपदं स्वाश्रयपरं वाच्यम्। स्वपदं च पक्षीभूतप्रामाण्यपरम्। एवं च पक्षे ज्ञानपदानुपादाने पक्षतावच्छेदकाक्रान्तेच्छाप्रामाण्ये तदाश्रयग्राहकयावत्सामग्र्यन्तःपातिन्या इच्छाग्राहकसामग्र्या अग्राह्यत्वेन बाध इति ज्ञानत्वघटितप्रामाण्यस्य पक्षतालाभाय पक्षे ज्ञानपदम्।

End:

ननु ज्ञानस्य स्वप्रकाशत्ववादिगुरुमते विशिष्टबुद्धौ विशेषणज्ञानस्याहेतुतयानुव्यवसायेन ज्ञानवृत्तिज्ञानत्ववत् तद्वृत्तिप्रामाण्यस्य ग्रहसंभवेन तस्य स्वतोग्राह्यत्वं संभवति। एवं **भाट्टमते** जन्मान्तरीयसंस्कारेण स्मृतस्य प्रामाण्यविशिष्टज्ञानस्य ज्ञाततायां व्याप्तिग्रहेण तज्जन्यज्ञाततालिङ्गकानुमित्या प्रामाण्यग्रहसंभवेन तत् संभवति। **मिश्रमते** तु प्रामण्योपस्थितिं विना प्रथमानुव्यवसायेन प्रामाण्यग्रहासंभवात् कथं प्रामाण्यस्य स्वतोग्राह्यत्वसंभव इति चेन्न। प्रवृ . . .

1345

PM1733 बाधबुद्धिप्रतिबध्यतारहस्यम्

Beginning:

सधर्मितावच्छेदककविशिष्टबुद्धौ समानधर्मि . . . शग्राह्याभावनिश्चयो विरोधीति तदभावोऽपि हेतुः। तादृशबुद्धयोश्च तद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारता-

शालिलौकिकान्यदोषविशेषाजन्यबुद्धित्वतद्धर्मावच्छिन्नविशेष्यतानिरूपितविशेषणताविशेषसंबन्धावच्छिन्नतत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावप्रकारताशालिनिश्चयत्वाभ्यां प्रतिबध्यप्रतिबन्धकभावः। एकधर्मधर्मितावच्छेदककबाधनिश्चयदशायां धर्मान्तरधर्मितावच्छेदककविशिष्टबुद्ध्युत्पत्तये निरूपितान्तं प्रकारताविशेषणम्। तद्धर्मावच्छिन्नविशेष्यताकत्वस्य ज्ञानविशेष्यताकत्वस्य ज्ञानविशेषणत्वे द्रव्यं वह्निमत्, पर्वतो घटवानित्यादिबुद्धेश्च पर्वतो वह्न्यभाववान् इत्यादिबुद्धिप्रतिबध्यत्वापत्तिः।अतो न तदादरः।

End:

तज्जन्यतावच्छेदकं च स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्व स्वसामानाधिकरण्योभयसंबन्धेन विपरीतज्ञानविशिष्टलौकिकप्रत्यक्षनिश्चयत्वम्। विपरीतज्ञानवैशिष्ट्यनिवेशात् न विपरीतज्ञानानुत्तरप्रत्यक्षनिश्चये व्यभिचारः। प्रत्यक्षत्वस्य लौकिके निवेशात् योग्यतासंदेहजन्यशाब्दबोधादौ न व्यभिचारः। निश्चयत्वनिवेशात् धारावाहिकसंशयानुपपत्तिः। एवं च तदिन्द्रियजन्यविपरीतज्ञानोत्तरतदिन्द्रियजन्यप्रत्यक्षनिश्चये विशेषदर्शनस्य हेतुत्वान्तरं कल्पनीयम्। अन्यथा समानेन्द्रियजन्यविपरीतज्ञानदशायां विनैव विशेषदर्शनं लौकिकनिश्चयापत्तिः। वस्तुतस्तु स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन विशेषदर्शनवत्प्रत्यक्षनिर्णयत्वं विशेषदर्शनवत्त्वमेव वा विशेषदर्शनजन्यतावच्छेदकं वाच्यम्। न तु विपरीत . . . . . .

1349

PM3033 बाधवादः

Beginning:

यत्तु विपरीतज्ञानविशिष्टबुद्धयोः केन रूपेण प्रतिबध्यप्रतिबन्धकभाव इति चेत्। अत्र सांप्रदायिकाः। अगृहीताप्रामाण्यकतद्धर्मितावच्छेदककतद्धर्मावच्छिन्नाभावनिश्चयत्वेन प्रतिबन्धकता। तद्धर्मावच्छिन्नांशे बोधविशेषाजन्यशाब्दलौकिकप्रत्यक्षनिश्चयान्याहार्यतरतद्धर्मितावच्छेदककतद्धर्मावच्छिन्नविशिष्टबुद्धित्वेन प्रतिबध्यता। संदिग्धाप्रामाण्यकस्य निश्चिताप्रामाण्यकस्य वा तदभावनिश्चयस्य सत्त्वेऽपि तद्विशिष्टबुद्ध्युदयात् अगृहीताप्रामाण्यकेति। अगृहीताप्रामण्यकत्वं च विशेषणताविशेषसंबन्धेन विषयत्वसामानाधिकरण्योभयसंबन्धावच्छिन्नतत्तदप्रामाण्यग्रहाभावकूटविशिष्टत्वम्।

End:

अप्रामाणिकनियमं कल्पयित्वा तदनुरोधेन गौरवाभ्युपगमस्यान्याय्यत्वादित्याह। तदसत्। एवंरूपेण प्रतिबध्यप्रतिबन्धकभावेऽपि विशिष्टाधिकरणबुद्धिं प्रति विशेष्यतावच्छेदकप्रकारकनिश्चयस्य, प्राचीननये भ्रमसंशयौ प्रति धर्मितावच्छेदकप्रकारकधर्मिनिश्चयस्य कारणत्वविलोपापत्त्या बाधतद्बाध्यादिबुद्धीनां प्रातिस्विकरूपेण प्रतिबन्धकत्वस्यैव युक्तत्वादिति संक्षेपः। विपरीतज्ञानादिविशिष्टबुद्धयोः प्रतिबन्धकप्रतिबध्यतावच्छेदकधर्मविवेकः।

1350

73879(b) **ब्राह्मणत्ववादार्थः**

Beginning:

नत्वा शंभोः पदाम्भोजे **जयरामः** समासतः।
ब्राह्मणत्वं तथा स्वत्वं . . . . . ॥

अदृष्टजन्यतावच्छेदिका निखिलब्राह्मणवृत्तिरेका। तादृशादृष्टसत्त्वेऽपि ब्राह्मणं विना इदानींतनब्राह्मणानुत्पत्तेः ब्राह्मणजन्यतावच्छेदिका आद्यब्राह्मणविश्वामित्रव्यावृत्ता अपरा। ब्राह्मणं विना विश्वामित्राद्यब्राह्मणयोरिवादृष्टविशेषमात्रादिदानींतनब्राह्मणस्यानुत्पत्तेः ब्राह्मणानपेक्षेण यादृशादृष्टेन ब्राह्मणोत्पत्तिः तादृशादृष्टे वैजात्यविशेषः कल्प्यते। तदवच्छिन्नजन्यतावच्छेदिका विश्वामित्राद्यब्राह्मणोभयवृत्तिः परेति ब्राह्मणत्वजातित्रयीति संप्रदायः।

End:

इत्थं च विषयस्य द्रव्यस्य महत्त्वोद्भूतरूपाभ्यां जातेर्महत्त्वोद्भूतरूपवत्समवेतत्वेन द्रव्यतद्गतजातिचाक्षुषादौ हेतुत्वम्। गुरुत्वादिवारणाय गुणस्यैव तत्त्वेन हेतुत्वमिति मतेऽपि न क्षतिः। न वा तद्धर्मावच्छिन्ननिरूपितविशेष्यतानवच्छिन्नत्वाद्यपेक्षया लघुत्वात्तत्समनियतत्वाच्च तद्धर्मावच्छिन्ननिरूपितविशेष्यत्वानवच्छिन्नब्राह्मणत्वप्रकारताकप्रत्यक्षत्वमेव तद्धर्मविशिष्टे विशुद्धिज्ञानस्य कार्यतावच्छेदकमिति निर्विकल्पकापत्तिरित्यसदेकपरिशीलितः पन्थाः।

श्रीमता **जयरामेण** न्यायपञ्चाननेन यत्।
निरूपितमिहापूर्वं तन्मुदेऽस्तु मनीषिणाम्॥

1351

PM1694 **मुक्तिवादः**

Beginning:

श्रीकृष्णचरणद्वंद्वमाराध्य परमादरात्।
मुक्तिवादं वितनुते श्रीमान् धीमान् **गदाधरः**।

प्रयोजनमुद्दिश्यैव पुमांसस्तदुपाये प्रवर्तन्ते। अतः शास्त्रस्य प्रयोजनं प्रथमतः प्रदर्शयन्ति शास्त्रकृतः। तत्र स्वतःप्रयोजनं सुखं तद्भोगो दुःखाभावश्च। तच्चान्येच्छानधीनेच्छाविषयत्वं, न तु प्रयोजनान्तराजनकत्वे सति प्रयोजनत्वम्। स्वसाक्षात्कारभोगं प्रति विषयतया जनके सुखे अव्याप्तेः। गौणप्रयोजनम् अन्येच्छाधीनेच्छाविषयो भोजनादिः। तत्र सुखादिरूपफलानुसंधानादेवेच्छोत्पत्तेः दुःखासंभिन्नसुखरूपतया स्वर्गस्येवान्वीक्षिक्यादिशास्त्रफलस्यापवर्गस्याप्यात्यन्तिकदुःखनिवृत्तिरूपस्य स्वत एव प्रयोजनत्वम्।

End:

विकल्पे उभयोरशास्त्रार्थताप्रवादश्च विरुद्धकल्परूपविकल्पपरो न तु पृथक्कल्परूपविकल्पपरः। अथ परस्पराभावसापेक्षता व्रीहियवस्थलेष्वप्रामाणिकी। प्रथमप्रवृत्तव्रीहिविधितो यवकरणकत्वाभावाविशिष्टस्यैव व्रीहिकरणकयागस्य फलसाधनताप्रत्यायनादिति चेन्न। तृणनिरपेक्षारणिरूपद्रव्याद्युत्पत्तावपि तृणाद्वह्निर्जायते द्रव्याद्वेत्यप्रयोगात्तदुत्तरवाक्यस्थेनापि वाकारेण पूर्वकल्पव्यवच्छेदसाहित्यस्योत्तरकल्प इवासाहित्यस्यापि पूर्वकल्पे बोध इति व्युत्पत्तेर्व्रीहिर्भिर्यजेत यवैर्वेत्यादावपि व्रीह्यादौ यवादिसाहित्यबोधस्य व्युत्पत्तिसिद्धत्वादित्यन्यत्र विस्तरः।

Colophon:

इति श्रीमन्महामहोपाध्याय **गदाधरभट्टाचार्यविरचितो मुक्तिवादः** समाप्तः।

यत्पादरेणुपरमाणुभिरेव सृष्टां पश्यन्निजप्रणयिनीं किल पश्यदद्धिः।
अस्थापयन्निखिलकारणतामणूनां श्रेयः स मे दिशतु भानुकुलावतंसः॥

1354

69198(I) योग्यतावादार्थः

Beginning:

ननु एकपदार्थसंसर्गे अपरपदार्थनिष्ठेत्यत्र एकं यत् पदं तस्य योऽर्थः तस्य यः संसर्गः तस्मिन्नपरं यत्पदं तस्य योऽर्थः तन्निष्ठेति पदविशेषणं वा, एको यः पदार्थः तस्य यः संसर्गः तस्मिन्नपरपदार्थः तन्निष्ठेति पदार्थविशेषणं वा। नाद्यः, एकापरभावस्य भेदनिबद्धतया एकेत्यादेः पदविशेषणतया योग्यताया अभावादेव यजेतेत्यत्र एकलिङ्पदोपस्थापितयोः कृतीष्टसाधनत्वयोरन्वयबोधनिरासंभवे तन्निरासाय प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वनियमाद् इति युक्त्यन्तरानुसरणप्रयासवैयर्थ्यापत्तेः।

End:

ननु शुक्ताविदं रजतमिति भ्रमानन्तरं नीलप्रतीत्यादिना रजतत्वाभावानुमितौ तद्रजतमिति मतिर्न जायत इति सर्वानुभवसिद्धं, तत्र ग्राह्याभावनिश्चयप्रतिबध्यतावच्छेदकं ग्राह्यस्मृतित्वं ग्राह्यापरोक्षज्ञानत्वं वेति विशये ग्राह्यापरोक्षज्ञानत्वस्य सामान्यत्वेन सामान्यविशेषयोरिति न्यायेन ग्राह्याभावनिश्चयप्रतिबध्यतावच्छेदकत्वमिति ग्राह्यपरोक्षज्ञानं प्रति ग्राह्याभावनिश्चयस्य प्रतिबन्धकत्वेन तदभावस्य कारणत्वेन कल्पतया तत एव शाब्दबोधोपपत्तौ योग्यताज्ञानहेतुत्वे मानाभावादिति चेन्न; ग्राह्यस्मृतित्वस्यैव प्रतिबध्यतावच्छेदकत्वात्। न च सामान्यरूपत्वेनापरोक्षज्ञानत्वमेव प्रतिबध्यतावच्छेदकमित्युक्तमिति वाच्यम्; परोक्षज्ञानत्वस्य जातित्वेऽनुभवत्वादिना सांकर्यतया तस्योपाधित्वेन तुल्यत्वाभावात् तुल्यशरीरतायामेव सामान्यविशेषलाघवावतारात् ग्राह्यस्मृतित्वस्यैव प्रतिबध्यतावच्छेदकत्वकल्पनौचित्यात्। अस्तु वा परोक्षत्वं जातिरनुभवत्वमुपाधिः।

तथापि गुणानुरोधेन यथार्थयोग्यताज्ञानस्य शाब्दप्रमाहेतुत्वे यद्विशेषयोरिति न्यायेन शाब्दज्ञान-योग्यताज्ञानहेतुत्वे न किंचित् बाधकमिति ।

Colophon:

योग्यतावादार्थः समाप्तः ।

1359

71474(a) **लकारशक्तिवादार्थः**

Beginning:

लः कर्मणि च भावे चाकर्मकेभ्यः इत्यत्र कर्तरि लकारा अनुशिष्यन्ते । अत एव तेषां कर्तर्येव शक्तिरिति वैयाकरणाः । तत्रोच्यते, अनुशासनस्यानादितात्पर्यग्राहकतया कर्तृलकारयोरनादि-तात्पर्यविषयत्वसिद्धावपि न तच्छक्यत्वकल्पनं युक्तं; कृतिमात्रस्य शक्यत्वे कृतित्वजातेः शक्यतावच्छेदकतया लाघवात्, कर्तुः शक्यत्वे च कृतीनां बह्वीनां शक्यतावच्छेदकत्वे गौरवेणासति बाधकेऽनुशासनस्य शक्तिग्राहकतया न तद्बलेन लकाराणां कर्तरि शक्तिः; कृतिमात्रशक्तावपि प्रथमान्तपदसमभिव्याहारानुरोधेन कृतिविशिष्टस्यैव बोधनात्तेषां कर्तृतात्पर्यानुशासनस्य निर्वाहात् । व्याकरणस्य शक्तिग्राहकत्वप्रवादोऽपि उत्सर्गाभिप्रायः ।

End:

न च द्रव्यगुणयोरभेदासंभवो बाधकः अभेदसंबन्धेन शक्तिविशिष्टद्रव्याभेदं प्रत्यविरोधि-त्वात्, प्रत्युतानुकूलत्वाच्च । नापि गुणविशिष्टानुपस्थितिः बाधिका, गुणविशेषणपदेन तदुपस्थितेः शक्त्या वा लक्षणया वा तस्य तदुपस्थापकत्वात्; आकृत्यधिकरणपूर्वपक्षसिद्धान्तयोः वैपरीत्येन वर्णनमपि मीमांसकानामनुपादेयमेवेति न तद्विरोधः; अर्थैकत्वाद् इति अरुणापदैकहायनीपदयो-रैकार्थ्यमपि शाब्दबोधमादायैव स्वरसत उपपादयितुं शक्यते । इत्थं च नारुणाधिकरणविरोधः । एवं च विशेषणविभक्तेरभेदबोधकत्वस्यावश्यकतया प्रथमाया अनवबोधकत्वप्रतिज्ञानमत्यन्तम-संगतमिति युक्तमुत्पश्यामः ।

विद्वद्ग्रामाचार्यवर्यचरणाम्भोरुहाश्रयः ।
लकारशक्तिवादार्थं करोति **शठजित्सुधीः** ॥

1361

PM1697 **लाघवगौरववादः**

Beginning:

लघुः शरीरसंख्यायां लोककल्पनया गुरुः ।
अविक्रियः क्रियाकुर्वद्रूपो मे शरणं शिवः ॥

ननु गौरवेण गुरुवस्तुसिद्धिर्वा प्रतिबध्यते तदभावसिद्धिर्वा क्रियते। आद्ये गौरवस्य स्वरूपसतो, ज्ञायमानस्य वा प्रतिबन्धकत्वम्। प्रथमे गुरुणो वस्तुनो भ्रमात्मिकापि सिद्धिरनुपपन्ना। द्वितीये गौरवग्रहस्य कम्बुग्रीवादिमत्त्वविशेष्यकगौरवप्रकारकज्ञानत्वेन यदि प्रतिबन्धकत्वं तदानीमस्य प्रतिबध्यतावच्छेदकं न तावत् कम्बुग्रीवादिमत्तावगाहिबुद्धित्वम्, तत्प्रकारकबुद्धित्वं वा, निरुक्त-गौरवज्ञानसत्त्वेऽपि कम्बुग्रीवादिमानिति बुद्ध्युदयात्।

End:

एवं च तज्जन्यतावच्छेदककुक्षौ शाब्दत्वप्रवेशे मानाभावात्। तथैव कारणताया निर्वाहः; न च तावद्योग्यताज्ञानसाधारणमनुगतं व्यञ्जनवचनत्वाभावयोः प्रतियोग्यनुयोगिभावस्वभावाव(?)धिकरणयोश्चाधाराधेयभावसर्वावगाहित्वं संभवतीति वाच्यम्; व्यञ्जनवचनत्वाभावौ वह्निमानित्यादि-बुद्धावतिप्रसंगात्। प्रकारभेदादननुगतानामप्रामाण्यनिर्णयानां प्रत्येकाभावस्य तत्तत्प्रकारकबुद्धित्वेन कारणज्ञाने प्रवेशौचित्याच्च। अन्यथा व्यञ्जनवचनत्वाभावप्रकारकत्वघटिताप्रामाण्यनिर्णयकाले वह्निर्न व्यञ्जनवचनमिति योग्यताज्ञानादिव वह्नौ व्यञ्जनवचनत्वाभाव इति ज्ञानादपि शाब्दबोधानुदयप्रसंगात्। न हि सर्वेषामप्रा . . .

1363

67159 वादावलिः

Beginning:

. . . . ह्यः नीलरूपारोपविशिष्टतेजःसंसर्गाभावस्तम इति केचित्। अत्र चाक्षुषः प्रत्ययः कथमिति चिन्त्यम्। यत्पुनरुक्तं नीलं तम इति प्रत्ययस्य भ्रान्तत्वे अनीलं तम इति प्रतीतिः कदाचिदपि कस्यापि स्यादिति। तन्मन्दम्। शरीरे अहंप्रत्ययवदुपपत्तेः। अत एव योगिनोऽपि तथा प्रत्यय एवोन्नीयत इति निरस्तम्। पेचकादीनां बाह्यालोकनिरपेक्षं चक्षुर्ग्राहकत्वमित्यसिद्धमेव, तत्र तेजोऽन्तरस्य विद्यमानत्वात्। अत एव दिवा न पश्यन्ति तस्य सौरालोकाभिभूतत्वात्, तेषां तत्सहचरितं चक्षुः ग्राहकमिति। नात्रालोकः, किं पुनरन्धकार इति व्यवहारस्तु नात्र घटः, किंतु तदभाव इतिवत् विवरणरूपादिना समर्थनीयमिति सर्वं समञ्जसम्।

किं तत्कारणत्वं—कार्यनियतपूर्ववर्तित्वं वा, कार्यनियतपूर्ववर्तिजातीयत्वं वा, अनन्यथासिद्ध-नियतपूर्ववर्तित्वं वा, कार्यसहभावे सत्येतदेव वा, सहकारिविरहप्रयुक्तकार्याभावत्वं वा, अन्यद्वा। नाद्यः, कुम्भकारपितुरपि कुम्भं प्रति कारणत्वप्रसङ्गात्। आकाशादेः कार्यमात्रं प्रति कारणत्व-प्रसङ्गाच्च। किं च पूर्ववर्तित्वं प्रागभावावच्छिन्नसमयवर्तित्वं चेति तयोरकारणत्वप्रसङ्गात्।

End:

ननु तथापि बुभुत्सैवास्तु नियामिका। तस्याश्चावश्यं . . . . . न्मीलितं चक्षुः पटप्रकाशकं क्रमेण भवति। बुभुत्साया अपगमः। तस्मादन्यथासिद्धस्य व्यासङ्ग . . . . . । मैवम् सुखादि-प्रादेशिकत्वनियमार्थं प्रादेशिकासमवायिकारणमङ्गीकार्यम्। विभुकार्ये त . . . . . संयोगस्य

तथात्वम्। सकलशरीरावच्छेदेन तदुत्पत्तिप्रसङ्गात्। न च तदवयवानामवच्छेदकत्वं . . . . . त्।
न च तत्राप्यन्यस्यावच्छेदकत्वमननुगमात्। न च विभुमनःसंयोग एवासमवायिकारणं प्रादेश
. . . . . घटायोन्मीलने पटप्रकाशनं क्रमेण भवति बुभुत्सापगमात्।

1364

PM1604 वायूष्मादिप्रत्यक्षाप्रत्यक्षत्वविचारः

Beginning:

वायोश्चाक्षुषसाक्षात्कारवत् स्पार्शनोऽपि न साक्षात्कार इति नैयायिकसिद्धान्तो न श्रद्धेयः।
वायोरस्पार्शनत्वे शरीरवायुसंयोगानन्तरं शीतो वायुर्वातीत्यादि वायुमुख्यविशेष्यकलौकिकस्पार्शनानुपपत्तेः। न चासौ न स्पार्शनोऽपि तु मानस एवेति वाच्यम्। वायोः शीतं स्पर्शं स्पृशामि, वातं स्पृशामीत्याद्यनुव्यवसायानुपपत्तेः। न चासौ भ्रमो बाधकाभावात्। न च वायूनां विषयविधया तद्व्यक्तित्वेन स्वविषयकलौकिकप्रत्यक्षं प्रति कारणत्वकल्पनागौरवमेव बाधकमिति वाच्यम्। विषयस्य तत्तद्व्यक्तित्वेन कारणत्वे मानाभावात्। विषयस्य तत्तद्व्यक्तित्वेन कारणतावृद्धिभिया अतीन्द्रियत्वाभ्युपगमे घटादेरपि तथात्वापत्तेः। न चोद्भूतरूपस्य द्रव्यचाक्षुषवद् द्रव्यस्पार्शनेऽपि हेतुत्वात् कारणाभाव एव बाधकमिति वाच्यम्। मानाभावात्। प्रभास्पार्शनवारणाय उद्भूतस्पर्शस्य द्रव्यस्पार्शनहेतुत्वावश्यकतया तत एव पिशाचादेर्गगनादेश्चास्पार्शनत्वोपपत्तेः।

End:

न च स्पर्शे तद्द्रव्यान्यसत्तावत्त्वं तत्प्रतिबध्यतावच्छेदकमिति वाच्यम्। स्पर्शेतरत्वप्रवेशे गौरवापत्तेः। स्पर्शेतरत्वप्रवेशे घटाकाशसंयोगादौ स्पार्शनसामान्यापत्तिवारणाय स्पार्शनं प्रति स्पर्शत्वेन परमाण्वादिस्पार्शनवारणाय प्रकल्पसमहत्वत्त्वेन चातिरिक्तकारणत्वकल्पनापत्तेश्चेति समासः।

इति श्रीमथुरानाथतर्कवागीशविरचितं **वायूष्मादेःप्रत्यक्षत्वाप्रत्यक्षत्वविचाररहस्यम्।**

इभदस्रमुनीन्दुमेय[१७२८]वर्षेऽतिगते विक्रमभूमिपस्य कालात्।
व्यलिखच्छिवरामनामधेयः शिवदत्तस्य कृते नभोदशम्याम्॥

1366

75611 विभागादेवेतिवाक्यार्थविचारः

Beginning:

विभागादेवेति। द्रव्यगुणेत्यादिविभागवाक्यघटकद्वन्द्वोत्तरबहुवचनादेवेत्यर्थः। अत्र केचिदाक्षिपन्ति। बहुषु बहुवचनमिति सूत्रेण बहुवचनस्य बहुत्वत्वावच्छिन्ने शक्त्यवगमात् सप्तत्वरूपसंख्याविशेषस्य कथं द्वन्द्वोत्तरबहुवचनाल्लाभः। न च बहुवचनस्य त्रित्वत्वाद्यवच्छिन्न एव शक्तिः,

न च नानार्थत्वप्रसंगः इष्टत्वात्। अन्यथा बहुत्वत्वजातेः त्रित्वत्वादिव्यापिकायाः अङ्गीकारापत्त्या गौरवात्। डित्थडभित्थदेवदत्ता इत्यादौ त्रित्वादिबोधानुपपत्तेश्चेति वाच्यम्। बहुशब्दस्य नानार्थत्वप्रसंगपरिहाराय तच्छक्त्यवच्छेदकतया बहुत्वत्वजात्यङ्गीकारस्यावश्यकतया गौरवविरहात्। अन्याय्यं चानेकार्थत्वमिति न्यायाच्च डित्थडभित्थदेवदत्ता इत्यादौ त्रित्वादिबोधश्च मनसानुमानेन वा निर्वोढव्य इति।

End:

अनुभूयते ह्रीत्थमेव लोके। गणितशास्त्रविदां हृदारूढश्चायं पन्थाः। अपेक्षाबुद्धिर्नानैकत्वावगाहिनी बुद्धिरित्येतत्तु द्वित्वमात्राभिप्रायकं इतरोपलक्षणं वा योज्यम्। अथवा त्रित्वसंख्यायां द्वित्वैकत्वोभयज्ञानं कारणं, चतुष्ट्वसंख्यायां तु त्रित्वैकत्वोभयज्ञानमिति रीत्या निरूपणीयं, लाघवात्। यदि पुनः पञ्चत्वद्वयज्ञानाद्दशत्वसंख्यानुभवः तदा प्रथमपक्ष एवाश्रयणीयः इति अलमतिचर्चया।

1367

69963(c) विशेषणज्ञानकारणताविचारः

Beginning:

विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकनिश्चयत्वस्य ..... नेकधमनिष्ठानेकधर्मावच्छिन्नप्रकारतानिरूपितप्रकारताशालिज्ञानत्वं खले कपोतन्यायेन विशिष्टवैशिष्ट्यज्ञानस्य ..... कारकज्ञानवृत्तित्वं न विशेषणतावच्छेदकप्रकारकनिश्चयत्वावच्छिन्नावच्छिन्नं .... प्रति कारणतावच्छेदकं नाप्येकधर्मांव ..... निरूपितप्रकारतासमानाधिकरणविशेष्यतानिरूपितप्रकारता तन्निष्ठविलक्षणप्रकारतानिरूपितविशेष्यतास ... प्रकारता तदन्यतरनिरूपितप्रकारताशालिज्ञानत्वरूपं विशेष्ये विशेषणम् तत्र च विशेषणान्तरमितिन्यायेन .....

End:

तादृशप्रकारतायां निरू ..... क्तत्व अभाववान् दण्ड इत्याकारकज्ञाननिष्ठा तादृशप्रकारित्वावच्छिन्ना या या प्रतियोगितावच्छेदक ..... रक्तत्वादिरूपतदन्यनिष्ठविलक्षणप्रकारतानिरूपितप्रकारिता रक्तरूपतदन्यधर्मवृत्तितादृश ..... दण्डत्वादिरूपतदवच्छेदकधर्मावच्छिन्नविशेष्यता रक्तदण्डवृत्तितादृशविशेष्यताया निरूपि ..... रक्तो दण्ड इति ज्ञानवृत्तितद्विशिष्टज्ञानत्वं कारणतावच्छेदकं तादृशविशेष्यत ..... षत्वादिधर्मान्तरावच्छिन्नविशेष्यतानिरूपितविशेष्यताशालिज्ञानत्वं का .....

1368

67234 विशेषणभेदनिरूपणम्

The following is the full text:

विशेषणं चतुर्विधं—व्यावर्तकविशेषणमुपरञ्जकविशेषणमुपलक्षणविशेषणमुपधानविशेषणं चेति। तत्र व्यावर्तकविशेषणं नीलमुत्पलमित्यादि, तत्र नैल्यस्य श्वेतव्यावर्तकत्वात्। उपरञ्जकविशेषणं

द्विविधं, उपरञ्जकस्यारोपविषयगोचरत्वेनारोप्यमाणविषयगोचरत्वेन च। तत्रारोपविषयगोचरत्वे मुखं चन्द्र इत्यादि। तत्र चन्द्रस्य मुखत्वेनोपरञ्जनं। अत एव लिङ्गभेदेऽपि विशेषणविशेष्यभावः सिद्धः। एवं तदुच्चकुचौ भवन्निति। तत्र स इति कलश एकः द्वौ कुचौ उभयोर्विशेषणविशेष्यभावः। आरोप्यमाणविषयगोचरविशेषणं तु तिरस्करिण्यो जलदा भवन्ति। अत्रारोप्यमाणं तिरस्करिणीत्वमारोप्यविषयात्मकतया स्थितम्। एतच्च पूर्वमेव निरूपितम्। उपलक्षणविशेषणं तु काकवद्देवदत्तगृहम्। पृथगुपस्थितैर्धर्मिणि उपलक्षणमिति उपलक्षणविदः। काकत्वादिजात्याविशिष्टस्यैव उपलक्षणत्वात् विशेषणताभेदः। उपधानविशेषणं तु रक्तः स्फटिक इति। धर्मात्मनोपधायकत्वादुपलक्षणताभेदः। व्यावर्तकत्वाभावान्न नीलोत्पलादेर्व्यावृत्तिः। अत्रेदं तत्त्वम्। उपरञ्जकविशेषणस्थले मुखं चन्द्रः, कलशः स्तनौ, भ्रुवौ धनुरित्यादिस्थले न चन्द्रकलशाद्युपरञ्जनविशेषणान्यश्रितलिङ्गसंख्यान्येव मुखादिकं स्तनादिकं च विशिंषन्तीति न स्तनादेर्न मुखादेर्लिङ्गं संख्यां वा भजन्ते नियतलिङ्गतया विशेष्यनिघ्नत्वाभावादि . . भ्यो विशेषणेभ्यो व्यावृत्तिः।

1375

69198(i) व्यधिकरणधर्मावच्छिन्नाभावखण्डनवादार्थः

Beginning:

ननु अभावाभावस्य न प्रतियोगित्वं, घटवत्यपि भूतलादौ समवायसंबन्धेनाभावो न स्यात्। किं च केवलविशेष्यवत्यपि विशेषणाभावप्रयुक्तविशिष्टाभावो न स्यात्। तत्रापि विशिष्टाभावरूपप्रतियोगिनः सत्त्वात्। न चारोपसंबन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिन एवाभावाभावत्वाङ्गीकारेण नोक्तदोषद्वयमिति वाच्यम्। एवं समवायारोप्याकाशाभावाभावत्वरूपत्वमाकाशस्य न स्यात्। तत्र समवायरूपारोप्यसंबन्धावच्छिन्नाकाशस्याप्रसिद्ध्या तस्य समवायारोप्याकाशाभावाभावत्वासंभवात्।

End:

किं च यत्र विशेष्यसत्त्वेऽपि विशिष्टध्वंसोऽनुभूयते तत्रैव सविशेष इति न्यायः यथा स्वर्गो ध्वस्त इत्यादौ। नात्यन्ताभावस्थलेऽपीति न शशीयत्वाभावविषयत्वम्। न च विशेष्यसत्त्वेऽपि विशिष्टात्यन्ताभाववत् तद्ध्वंसोऽपि स्यादेवेति वाच्यम्, तस्य मणिकृता निरस्तत्वात्। तस्मादिदमविचारितरमणीयमिति चेत्। सत्यम्। तथापि न व्यधिकरणधर्मावच्छिन्नाभावसिद्धिः। तथाहि, प्रतियोगितासमानाधिकरण एव धर्मः प्रतियोगितावच्छेदकः; न व्यधिकरणः, व्यधिकरणयोरवच्छेद्यावच्छेदकभावानुपपत्तेः। तथा च शशीयत्वस्य शृङ्गनिष्ठप्रतियोगिताव्यधिकरणत्वेन न तदवच्छेदकत्वमिति। एतदभिसंधाय मणिकृतोक्तं प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक इति। तस्मात् न व्यधिकरणधर्मावच्छिन्नात्यन्ताभावसिद्धिरिति दिक्।

1376

70904 व्याप्तिग्रहोपायवादः

Beginning:

अत्र चार्वाकाः। भवत्वियं व्याप्तिः, नेयं शक्यग्रहा, किंचिद्धूमसमानाधिकरणं वह्न्यसमानाधिकरणं भविष्यतीति शङ्कायाः दुर्वारत्वात्; न चेदृशशङ्कायां व्याप्तिनिश्चयो भवितुमर्हति, तस्यास्तत्प्रतिबन्धकत्वात्। न च भूयोदर्शनात्तन्निवृत्तिः, शतशः सहचरितयोरपि व्यभिचारोपलब्धेः। न च तर्कात्तन्निवृत्तिः। तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानात्। इत्थं च ग्राहकाभावात् व्याप्तेरग्रहे कुतोऽनुमानं स्यादिति। अत्रोच्यते। व्यभिचारज्ञानविरहादिकमेव व्याप्तिग्राहकम्। न च तच्छङ्काविरहो दुःशकः, क्वचित्तर्कात् क्वचित्तन्मूलभूतव्याप्त्यादौ कोटिस्मरणाद्यभावाद. . . त्तेः। न च सर्वदा व्यभिचारशङ्काकोटिस्मृतिर्वास्ति, अनुभूयते वेति दिक्।

End:

अनौपाधिकत्वं तु तल्लक्षणम्। नन्वेवमुपाधेरसिद्ध्युपजीव्यत्वेन व्यभिचारवद्धेत्वाभासान्तरं स्यात्, न तु व्याप्यत्वाभावत्वेनासिद्धिरिति चेन्न; तज्ज्ञानमसिद्ध्युपजीव्यमपि न स्वतो दूषकं, न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानम्, अन्यस्य साध्यव्याप्यत्वज्ञाने प्रतिबन्धकमतिप्रसक्तेः। व्यभिचाराज्ञानस्य तद्धेतुत्वात् तद्धीस्तथा। न चानौपाधिकत्वज्ञानं व्याप्तिधीहेतुरित्युक्तं, तथा च व्यभिचारज्ञानद्वारा स दूषकः; एवं च परमुखनिरीक्षकतया सिद्धसाधनवन्न पृथक्। न चैवमव्यभिचारस्य व्याप्तित्वे व्यभिचारस्तदभावत्वेनासिद्धिः स्यादिति वाच्यम्। साध्याभाववद्वृत्तित्वं हि व्यभिचारः, तदभावश्च नाव्यभिचारः केवलान्वयिन्यभावात्। किंतु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्। न चानयोः परस्परविरहात्मत्वमिति।

1377

69198(k) व्याप्तिज्ञानकारणतावादः

Beginning:

व्याप्तिज्ञानं करणं, परामर्शो व्यापारः, अनुमितिः फलं इति मणिकृतः। अत्र उपाध्यायाः—पर्वते धूमे वह्निव्याप्तिरिति परामर्शात् व्याप्तिविशेष्यकाद्यत्रानुमितिः तत्र व्याप्तिज्ञानं पूर्वं नेति तज्जन्यानुमितौ व्याप्तिज्ञानस्य कारणत्वं न संभवतीति व्यभिचारः। किंच विशकलितं व्यभिचाराभावं सहचारं च स्मरतः पर्वतीयधूमे वह्निसामानाधिकरण्यं, वह्नौ च धूमसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं च विशेष्ये विशेषणमितिन्यायेन यत्र गृहीत्वा पूर्वानुपस्थितिविशिष्टसामानाधिकरण्यस्मकव्याप्त्यप्रकारक एव परामर्शः उत्पद्यते तत्रापि परामर्शात् पूर्वं व्याप्तिज्ञानं नेति तस्य तत्करणत्वं न संभवतीति व्यभिचारः।

End:

यच्च मनःकरणत्वे दूषणमभिहितं तदपि न सम्यक्, करणान्तरशब्देन प्रमित्यन्तरासाधारण-कारणत्वमेव वाच्यम्। अन्यथा व्यापारवतः करणत्वेनात्मनोऽपि करणत्वापत्त्या तत्सहकृतमनोजन्य-त्वस्यैव विद्यमानतया अत्रापि मानसत्वं न स्यात्। तथाच प्रमित्यन्तरासाधारणकारणसहकृतमनो-जन्यत्वमेव मानसत्वप्रयोजकमिति पर्यवसितम्। एवं चानुमितेर्मानसत्वापत्तिः प्रमित्यन्तरासाधारण-कारणीभूतपरामर्शसहकृतमनोजन्यत्वात् अनुमितेः। तस्मात् मिश्रोक्तमनःकरणत्वदूषणमसंगतमेवेति।

1378

69198(g) **व्याप्तिवादार्थः**

Beginning:

प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः। वृक्षः संयोगी द्रव्यत्वादित्यत्राव्याप्तिवारणाय प्रतियोगिव्यधिकरणेति। न चेदं संयोगी सत्त्वादि-त्यत्रातिव्याप्तिः। तत्र संयोगात्यन्ताभावस्य प्रतियोगिसमानाधिकरणत्वेन प्रतियोग्यसमानाधिकरण-घटाभावाप्रतियोगित्वात् संयोगस्येति वाच्यम्। साधनाधिकरणे प्रतियोग्यसामानाधिकरण्यस्य विवक्षित-त्वात्। संयोगाभावस्य सत्त्वरूपसाधनाधिकरणे गुणे प्रतियोग्यसमानाधिकरणतया तादृशाभावप्रति-योगित्वात् संयोगस्येति नातिव्याप्तिरिति भावः।

End:

ननु यदि प्रतियोगित्वं विरोधित्वं तदा वह्निघटोभयवान् धूमादिति व्यभिचारिण्यतिव्याप्तिः। तत्र वह्नेर्धूमवति सर्वत्र सत्त्वेन धूमसमानाधिकरणद्वित्वावच्छिन्नाभावविरोधितया तद्वृत्तिद्वित्वस्य धूम-समानाधिकरणाभावविरोधितानवच्छेदकत्वादिति चेन्न। वह्नित्वेन वह्नित्वावच्छिन्नाभावविरोधित्वेऽपि द्वित्वावच्छिन्नत्वाकारेण तद्विरोधित्वात् वह्नित्वेनाप्रतियोगित्वेऽपि द्वित्वावच्छिन्नत्वेन प्रतियोगि-त्ववत्। अत एव द्वित्वावच्छिन्नाभावस्य प्रतियोगितानवच्छेदकानवच्छिन्नप्रतियोगित्वमिति सिद्धान्तः। वस्तुतस्तु अभावविरोधितावच्छेदकत्वमभावविशेषणमभावविरोधिपर्याप्यवृत्तिकभिन्नत्वम्। एवं च द्वित्वस्य साधनसमानाधिकरणाभावविरोधिवह्निवृत्तित्वेऽपि तत्पर्याप्तवृत्तित्वाभावात् पर्याप्तवृत्तिकवह्नि-त्वादिभिन्नत्वमस्त्येवेति अलमतिविस्तरेणेति।

Colophon:

व्याप्तिवादार्थः समाप्तः।

1379

71405 **व्यावर्तकलक्षणविचारः**

Beginning:

व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति प्राञ्चः। व्यावृत्तिरितरभेदानुमितिः। व्यवहारः व्यवहर्तव्यत्वानुमितिः। पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यत्र इतरव्यापकी-

भूताभावप्रतियोगिगन्धवत्ताज्ञानात् पृथिव्यामितरभेदानुमितेर्जननात्। एवमियं पृथिवीति व्यवहर्तव्या गन्धवत्त्वादित्यत्र गन्धवत्त्वेन हेतुना पृथिव्यां तथा व्यवहर्तव्यत्वानुमितेर्जननाच्च इति तेषामभिप्रायः केश्चिद्वर्णितः। अत्रोच्यते। न तावदितरभेदानुमितिर्लक्षणप्रयोजनं, साध्यानिरुक्तेः। तथाहि —किमितरप्रतियोगिकभेदमात्रं साध्यम्, आहोस्विदितरत्वावच्छिन्नप्रतियोगिताकभेदः साध्यम्।

End:

यत्तु जलाद्यन्यतमप्रतियोगिकत्वविशिष्टभेदत्रयोदशकघटितचतुर्दशसमुदायानां साधनमभिप्रेतं, ते चाभावादौ प्रत्येकं प्रसिद्धाः। अतो न साध्याप्रसिद्धिः, न वा सिद्धसाधनम्। अभावादीनां निरुक्तसमुदायलिङ्गानां पृथिव्यामसत्त्वात्; अतीन्द्रियसाधारण्येन प्रत्यक्षाद्यप्रवृत्तेश्च इति तन्न; निरुक्तसमुदायघटकानां भेदानां प्रत्येकं सिद्धत्वेव जलाद्यनन्तर्भावोपपत्तावुक्तप्रसृतेरनादरणीयत्वात्, शीतस्पर्शाभावादिसमुदायेन जलाभावादाविव पृथिव्यामपि निरुक्तसमुदायसिद्धेश्च। प्रत्येकसिद्धौ समुदायसिद्धेर्निष्प्रत्यूहत्वाच्च।

1380

PM1737 संनिकर्षवादार्थः

Beginning:

तया लौकिकविषयतया मानसोत्पत्तिनियमार्थमात्मत्वेन कारणत्वस्यावश्यकत्वात्; न चात्मसमवेतादिनिष्ठलौकिकविषयतासंबन्धेन मानसोत्पत्तिं प्रति आत्मत्वेनैव हेतुतास्तु संबन्धलाघवात्। आत्मनिष्ठलौकिकविषयतासंबन्धेन मानसोत्पत्तिं प्रति तु तादात्म्यसंबन्धेनात्मत्वेन वा हेतुत्वं समवायसंबन्धेन धर्मत्वादिना वेत्यत्र विनिगमनाविरहः। सर्वत्रात्मप्रत्यक्षपूर्वमात्मनि धर्मादिसत्त्वे मानाभावेन धर्मत्वादेश्च संदिग्धव्यभिचारित्वात्, केवलाधर्मिकस्यापि सत्त्वसंभवात्, धर्मत्वादिजातौ मानाभावाच्चेति कस्यचित् प्रलपितमप्यपास्तम् इति वाच्यम्। स्वात्मतत्समवेतादिमानसोत्पत्तिसमये तत्कालोत्पन्नमानसाविषयेष्वपि परात्मतत्समवेतादिषु लौकिकविषयतया मानसोत्पादप्रसंगात् आत्मत्वस्य विशेषात्।

End:

न च शरीरनिष्ठतया मनसो हेतुत्वेऽपि संयोगसंबन्धेन मनस आत्मान्तरीयाद्यविशिष्टतया आत्मावच्छेदेनापि ज्ञानाद्युत्पत्तिवारणायावच्छेदकतासंबन्धेन शब्देतरात्मविशेषगुणोत्पत्तौ शरीरस्य चेष्टाया वा सामान्यतः कारणत्वमावश्यकमिति वाच्यम्, क्रियासंयोगकार्यकारणभावोक्तयुक्त्या तत्तच्छरीरव्यक्त्यवच्छिन्नं प्रति तत्तच्छरीरव्यक्तेः विशेष्यहेतुत्वावश्यकतया विशेषसामग्रीविरहादात्मान्तरीयादौ अवच्छेदकतासंबन्धेन ज्ञानाद्युत्पादासंभवात् तत्तच्छरीरावच्छिन्नातिरिक्तस्य ज्ञानादेरलीकत्वात्। न च संयोगसंबन्धेन मनसोऽवच्छेदकत्वसंबन्धेन शरीरे आत्मविशेषगुणोत्पत्तिं प्रत्येव कारणतया तद्विरहे स्वोत्पत्तिद्वितीयक्षणादौ आत्मनि समवायसंबन्धेनानुमित्याद्युत्पत्तौ किं बाधकम्, समवायसंबन्धेनोत्पत्तिनियामकस्य परामर्शादेः सत्त्वादिति वाच्यम्।

1381

PM1708 **संनिकर्षविचारः**

Beginning:

ननु चक्षुःसंयुक्तसमवायद्रव्यसमवेतचाक्षुषयोः केन रूपेण कार्यकारणभाव इति चेत्। अत्र प्राञ्चः। तत्पुरुषीयद्रव्यसमवेतचाक्षुषत्वेन कार्यता, तत्पुरुषीयचक्षुःसंयुक्तसमवायत्वेन कारणता। लौकिकविषयत्वविशेषणत्वोभयघटितसामानाधिकरण्यं प्रत्यासत्तिः। न च द्रव्यसमवेतचाक्षुषस्य समूहालम्बनरूपस्य गुणकर्ममात्रजात्यादावपि सत्त्वाद्व्यभिचार इति वाच्यम्। द्रव्यसमवेतत्वविशिष्टचाक्षुषत्वस्य कार्यतावच्छेदकत्वात्। विशिष्टस्य च द्रव्यसमवेत एवोत्पादात्। वस्तुतस्तु चाक्षुषत्वमेव कार्यतावच्छेदकं द्रव्यसमवेतत्वविशिष्टस्य लौकिकविषयत्वस्य कार्यतावच्छेदकसंबन्धत्वाच्च न क्वापि व्यभिचारः।

End:

मानसप्रत्यक्षप्रयोजकवैजात्यस्यैवात्मविशेषगुणसमवायिकारणतावच्छेदकत्वे स्वात्मादिमानसोत्पत्तिदशायां तत्कालोत्पन्नानुमित्यधिकरणेषु मनःसंयुक्तपरात्मादिषु लौकिकविषयतया मानसोत्पादप्रसंगस्य दुर्वारत्वाच्च। अनुमित्याद्यनुरोधेन तन्निष्ठमनःसंयोगेऽपि वैजात्यस्यावश्यकत्वात्। न च मनःसंयोगनिष्ठवैजात्यस्य लौकिकमानसप्रत्यक्षं प्रत्येव प्रयोजकतया मानसेतरज्ञानोत्पत्तिसमये सर्वांशालौकिकमानसप्रत्यक्षवारणायैव मानसेतरज्ञानसामग्र्याः प्रतिबन्धकत्वमावश्यकमिति वाच्यम्। अतिरिक्तप्रतिबध्यप्रतिबन्धकभावकल्पनाभिप्रायेणैव सर्वांशालौकिकमानसप्रत्यक्षापलापस्य कर्तुं शक्यत्वादिति।

Colophon:

इति **संनिकर्षविचारः**।

1383

69198(h) **संशयवादार्थः**

Beginning:

घटाविति समूहालम्बनवारणाय एकस्मिन्निति। घटो द्रव्यमिति ज्ञानवारणाय विरुद्धेति। विरुद्धत्वेन भासमानेत्यर्थः। तेन स्थाणुः पुरुषश्चेत्यत्र नातिव्याप्तिरिति ध्येयम्। घटत्वविरुद्धपटत्ववानयमिति ज्ञानवारणाय नानेति। ननु विरुद्धत्वेन भासमाननानाप्रकारकमित्यत्र प्रकारयोर्विरुद्धत्वेन भासमानत्वं नाम किं परस्पराभावत्वेन ज्ञायमानत्वं, किं परस्पराभावसमानाधिकरणत्वेन ज्ञायमानत्वं, अथवा परस्पराभावव्याप्यत्वेन न ज्ञायमानत्वं, सामानाधिकरण्याभाववत्त्वेन ज्ञायमानत्वं वा। नाद्यः, स्थाणुपुरुषसंशयाव्याप्तेः तत्प्रकारयोः स्थाणुत्वपुरुषत्वयोः परस्पराभावानात्मकत्वात्। वृक्षः संयोगी, तदभाववांश्चेति निश्चये अतिव्याप्तेश्च।

End:

भूतले घट इति ज्ञानेऽपि नातिव्याप्तिः, समभिव्याहृतपरस्परशब्दार्थत्वेनाभिमतज्ञानविषयीभूतसंबन्धस्य घटत्वसंबन्धस्य च स्वशब्दार्थविषयीभूत एकघटवृत्तित्वेन निश्चितत्वात्। न चैवं विषयविवक्षायामसंभवः, स्थाणुत्वादिसंबन्धस्य घटत्वसंबन्धस्य च पुरोवर्तिवृत्तिनिश्चये विशेषदर्शनात् संशय एव न स्यादिति वाच्यम्। प्रत्येकं तदवृत्तित्वेन निश्चयाभावेऽपि उभयत्वेन रूपेण तदवृत्तित्वनिश्चयसंभवात्। तेन रूपेण निश्चयस्यैव लक्षणे विवक्षितत्वात्। अत एव तथैवानुभवः। उभयत्र नास्त्येव किमिदं मन्दं वेत्येव संशयानुभवात्। तद्वृत्तित्वेन निश्चीयमानस्य विवक्षितत्वाद्वा नोक्तदोषः।

Colophon:

संशयपदार्थः संपूर्णः।

1386

69607(c) समासविचारः

Beginning:

अत्र बहुव्रीहौ चित्रगुमानयेत्यादौ चित्रगोस्वामिनो बोधो न, गोपदस्य चित्रपदस्य उभयपदस्य वा चित्रगोस्वामिनि लक्षणया एकपदवैयर्थ्यप्रसङ्गात्। नापि गोपदं गोस्वामिलक्षकं, गवि चित्रपदार्थस्याभेदेनान्वयः, पदार्थैकदेशे अभेदेनान्वयस्य अत्यन्तमव्युत्पन्नत्वात्। अन्यथा पशुरपशुः वेदोऽवेद इत्यादेरपि विना लक्षणां योग्यतापत्तेः। पश्वादिशब्दार्थैकदेशे रोमज्ञानादौ पश्वादिभिन्नत्वसत्त्वात्। न च गोपदेन शक्त्योपस्थापितस्य गोश्चित्रान्वितस्य लक्षणयोपस्थापिते स्वामिन्यन्वयः, गङ्गायां घोषमत्स्यावित्यत्रेव एकपदवृत्तिद्वयेन एकावबोधजनने क्षतिविरहादिति वाच्यम्। एकपदार्थयोः परस्परमन्वयबोधस्याव्युत्पन्नत्वात्।

End:

एकशेषे तु दम्पतीपूजाप्रकरणे ब्राह्मणावानयेत्यादौ ब्राह्मणपदमविदुषोऽपि ब्रह्मणत्वेनैव स्त्रीपुंब्राह्मणयोरवगमः। विभक्त्यर्थः पुंस्त्वं तु अयोग्यत्वात् स्त्रियां नान्वेति इति प्राञ्चः। विभक्तिरेव शक्त्या पुंस्त्वस्य लक्षणया च स्त्रीत्वबोधिका, ब्राह्मणपदं वा शक्त्या ब्राह्मणवाचकं लक्षणया ब्राह्मणीत्वेन बोधकम्। एवमश्वावित्यादावपीति नव्याः। शिवौ नमस्कार्यावित्यादौ शिवदुर्गान्यतरत्वेन लक्षणेति प्राञ्चः। शिवपदं शक्त्या शिवस्य लक्षणया शिवायाः बोधकमिति तु नव्याः। हरी नमस्कार्यावित्यत्र हरिपदं शक्त्या विष्णुत्वादिना बोधकः। युगपद्वृत्तिद्वयविरोधानभ्युपगमात्। एकयैव लक्षणया हरिपदमत्र विष्णुत्वादिना बोधकमित्यपि केचित्। कुम्भकारः क्षीरपायी खट्वाशायीत्यादावुपपदसमासे तु कुम्भादिपदानि लक्षणया कुम्भविषयकक्षीरकर्मकखट्वाधिकरणकादिबोधकानि। धात्वर्थनामार्थयोः भेदेनान्वयस्याव्युत्पन्नत्वात्। व्युत्पत्तेः संकोचे तु शक्त्या कुम्भादिविषयकत्वादिलक्षणयाप्युपपत्तिर्न भवतीति संक्षेपः।

Colophon:

इति रामरुद्रभट्टाचार्यविरचितः समासविचारः समाप्तः ।

1387

TR889 **साक्षात्त्वपरिष्कारः**

Beginning:

अज्ञातकरणजन्यज्ञानानुवृत्तो ज्ञातकरणजन्यज्ञानव्यावृत्तो धर्मविशेषः साक्षात्त्वमिति साक्षात्त्व-निर्वचनं कृतम् । इदं साक्षात्त्वनिर्वचनमयुक्तम्, साक्षात्त्वस्य जातितया शरीरनिर्वचनापेक्षा-भावादिति चेन्न, साक्षात्त्वस्य जातितया शरीरनिर्वचनापेक्षाभावेऽपि साक्षात्त्वं कुत्र वर्तत इत्यपेक्षायाम् अत्र वर्तते, अत्र न वर्तत इत्यवश्यं वाच्यमिति कृत्वा ज्ञातकरणजन्यज्ञानेषु न वर्तते, किं त्वज्ञातकरण-जन्यज्ञानेषु वर्तत इत्याह—अज्ञातकरणजन्यज्ञानानुवृत्तो ज्ञातकरणजन्यज्ञानव्यावृत्तो धर्मविशेषः साक्षात्त्वमिति ।

End:

तथा चाज्ञातार्थविषयककरणजन्यज्ञानानुवृत्तत्वे सति ज्ञानरूपकरणजन्यज्ञानव्यावृत्तत्वे सति धर्मविशेष इत्यर्थः । अज्ञातार्थविषयककरणजन्यज्ञानम् अयं घट इत्यादिज्ञानम् । तदनुवृत्तत्वं साक्षात्त्वस्य वर्तते । ज्ञानरूपकरणजन्यज्ञानमित्यादिव्यावृत्तत्वं च वर्तत इति । स्मृतेरज्ञातसंस्काररूप-करणजन्यज्ञानत्वेन साक्षात्त्वस्य तदनुवृत्तत्वाभावात् । यावदज्ञातकरणजन्यज्ञानानुवृत्तत्वमप्रसिद्धत्व-मेवेति तद्घटितलक्षणस्य अप्रसिद्धिरिति यदुक्तं तन्न संभवति । तल्लक्षणस्य सुस्थत्वात् ।

चकोरा इव शीतांशुं चातका इव नीरदम् ।
चञ्चरीका इवाम्भोजं त्वां दिदृक्षामहे वयम् ॥

अस्य श्लोकस्य अर्थो घण्यते वयं त्वां दिदृक्षामह इत्यन्वयः । अत्र उपमेयभूतानामस्माकं उपमानभूताः क इत्याकांक्षायां श्लोके विद्यमानचरणत्रयं तानुपमानभूतान् प्रतिपादयति ।

1389

70725 **सामग्रीप्रतिबन्धकत्ववादः**

Extra portion not found in (CSS 75 pp. 189-202).

Beginning:

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥

समाने विषये लौकिकप्रत्यक्षसामग्रीसत्वे अनुमितिसामग्रीसत्वे च लौकिकप्रत्यक्षमेवोत्पद्यते, न त्वनुमितिः, तदनन्तरं साक्षात्करोमीत्यनुव्यवसायस्यैवोदयात्। एवं समानविषयकशाब्दबोधानुमितिसामग्रीसमवधानदशायामपि शाब्दबोध एव जायते, तदुत्तरं शाब्दयामीत्याकारकानुव्यवसायस्यैवोदयादित्यतः पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्नित्वाद्यवच्छिन्नविधेयताकानुमितित्वाद्यवच्छिन्नं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिप्रत्यक्षादिसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम्। पर्वतो वह्निमानित्याद्याकारकप्रत्यक्षादिसामग्रीदशायां वह्निमान् पर्वतो घटवानित्याकारकानुमित्यनुदयात् तत्र व्यभिचारवारणाय विधेयतायाः प्रतिबध्यतावच्छेदककोटौ निवेशः। प्रतिबन्धकता च तथाविधप्रत्यक्षहेतुसमुदायत्वेन तादृशचाक्षुषादिहेतुसमुदायत्वेन वा, अतीतानागतचक्षुःसंनिकर्षादिघटितकारणसमुदायस्यैकदा असत्त्वात्।

End:

एतादृशतर्कगवेषणे स्पार्शनं प्रति चाक्षुषसामग्र्यादेः स्वातन्त्र्येण प्रतिबन्धकत्वं न कल्प्यते। किं त्वनुमितिसामग्री चाक्षुषसामग्रीकाले समाने विषयेऽनुमितिवारणाय चाक्षुषसामग्रीविशिष्टत्वावच्छिन्नं प्रति तादृशचाक्षुषसामग्र्यभावत्वेन हेतुता कल्प्यते। क्लृप्तेनैव निर्वाहात्। इच्छायास्तु स्वातन्त्र्येण हेतुता कल्प्यते। अन्यथा विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबन्धकभावबाहुल्यं स्यात्। न च तथापि स्पार्शनं प्रति स्पार्शनेच्छाया हेतुत्वकल्पने गौरवात्तदपेक्षया लाघवात् विजातीयत्वज्ञानोयोगत्वेन हेतुता कल्प्यत इति वाच्यम्। तादृशेच्छायाः कारणत्वपक्षे . . . प्रतिबन्धकतावच्छेदककौटौ तस्यानिवेशेन लाघवादित्यादिकं सुधीभिर्विभावनीयम्।

1398

69198(p) सामान्याभाववादार्थः

Beginning:

अनन्तकल्याणगुणा इतीशे न सन्ति हेयास्तु गुणाः श्रुतं प्राक्।
गुणाकरे त्वय्यधुनैव दृष्टः विष्णोरनन्यः खलु पार्थिवेन्द्रः॥

हेया गुणा न सन्तीत्यत्र सामान्याभावो विवक्षितः, न तु यत्किंचिद्विशेषाभावः, अतिप्रसंगात्। न च तत्र मानाभावः, तत्तद्रूपत्वलक्षणप्रतियोगितावच्छेदकापेक्षया रूपत्वसामान्यस्य प्रतियोगितावच्छेदकस्य भेदात् तदवच्छिन्नप्रतियोगिताकसामान्याभावोऽभ्युपेयः। साधकं विना प्रतियोगितावच्छेदकभेदस्याभावभेदप्रयोजकत्वात्। अन्यथा एकघटप्रतियोगिकानां ध्वंसप्रागभावादीनां भेदो न स्यादिति वदन्ति। अत्रेदमालोचनीयम्।

End:

न चासिद्धिवारणाय उपात्तविशेषणवैयर्थ्यमिति वाच्यम्। तावद्विशेषणाघटितबाधकाभावस्याखण्ड . . . . : . . . . उक्तबाधकद्वयाभावमात्रस्यैव हेतुत्वेनोपादाने व्यधिकरणधर्मघटत्वादौ

घटावृत्तिप्रतियोगितावच्छेदके व्यभिचारः। तद्वारणाय प्रतियोगिवृ ..... विशेष्यकरूपत्वस्य प्रतियोगितावच्छेदकत्वे सिद्धे तस्याभावभेदप्रतियोगिकत्वमाश्रित्य मानान्तरेण सामान्याभावः साधनीयः। अत्र प्रयोजकत्वं व्याप्यत्वं विवक्षितम्। तेन व्याप्यसंबन्धादिनाभावभेदमादाय न पूर्वोक्तव्यभिचारः। नापि हेतुसाध्ययोः वैयधिकरण्यम्। इदं तद्रूपत्वाच्छिन्नाभावप्रतियोगितद्रूपत्वभिन्नरूपत्वरूपावच्छेदकत्वात्। यत्रानवच्छेदकीभूतयद्धर्मभिन्नसमानाधिकरणावच्छेदकान्तरभेदवत्त्वं तत्र तदवच्छेदकावच्छिन्नप्रति . . .

1399

66623 **स्मृतिलक्षणविचारः**

Beginning:

अन्वयव्यतिरेकाभ्यां स्मृतेरनुभवजन्यत्वमिति सिद्धान्तस्थितिः। तत्र किमनुभवजन्यत्वं वा, समानविषयकानुभवजन्यत्वं वा, समानप्रकारकानुभवजन्यत्वं वा, समानविशेष्यकानुभवजन्यत्वं वा। नाद्यः, भिन्नविषयकादपि स्मृत्यापत्तेः। न द्वितीयः, निर्विकल्पकादपि स्मृत्यापत्तेः। न तृतीयः, समानप्रकारकादपि भिन्नविशेष्यकानुभवात् स्मृत्यापातात्। न चतुर्थोऽपि, प्रमेयमिति ज्ञानानन्तरं घट इति स्मरणापातात्। ननु स्वनिष्ठविशेष्यतानिरूपितविलक्षणविशेष्यतासमानाधिकरणविशेष्यता निरूपित . . . धिकरणस्वनिष्ठप्रकारतानिरूपितविलक्षणप्रकारतासमानाधिकरणप्रकारतानिरूपितप्रकारिताशाल्यनुभवजन्यत्वरूपस्वसमानविशेष्यकत्वावच्छिन्न .... नुभवजन्यत्वं स्मृतेर्वक्तव्यम्।

End:

ननु संशयस्थले तेन संबन्धेनैव घटत्वावच्छिन्न ..... रूपकार्योत्पत्त्यापत्तिः। कारणतावच्छेदकतावच्छेदक उक्तसंबन्धावच्छिन्नघटत्वादिकारणतावच्छेदकावच्छिन्नसंशयरूपकारणस्य सत्त्वादिति चेन्न। .... वनिष्ठप्रकारतानिरूपितप्रकारिताभावावच्छिन्नतन्निष्ठविलक्षणप्रकारतानिरूपितप्रकारिता एव कारणतावच्छेदकत्वघटकसंबन्धमध्ये निवेश्य घटादिसंशयस्थले .... दिनिष्ठतादृशविलक्षणप्रकारतानिरूपितप्रकारितारूपकारणतावच्छेदकसंबन्धावच्छिन्नघटत्वादिरूपकारणतावच्छेदकावच्छिन्नकारणाभावादेव संशय . . .

1401

73879(c) **स्वत्ववादार्थः**

Beginning:

अथ स्वत्वं निरूप्यते।

श्रीजयरामः सुकृती परमिह विदुषां विनोदाय।
शंकरकृतसाधनतानिःस्वापे स्वत्वमातनुते॥

क्रयाद्यन्यतमोत्पत्तिकालवृत्तिना यावद्विक्रयाद्यभावेन क्वचित् तत्तद्विक्रयाभावेन वा विशिष्टः तत्तत्क्रयाद्यन्यतमोत्तरकालसंबन्धः स्वत्वमिति प्राञ्चः। स च स्वीयस्वत्वध्वंसेच्छाप्रयोजकद्रव्यान्तर-स्वत्वेच्छाविशेषः क्रयः, द्रव्यान्तरस्वत्वेच्छाधीनस्वीयस्वत्वध्वंसेच्छाविशेषो विक्रय इति क्रयत्वार्थः। न च स्वत्वघटितस्य ज्ञाने स्वत्वज्ञानमित्यन्योन्याश्रयः क्रयत्वादेर्जातिविशेषत्वेन स्वत्वाघटितत्वात्। निरुक्तेच्छामात्रस्य क्रयादित्वे विक्रेतर्यविक्रेतृत्वाद्यापत्तेः। विशेषस्थजातिविशेषरूपस्य त्वयापि निवेश्यत्वात्, लक्षणे तत्तद्व्यक्तित्वेन क्रयादेर्निवेशासंभवाच्च, अतिरिक्तस्वत्वस्यापि प्रायेण क्रयादि-ज्ञाप्यत्वाच्च।

End:

अत्र केचित्। महत्त्वसमानाधिकरणोद्भूतरूपत्वेनैव कारणता न तूद्भूतरूपसमानाधिकरण-महत्त्वेन। न्यायनये पाकाद्रूपनाशोत्तरकाले प्राङ्महत्त्वसत्त्वेन प्रत्यक्षापत्तिरिति। तन्न। पाकाद्रूपना-शोत्तरकाले प्रत्यक्षस्येष्टापत्तिसंभवेन विनिगमनाविरहात्। अणुरपि विशेषोऽध्यवसायकर इति चेत्, तथाप्युद्भूतरूपविशिष्टमहत्त्वेन कारणत्वे विनिगमनाविरहात्, विशिष्टसत्त्वस्य नियामकत्वात् कल्पनम्, अतोऽपि विनिगमकमिति चेत्। मैवम्।

1402

PM1717 अनुमानखण्डक्रोडपत्रम्

Beginning:

..... दस्थ्यात् घटवद्गृहविषयकतादृशसमूहालम्बनज्ञानस्य विरोधिकोटिद्वयप्रकारक-त्वान्निश्चयत्वाभावात्। तद्बलनिवेशे च निर्वह्निर्वह्निमानित्येतादृशांशस्य विशेषणविशेष्यतावच्छेदक-भावापन्नत्वात् तदन्यविरोधिकोटिद्वयप्रकारकज्ञानान्यत्वस्य तत्र सत्त्वादिति दिक्। साधनसमानाधि-करणयावद्धर्मानधिकरणमात्रवृत्तिताशून्यावृत्ति यद्यत्तत्तद्भिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिक-रण्यम्। अत्रावच्छेदकत्वघटकावृत्तित्वं साध्यतावच्छेदकताघटकसंबन्धेन ग्राह्यमिति जगदीशेनोक्तम्। नन्वत्र कालिकसंबन्धेन धूमत्वविशिष्टः, समवायेन धूमत्वविशिष्टो यः तस्य साध्यतायां वह्निहेता-वतिव्याप्तिः, तस्य साधनसमानाधिकरणायोगोलकत्वाद्यनधिकरणं पर्वतादि तन्मात्रवृत्तिताशून्ये वह्नौ साध्यतावच्छेदकताघटकेन कालिकसंबन्धेन धूमत्वस्य वृत्तित्वादिति चेन्न।

End:

बाधज्ञानत्वस्याननुगतत्वेन बाधज्ञानत्वावच्छिन्नप्रतिबन्धकत्वस्यासत्त्वादिति गुरवः। येनेति-कल्पे सामानाधिकरण्येन वह्निविशिष्टद्रव्यसधर्मपर्वतत्वावच्छेदेन प्रमेयत्वादेः साध्यत्वे वह्न्यभाव-विशिष्टद्रव्येऽतिव्याप्तिः द्रव्यत्वावच्छेदेन वह्न्यभाववत्त्वनिश्चयस्य द्रव्यत्वसामानाधिकरण्येन वह्नि-मत्त्ववुद्धिविरोधित्वादिति चिन्त्यम्। यादृशविशिष्टविषयत्वम् अनुमितिप्रतिबन्धकतावच्छेदकी-भूतविषयितानतिरि . . .।

1403

70700(b) **अनुमितिलक्षणटिप्पणी**

Beginning:

अनुमितेः किं लक्षणमित्याकाङ्क्षायां व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणमित्युक्तं भवति। पर्वतो वह्निमानित्यनुमाने वह्निव्याप्यधूमवान् पर्वतः इत्याकारकव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वे सति ज्ञानत्वं वर्तत इति लक्ष्ये लक्षणसमन्वयः। व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरित्यत्र व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति व्याप्तिविशिष्टपक्षधर्मः, व्याप्तिविशिष्टपक्षधर्मस्य भावः व्याप्तिविशिष्टपक्षधर्मता, व्याप्तिविशिष्टपक्षधर्मतायाः ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं, व्याप्तिविशिष्टपक्षधर्मताज्ञानात् जन्यं व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं, तादृशज्ञानमनुमितिरिति।

End:

अतः दाहं प्रति उत्तेजकाभावविशिष्टमण्यभाववत् सिषाधयिषाविरहविशिष्टसिद्ध्यभावः अनुमितिकारणम्। सैव पक्षता। तथाच उक्तस्थले अतिव्याप्तिवारणाय पक्षताजन्यत्वे सतीति विशेषणं दीयते। एवंच तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वे सति ज्ञानत्वस्य विद्यमानत्वेऽपि पक्षताजन्यत्वस्याभावात् नातिव्याप्तिः। अतः निर्दिष्टमिदमनुमितिलक्षणं समुपपद्यते।

1404

72964(a) **अनुमितिलक्षणटिप्पणी**

Beginning:

अत्रानुमितिलक्षणशब्देनानुमितिग्रन्थोपदर्शितं यद् व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वरूपमनुमितिलक्षणं, तत् ज्ञानमुच्यते। तदात्मकैककार्यजनकज्ञानविषयत्वं तद्घटकीभूतायां व्याप्तौ पक्षधर्मतायां च वर्तत इति केचिद्व्याचक्षते। तन्मन्दम्। तल्लक्षणस्यानुमितिग्रन्थोपदर्शितपरिष्काररीत्या निर्वक्ष्यमाणपक्षतालक्षणघटकत्वाभावेन पक्षताघटकविशिष्टे तादृशलक्षणज्ञानप्रयोजकतायाः कथमप्युपपादयितुमशक्यत्वात्। तदेतन्मनसि निधायाह—अनुमितिलक्षणमनुमितिस्वरूपमिति। अयं च दोषस्तवापि समान इत्यभिप्रावेणाशङ्कते—यद्यपीत्यादि।

End:

अत्र च प्रतिज्ञावाक्यस्यपूर्वपक्षस्य च पक्षधर्मतानिरूपणरूपत्वाभावात् निरूपयतीत्यनुक्त्वा निरूपयितुमाहेत्युक्तं दीधितौ। तत्र भक्षितेऽपि लशुने न शान्तो व्याधिः। सिद्धान्तग्रन्थस्यापि पक्षधर्मताविषयकशाब्दानुकूलव्यापारत्वरूपपक्षधर्मतानिरूपणत्वासंभवात् इत्याशङ्कां व्युदसितुमाह—निरूपणं प्रतिपत्त्यनुकूलो व्यापार इति। तन्निरूपणत्वमिति। वस्तुतस्तु नेदं प्रतिज्ञावाक्यमात्र-

स्यावतरणं, किंतु समग्रपक्षधर्मताज्ञानस्य। एवं च निरूपयितुं ज्ञापयितुमाहेति ब्रूञ्धातोः शाब्दबोधानुकूलव्यापारोऽर्थः। तथा च पक्षताग्रन्थजन्यशाब्दबोधमूलकं पक्षधर्मताज्ञानमिति लब्धम्। ततश्च मूले पक्षधर्मता निरूप्यत इत्यस्य पक्षधर्मतापदार्थो ज्ञाप्यत इत्यर्थः। तज्ज्ञापनं कथमित्याशङ्कायां शाब्दबोधद्वारेति दीधितिकृतैव स्पष्टीकृतत्वादिति बोध्यम्। पक्षे धर्मता यस्येति जगदीशमतमिदं तथाविधलेखनासंगतेरिति। दीधितिकारस्य ह्ययं स्वभावः यन्मूले श्रूयमाणस्यैव वर्णस्य इतिशब्देन संधिः क्रियते न तु तत्स्थानीभूतवर्णस्येति। इतरे ग्रन्थकारा आदेशोपस्थापितस्य स्थानिन इतिशब्देन संधिं कुर्वन्तीति भावः।

1405

PM1720(f) अनुमितिवादक्रोडपत्रम्

Beginning:

पक्षधर्मतेत्यत्र पक्षधर्मताशब्दार्थप्रविष्टेत्यर्थः। पक्षपद न धर्मिमात्रपरम्, अपितु पक्षताविशिष्टपरमेवेति भावः। विशेषणमिति। ज्ञानपदार्थ इत्यादि धर्मत्वरूपविषयविशेषणतया विषयतया ज्ञानान्वयि। धर्मिरूपविषयांशे च तस्य न विशेषणत्वसंभवः, परामर्शविषयस्य तस्य तद्विषयविशेषणत्वासंभवात्। दण्डाद्यविषयकस्य पुरुषादिज्ञानस्य पुरुषादेर्दण्डादिमत्त्वेऽपि दण्डादिविशिष्टपुरुषाद्यविषयकत्वात्। दण्डपुरुषावित्यादिज्ञानस्य दण्डादिविषयकत्वेऽपि न तद्विशिष्टविषयकत्वं, विषयतावच्छेदकस्यैव विशेषणत्वात्। अतः पक्षतोपलक्षितधर्मिविषयकमेव ज्ञानमिह विवक्षितम्। तथा सत्यपि पक्षताजन्यत्वसहितं परामर्शजन्यत्वं जन्यान्ताल्लभ्यते।

End:

धूमाद्वह्निमानित्यत्र धूमपदस्य मुख्यार्थपरतैवेति मते यथा हेतुपञ्चम्या धूमस्य कारणतायां विषयतया अवच्छेदकत्वरूपं वह्निज्ञानप्रयोजकत्वमेव प्रतिपाद्यते, तथात्रापि हेतुतृतीयया साधनतावच्छेदकत्वप्रत्यायनसंभवात्। आरुण्यस्य साधनतावच्छेदकत्वं च विषयतासंबन्धेन तस्य आधेयतया द्रव्यद्वारैव आश्रयस्य साधनतयैव सिद्ध्यतीत्युपपद्यत इति तदर्थः। एवं च सति गोः क्रयसाधनतायां कृतिसिद्धायां आरुण्यस्य तदवच्छेदकत्वे लाघवं, तदाश्रयद्रव्यान्तरनिष्ठकारणतावच्छेदकत्वे गौरवम् इति प्रतिसंधानाद्गोनिष्ठकारणतायामारुण्यावच्छिन्नत्वनिर्णये आरुण्यविशिष्टस्य गोः क्रयसाधनत्वमर्थात् प्रतीयते। एतादृशबोधेऽप्यरुणयेतिपदस्य तात्पर्याद्गुणिपरतया आरुण्यपदस्य गुणिपरगोपदसमानलिङ्गतेति कारिकाभिप्राय इति कृतं पल्लवितेन।

Colophon:

गादाधर्याम् अनुमितिवादे मिश्रव्याख्याने पक्षधर्मतेत्यत्र इदं क्रोडपत्रद्वयं बोध्यम्।

1406

PM1718 अवच्छेदकतानिरुक्तिक्रोडपत्रम्

Beginning:

. . . ष्यत्वाभावस्य प्रतियोगितावच्छेदकं लाघवात् धूमत्वमेव। साध्यतावच्छेदकतावच्छेदकताघटकसंबन्धेनाभाववति धूमे धूमत्वप्रकारकप्रमाविशेष्यत्वस्य स्वरूपसंबन्धेन वृत्तेः। किं तु स्वरूपसंबन्धेन धूमे वर्तमानं गगनादिकमेव। तद्भिन्नत्वस्य साध्यतावच्छेदकीभूतधूमत्वप्रकारकप्रमाविशेष्यत्वे सत्त्वादिति दोषः। साध्यतावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकाभावनिवेशो जगदीशेन तु दत्तः। न धूमत्वप्रकारकप्रमाविशेष्यत्ववान् वह्निरित्यत्रायोगोलके संयोगसंबन्धेन वर्तमानो यः तस्य संयोगसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः तत्प्रतियोगितावच्छेदकं यदयोगोलकवृत्तित्वम् अयोगोलकावृत्तित्वाभावरूपं, साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नप्रतियोगिताकं, तदभाववति अयोगोलकवृत्तिवह्नौ धूमत्वप्रकारकप्रमाविशेष्यत्वस्य स्वरूपसंबन्धेन वर्तमानत्वात्।

End:

एतत्कल्पे सत्तावान् प्रमेयत्वादित्यत्र हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं सत्तात्वं, तदवच्छिन्नाभाववति साध्यताघटकसमवायसंबन्धेन वृत्तेरप्रसिद्धया हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकपदेन सत्तात्वस्योपादानं न संभवति। किं तु घटत्वादिरेव, तदवच्छिन्नाभाववति सत्तात्वस्य विशिष्टसंबन्धतया सत्तात्वं पारिभाषिकावच्छेदकं न स्यात्। अतः साध्यतावच्छेदकसंबन्धसामान्ये तदवच्छिन्नाभाववदनुयोगिकत्व एतद्धर्मविशिष्टप्रतियोगिकत्व एतदुभयाभावः तद्धर्म एव पारिभाषिकावच्छेदकं, तदवच्छिन्नाभावः। अत्र तत्पदं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकपरम्। तथा च साध्यतावच्छेदकीभूतसमवायसंबन्धेन सत्तात्वावच्छिन्नप्रतियोगिताकत्वेऽपि सत्तात्वाभाववदनुयोगिकत्वविरहात्तादृशोभयाभावसत्त्वेन सत्तात्वस्य पारिभाषिकावच्छेदकत्वोपपत्तेः। अत्रेदमवधेयं, यत्र प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव . . .

1410

PM1544 अवयवक्रोडपत्रम्

Beginning:

तादृशयत्किंचिच्छाब्दबोधनिरूपिता शब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वस्य विवक्षितत्वान्नास्माकं न्यायैकदेशे अतिव्याप्तिः। यत्किंचिच्छाब्दपदं च प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकसमूहालम्बनबोधपरम्। तथाच तादृशसमूहालम्बनशाब्दनिरूपितजनकतान्तर्गतप्रतिज्ञाद्यानुपूर्वीविषयकः, ज्ञानत्वावच्छिन्ना जनकतापि तासां प्रत्येकमवच्छेदककोटिप्रविष्टा या यत्किंचिज्ज्ञानीया विषयता तदाश्रयवर्णत्वव्यापक-

समुदायत्वं प्रतिज्ञादिपञ्चक एव। न तु केवलप्रतिज्ञायामिति नातिव्याप्त्यवकाशः। तादृशशाब्दबोधनिरूपिता या या जनकता तासामवच्छेदकत्वस्यैकविषयतायामसत्त्वेऽपि एतज्जनकतावच्छेदकीभूतयत्किंचिज्ज्ञानीयविषयतानिरूपितवर्णत्वव्यापकं सत् यत्समुदायत्वं, एतज्जनकतावच्छेदकीभूतविषयतानिरूपकं सत्तज्जनकतावच्छेदकीभूतविषयतानिरूपकं यत्किंचिज्ज्ञानं तदीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वमित्यस्य वा विवक्षितत्वान्नाप्रसिद्धिः।

End:

एवं चैत्रः पचति चैत्रत्वादित्यादौ यो यः चैत्रः स पचतीत्युदाहरणजन्यबोधः चैत्रत्वव्यापककृतिप्रकारक एव न तु कृत्याश्रयप्रकारक एव, नैयायिकमते आख्यातार्थकृतिप्रकारकबोधस्यैव अनुभवसिद्धत्वात्। तथाच निरुक्तप्रक्रान्तताया: कृतिरूपसाध्याश्रयनिष्ठविशेष्यताया: तज्जन्यबोधे असत्त्वात् तत्रातिव्याप्तिरिति ध्येयम्। प्रकृतपक्षतावच्छेदकावच्छिन्नान्वितस्वार्थबोधकतदुपस्थापितार्थान्वितस्वार्थबोधकत्वे सति न्यायावयवत्वात्। तत्र साध्यतावच्छेदकावच्छिन्नान्वितस्वार्थबोधकत्वोक्तौ प्रमेयं प्रमेयत्ववदित्यत्र . . .

1411

PM1719 अवयवक्रोडपत्रम्

Beginning:

भट्टाचार्याणां तु परस्परं निरूप्यनिरूपकभावापन्नसकलविषयितानां तादृशजनकतावच्छेदकत्वेनैकदेशमात्रविषयकज्ञानीयविषयिताया: अतथात्वेन तत्रातिव्याप्त्यभावेन विशेष्यदलवैयर्थ्यापत्त्या तत्सार्थक्याय तादृशजनकतान्तप्रवेशनमित्याशय इति। यत्तु स्वानवच्छेदकविषयतावैशिष्ट्यतादृशजनकतावच्छेदकं यद्यत् स्वं तत्तदभावकूटवत्त्वं ज्ञाने निवेश्यं, तादृशं स्वं प्रतिज्ञाहेतुज्ञाने प्रसिद्धं, तत्र न हेतुज्ञानत्वावच्छिन्नजनकता स्वपदेन ग्राह्या, किं तु तदन्यचतुष्टयीति न धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिरिति। तन्न। तथा सति पर्याप्तिनिवेशनमसंगतं स्यात्! प्रतिज्ञाहेतुज्ञानस्य तादृशसर्वस्यैव वारणात् तन्मते प्रतिज्ञाहेतुज्ञानत्वावच्छिन्नजनकतायास्तादृशहेतुशब्देन ग्रहीतुमशक्यतया तत्रातिव्याप्तिवारणाय तदिति। अत्रेदं चिन्त्यम्।

End:

वस्तुतस्तु धर्मितावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपकविषयतान्या साध्यतावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपकविषयतान्या या लिङ्गविषयता तच्छून्यत्वं वाच्यम्। हेतुत्वपक्षस्थले दधित्वप्रकारतानिरूपितसंसर्गतानिरूपकविषयता दधित्वप्रकारतारूपा विषयतानवच्छिन्नदधित्वविशेष्यता च तदन्या साध्यतावच्छेदकप्रकारतारूपा दधित्वावच्छिन्नविशेष्यता च तदन्या लिङ्गविषयता तच्छून्यत्वस्य तादृशप्रतिज्ञान्यशाब्दबोधे सत्त्वान्नाव्याप्तिरिति दिक्। प्रकृतहेतुतावच्छेदकावच्छिन्नसाध्यकानुमितित्वावच्छिन्नजन्यतानिरूपितपरामर्शनिष्ठजनकतावच्छेदकीभूता या पक्षविष-

यता तन्निरूपितावच्छेदकतान्यपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपितविषयता तदंशे विशेषणविधयावच्छेदकतापर्याप्त्यधिकरणं यत्साध्यव्यापकत्व . . .

1412

PM1722 **अवयवक्रोडपत्रम्**

Beginning:

तावदर्थविषयकशाब्दबोधनिरूपिता शब्दज्ञाननिष्ठा या कारणता तदवच्छेदककोटिप्रविष्ट-यत्किंचिज्ज्ञानीयविषयतानिरूपकवर्णत्वव्यापकसमुदायत्वमिति। अत्र तादृशज्ञाननिष्ठा या या कारणता तत्तदवच्छेदकतादृशवर्णवृत्तिसमुदायत्वनिवेशनेनैवैकदेशवारणे व्यापकत्वनिवेशनम्। अत्रेदं चिन्त्यम्। तादृशज्ञाननिष्ठकारणतावच्छेदकता न्यायघटकयावद्वर्णवृत्तिसमुदायत्वावच्छिन्नविष-यितात्वेन तादृशसमुदायत्वविशिष्टनिरूपितविषयितात्वेन प्रत्येकं तद्वर्णत्वावच्छिन्नविषयितात्वेनाव-च्छिद्यत इति कल्पेऽयं परिष्कार इति नार्थः। तादृशोपनयोत्तरत्वविशिष्टनिगमनत्वरूपानुपूर्वीप्रकारक-ज्ञानत्वेन तादृशशाब्दबोधं प्रति कारणतावच्छेदकविषयितानिरूपकतावच्छेदकत्वस्य तादृशानुपूर्वी-रूपधर्मे सत्त्वेन तादृशसमुदायत्वे तदभावात्। अतएव तादृशधर्माः प्रतिज्ञादीनामानुपूर्वीविशेषा एवेति संगच्छते। इत्थं च तादृशविषयितानिरूपकतावच्छेदकसमुदायत्ववत्वं न न्यायलक्षणं संभवतीति भावः।

End:

तथाहि—स्वानवच्छेदकविषयितासामान्याभावः तादृशविषयितावैशिष्ट्यजनकत्वसामान्याभावो वाच्यः। अन्यथा प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तेः। तादृशजनकतावच्छेदकोपनयविषयताशून्यत्वस्य तज्ज्ञाने सत्त्वात्। तथाच तदर्थविषयकद्वित्वपर्याप्तावच्छेदकताकजन्यतानिरूपितजनकतावच्छेदकविष-यितावत्त्वेतज्ज्ञाने प्रतिज्ञावाक्यान्तरविषयिताव्यापकतद्भागविषयिताया: सत्त्वेन तद्भागविषयिताया एतज्ज्ञानीयजनकतावच्छेदकविषयित्वाघटकत्वम्। एवं ज्ञानान्तरीयतादृशविषयित्वाघटकत्वमेतत्प्रति-ज्ञाविषयिताव्यापकैतद्भागविषयितायां बोध्यम्। एवं च क्वापि प्रतिज्ञाज्ञाने न तादृशविषयितासामा-न्याभाव इत्यसंभव इति।

1413

PM1727(d) **अवयवक्रोडपत्रम्**

Beginning:

. . . . प्रतिज्ञादिसमुदाये अतिप्रसंगवारणाय स्वाश्रययत्किंचित्प्रतिज्ञाव्यवहितोत्तरेत्यादि-परिष्कारादरे तावतैव व्युत्क्रमप्रयुक्तप्रतिज्ञादिघटितसमुदायेऽतिव्याप्तिवारणसंभवे तद्वारकविशेषणं

व्यर्थम्। तथापि सामान्यतः प्रतिज्ञाव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तत्तदन्यत्वस्यैव तदर्थतया तद्विशेषणदाने एकैकन्यायघटकप्रतिज्ञादिसमुदाये अतिप्रसंगस्य संभवेन तत्रैव स्वाश्रय-यत्किंचित्प्रतिज्ञेत्यादिना परिष्कारकरणात् तस्य स्वतन्त्रविशेषणान्तरत्वाभावादुक्तशङ्कानवकाशः।

End:

तथापि उक्तरीत्या एकैकन्यायवृत्तिसमुदायत्वस्यापि स्वन्यूनवृत्तिन्यायान्तरघटकप्रतिज्ञादि-घटितसमुदायनिष्ठसमुदायत्वकत्वात् असंभव इत्युचितानुपूर्वीकत्वविशेषणम्। न चैवमपि एकैक-प्रतिज्ञादिघटितन्यायवृत्तिसमुदायत्वे उचितानुपूर्वीकत्वसत्त्वेऽपि तादृशसमुदायत्वनिष्ठान्यूनवृत्तिता-निरूपकभिन्नत्वदलासत्त्वेन उक्तासंभवो दुर्वार इति वाच्यम्। प्रतिज्ञादिवृत्तित्वं च प्रतिज्ञा . . .

1414

66356(b) अवयवक्रोडपत्रम्

Beginning:

अवयवस्य न्यायलक्षणे तावदर्थविषयकयत्किंचिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किंचिज्ज्ञानविषयताश्रयवर्णत्वव्यापकसमुदायत्वमित्यत्र नाना-वाक्यविषयकज्ञानानां तादृशबोधजनकत्वादसंभव इति बोधे यत्किंचित्त्वनिवेशः। समानानुपूर्वीक-नानावाक्यविषयतानामप्यतथात्वात् एकवाक्यघटितस्य न्यायस्य न्यायत्वानुपपत्तिः। अतो द्वितीय-यत्किंचित्त्वनिवेशः। एकविषयतायाः यावज्जनकतावच्छेदकत्वासंभवेऽपि प्रत्येकं तत्तज्जनकतावच्छे-दकविषयताश्रयवर्णत्वव्यापकत्वस्य वाक्यपञ्चकसमुदायत्वे सत्त्वान्नासंभवः।

End:

न च तत्र विनिगमनाविरहप्राप्तप्रकारतावच्छिन्नजन्यतामादायातिव्यातिरिति वाच्यम्। तादृशविशेष्यतामिन्नविशेष्यतानवच्छिन्नविशेष्यत्वावच्छिन्नजन्यताया निवेशात् नातिव्यातिरिति।

केचित्तु साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतामिन्नत्वे सति तादृशविशेष्यत्वानवच्छिन्नमुख्यविशेष्यताशून्यबोधजनकत्वं विवक्षणीयमित्याहुः।

अन्ये तु निरुक्तविशेष्यतामिन्नमुख्यविशेष्यत्वानिरूपकबोधवृत्तिमुख्यविशेष्यतावच्छिन्नजन्य-तानिवेशेनैव प्रतिज्ञाजन्यबोधमादाय निरुक्तहेतावतिव्याप्तिवारणे गुरुतरान्यूनविषयकत्वदलवैयर्थ्यमिति भट्टाचार्याभिप्रायमाहुः।

1415

69896(e) अवयवक्रोडपत्रम्

Beginning:

उक्तेति। विद्वेषादिति। वस्तुतस्त्विति कल्पे बहिर्भूतत्वान्तापूरणेन तन्निर्वचनानावश्यकत्वादिति भावः। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतेत्यादि। अत्र पञ्चमविषयतायामवच्छेदकत्वं द्विविधम्—

कोटिप्रविष्टस्यावच्छेदकत्वमतसिद्धं, स्वातन्त्र्येण विनिगमनाविरहप्रयुक्तं च। तत्र प्रथमे विषयतानिष्ठावच्छेदकतावच्छेदको धर्मः व्यापकत्वविषयतानिरूपितत्वं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नविषयतात्वं चेत्युभयम्। द्वितीये चतुर्थविषयतानिरूपितत्वसहितमिति भेदः। मध्यवर्तिविषयतयोरभेदे यथाश्रुत एव निरूप्यनिरूपकभावः। अन्यथा मुख्यविशेष्यतानिरूपितविषयत्वावच्छिन्नविषयतानिरूपितविषयत्त्वावच्छिन्नविषयतानिरूपितविषयत्वावच्छिन्नविषयतानिरूपितविषयत्वांश इति रीत्या वक्तव्यम्। न च तादृशावच्छेद्यावच्छेदकभावनिवेशे व्यतिरेकिपरामर्शीयसाध्याभावव्यापकत्वविशिष्टहेत्वभावविषयताया न संग्रहः। संसर्गताख्यद्वितीयविषयत्वावच्छिन्नविषयताया अप्रसिद्धेः। एवं प्रतियोगित्वनिष्ठसांसर्गिकविषयत्वावच्छिन्नविषयताया अपीति वाच्यम्।

End:

अन्वयव्यतिरेक्युदाहरणजन्यबोधादौ सत्त्वान् नातिव्याप्तिरिति चेत्। न। एवं सति वह्निमान् धूमादित्यादौ यत्र धूमस्तत्र वह्निरित्युदाहरणजन्यबोधे परामर्शीयाधिकरणनिष्ठचतुर्थविषयतानिष्ठावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वविशिष्टविषयतात्व - विशिष्टावच्छिन्नप्रतिबन्धकतावच्छेदकविषयताशून्यत्वसत्त्वेन तादृशोदाहरणेऽतिव्याप्तेः। तादृशोदाहरणजन्यबोधे वह्न्यंशे अधिकरणवृत्तित्वस्य प्रकारताया अभावेन साध्यविषयतानिरूपितत्वविशिष्टाधिकरणविषयताशून्यत्वस्य निरुक्तबोधे अक्षतत्वात्। न च तादृशविशिष्टविषयत्वावच्छिन्ना या महानसधूमव्यापकवह्न्यभाववान् इति ज्ञानीयप्रतिबन्धकता तदवच्छेदिका महानसवृत्तिवह्निविषयतापि महानसविशेष्यकविशिष्टवह्न्यभावबुद्धौ महानसविशेष्यकविशिष्टवह्निप्रकारकज्ञानस्यैव महानसवृत्तित्वप्रकारकज्ञानस्यापि प्रतिबन्धक . . . . .

1416

71339(b) अवयवक्रोडपत्रम्

Beginning:

मूले अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्याय इति न्यायलक्षणमुक्तम्। तत्र प्रयोजकान्तस्य शाब्दविशेषपरिचायकतया न्यायाद्विशिष्टकार्थविषयकः समूहालम्बनरूपो वा यादृशबोधो जायते तादृशयत्किंचिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वं न्यायत्वमिति भट्टाचार्येणाभिहितम्। तत्र पर्वतो वह्निमानित्येकविधशाब्दबोधे पर्वतो वह्निमान् पर्वतो दहनवानित्यादिनानाविधानुपूर्वीप्रकारकशब्दज्ञानानामेव हेतुतया तत्कारणतावच्छेदककोटिप्रविष्ट यत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वं नैकानुपूर्वीकवाक्यसमुदायत्वमिति प्रथमं यत्किंचिदिति।

End:

अथ यद्विषयविशेषपक्षसाध्यकस्थले प्रतिज्ञादिविषयकज्ञानं नियमत उदासीनवाक्यविषयकं तत्रत्यन्याये अव्याप्तिर्दुर्वारेति चेन्न। द्वितीयव्यापकताघटकाधिकरणतायां स्वजन्यप्रतिज्ञार्थविषय-

कशाब्दबोधजनकतावच्छेदकत्वस्वीयवर्णनिष्ठविषयत्वोभयसंबन्धावच्छिन्नत्वस्य निवेशनीयत्वात्। यद्वा शाब्दबोधनिरूपितसमुदायत्वं न्यायानुगतलक्षणम्। स्वनिष्ठजन्यतानिरूपितजनकतावच्छेदकत्वस्वाश्रयज्ञानवत्त्व उभयसंबन्धावच्छिन्नस्वाधिकरणतावद्वृत्तिभेदप्रतियोगितावच्छेदकत्वसंसर्गावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसंबन्धेन। स्वाश्रयज्ञानवत्त्वं च पूर्वोक्तसंबन्धेन। आश्रयत्वमपि तथैवेति सुधीभिर्विभावनीयम्।

1417

72083(f) अवयवक्रोडपत्रम्

Beginning:

तावदर्थविषयक यत्किञ्चिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किंचिज्ज्ञानीयविषयतानिरूपकवर्णत्वव्यापकसमुदायत्वं न्यायत्वमिति। तत्रावच्छेदकतावच्छेदकसाधारणावच्छेदकतालाभाय कोटिप्रविष्टत्वनिवेशः। यदि चावच्छेदकतावच्छेदकसाधारणावच्छेदकता न मन्यते, तथापि विनिगमनाविरहेण तावद्वर्णविषयतानामेवावच्छेदकत्वं संभवति, परं तु तादृशी या या कारणता तत्तदवच्छेदकविषयतानिरूपकवर्णवृत्तिसमुदायत्वनिवेशेनैवैकदेशवृत्तिसमुदायत्ववारणसंभवे व्यर्थं व्यापकत्वनिवेशनम्। श्रमान्यत्वं तु कल्यद्वय एव निवेशनीयमिति नोदासीनवर्णवृत्तिसमुदायत्वमादायातिव्याप्तिरित्युपाध्यायमतपरिष्कारः। अत्रेदं बोध्यम्। तावदर्थविषयकयत्किञ्चिच्छाब्दबोधनिरूपिता या या जनकता तत्तदाश्रयीभूतयत्किंचिज्ज्ञानीयविषयतानिरूपकवर्णत्वव्यापकसमुदायत्वनिवेशेनैवोपपत्तौ व्यर्थमवच्छेदककूटनिवेशनं न्यायविषयकोदासीनवर्णविषकज्ञानमादाय उदासीनसाधारणसमुदायत्वस्य तत्राप्यावश्यकत्वात्। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वनिवेशेनैव वारणसंभवात्।

End is same as in 1418.

1418

72823(e) अवयवक्रोडपत्रम्

Beginning is same as in 1417.

End:

अत्रेदमालोचनीयम्। भट्टाचार्यमते एकधर्मविशेष्यतापन्नस्य न प्रकारताविशेष्यतात्मकता, किं तु भिन्नेति कथमनुगमः। तथा हि—अन्वयपरामर्शस्थले पक्षविशेष्यतामारभ्य हेतुव्यापकत्वविषयतानिरूपितसाध्यविशेष्यता नवमी। व्यतिरेकपरामर्शस्थले पक्षविशेष्यतामारभ्याष्टमी। साध्याभावव्यापकहेत्वभावविषयतेति पक्षसंसर्गमादायापि न निस्तार इति चेत्। अत्राहुः। व्यतिरेकपरामर्शस्थले पक्षविशेष्यतानिरूपितसंसर्गीयविषयता यथा धर्तव्या तथा अपरापि संसर्गीयविषयता हेतौ प्रतियोगित्वविधयैतावदनिरूपिता प्रतियोगित्वे हेत्वभावविषयतानिरूपितत्वात्मिका संसर्गविषयता धर्तव्येति न नवमीत्वानुपपत्तिरिति।

1420

PM1721 **अवयवपञ्चमविषयताविचारः**

Beginning:

अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणधर्मत्वेन पञ्चमविषयतानिष्ठा या जनकतावच्छेदकता तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्वेन वा अनुगमे साध्यविषयताया हेतुव्यापकत्वविषयतानिरूपितत्वपक्षविषयतेत्यादिक्रमेण अधिकरणविषयतानिरूपितत्वोभयविशिष्टसाध्यातावच्छेदकावच्छिन्नविषयतात्वेनैव अवच्छेदकतया तादृशपर्याप्त्यधिकरणं तादृशनिरूपितत्वद्वयविशिष्टसाध्यविषयतात्वमेव। तदवच्छिन्नविषयताशून्यत्वस्य उदाहरणजन्यबोधे सत्त्वेन उदाहरणे अतिव्याप्तिः। अतः चतुर्थविषयतानिरूपितविषयतांशे विशेषणविधयेत्युक्तम्। ननु तादृशविशेषणविधया अवच्छेदकतावच्छेदकत्वमप्यधिकरणविषयतानिरूपितत्वान्तर्भावेणैव पर्याप्तमित्युक्तदोषतादवस्थ्यम्। तादृशावच्छेदकताश्रयधर्मावच्छिन्नाभावनिवेशे साध्यविषयतात्वमादाय असंभवात्, पर्याप्तिनिवेशस्य आवश्यकत्वादिति चेत्तत्राहुः।

End:

परं तु दीधितिकृतां साध्यतावच्छेदकहेतुतावच्छेदकयोर्व्यावृत्तिदानं पक्षान्तर एव संगमनीयम्। तत्र लिङ्गाविषयकत्वघटितलक्षणापेक्षया गौरवमेतल्लक्षणे दोष इति वाच्यम्। लिङ्गाविषयकत्वघटितलक्षणे लिङ्गांशनिवेशस्यानुमितिसमानविषयकत्वसार्थक्यार्थतया प्रक्षालनाद्वीति न्यायग्रस्तत्वात् लिङ्गपदस्य लिङ्गार्थकत्व एव मणिकृतोऽस्वरसः। अत एव तेनोदाहरणादिव्युदास इत्युक्तं संगच्छते। अन्यथा लिङ्गाविषयकत्वविशेषणेन हेतोरपि वारणाद्व्यतिरेक्युदाहरणादेरवारणात् न्यूनताधिकतयोरापत्तेरित्यलं पल्लवितेन।

1421

70310(c) **अवयवपञ्चमविषयताविचारः**

Beginning is same as in 1420.

End:

अत्र पक्षविशेष्यत्वाद्यवच्छिन्नजनकतानां मध्ये साध्यविषयत्ववती या तुल्यतया हेतुव्यापकत्वविषयतानिरूपितत्व निरुक्ताधिकरणविषयतानिरूपितत्वोभयविशिष्टविषयिता तदवच्छिन्नजनकतायाः तुल्यतया हेतुव्यापकत्वविषयतानिरूपितत्वनिरुक्ताधिकरणविषयतानिरूपितत्वोभयविशिष्टसाध्यविषयत्वावच्छिन्नजनकताया अधिकरणविषयतानिरूपिता या हेतुव्यापकसाध्यविषयता तदवच्छिन्नजनकतायास्तथाविधाया अप्रसिद्ध्या न घटकतादृतीयजनकतामादाय साध्यविषयत्वत्वमात्रस्यानुगमापत्त्यासंभवापत्तिः। अतश्चतुर्थविषयतानिरूपितत्वे धर्मितावच्छेदकतापर्याप्तिनिवेशः। नन्वत्र चरमजनकतां

घटकीकृत्य चतुर्थविषयतानिरूपितत्वनिरूपितधर्मिविषयतावच्छेदकविधया या जनकतावच्छेदकतावच्छेदकता तत्पर्याप्त्यधिकरणत्वेनाप्यनुगमः संभवतीति चेत् का क्षतिः। तद्ग्रन्थस्य दिक्प्रदर्शनपरतया तदनुक्तावपि न्यूनताविरहात्।

1422

72810 अवयवपञ्चमविषयताविचारः

Beginning:

प्रतिज्ञाहेतुसमुदायवारणाय स्वानवच्छेदकविषयिताविशिष्टजनकताशून्यत्वं ज्ञाने निवेशितम्। ननु धूमादालोकवान् पर्वतो वह्निमान् इति ज्ञाने नियतस्वानवच्छेदकीभूतपर्वतादिविषयताविशिष्टायाः हेतुविशिष्टहेतुत्वबोधजनकतायाः धूमादित्यंशे सत्त्वात् अव्याप्तिरिति चेन्न, यादृशजनकतामादाय लक्षणसमन्वयः क्रियते तत्र तादृशजनकतायाः स्वपदेन धर्तव्यत्वात्; या च तादृशान्यतमजन्यतानिरूपितजनकता स्वानवच्छेदकविषयिताविशिष्टतथाविधजनकताशून्य यज्ज्ञानीयस्वावच्छेदकीभूतविषयतानिरूपितवर्णसमुदायत्वपर्यवसितमिति न दोषः। अत्र स्वानवच्छेदकीभूतविषयिताशून्यत्वनिवेशेनैव प्रतिज्ञाहेतुसमुदायवारणं संभवति, प्रतिज्ञाहेतुसमुदायविषयकज्ञानस्य तज्जनकतानवच्छेदकावयवान्तरार्थविषयितावत्त्वमिति। महाचार्याणां तु . . .

End:

ननु निरुक्तन्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकता तत्र नास्ति तादृशजनकतायां तादृशभिन्नत्वनिवेशेऽपि वह्नेः संयोगवत्त्वधर्मपर्वतसंयोगवान् दहनादित्यादौ हेत्ववयवे अतिव्याप्तिवारणायान्यूनविषयकत्वं देयमेव, तादृशन्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वस्य प्रतिज्ञाघटकभागविषयतायामेव सत्त्वेन हेत्ववयवनिष्ठविषयतायामभावेन न तत्रातिव्याप्तिः। तत्स्थलीयप्रतिज्ञाघटकभागहेत्ववयवयोः आनुपूर्वीभिन्नत्वेन तदवच्छिन्नविषयितयोर्भेदात्। न चैतादृशस्थलीयातिव्याप्तिवारणायान्यूनविषयकत्वनिवेशे धूमादालोकवानित्यादिधीविरोध इति वाच्यम्। तत्रत्येत्यादिपदेन एतद्धीसंग्रहणे विरोधाभावात्। हेत्वन्तभागे उपनयादिनिगमनान्तभागे च पक्षतावच्छेदकावच्छिन्नविशेष्यकधूमज्ञानज्ञाप्यवद्भिन्नत्वावच्छिन्नप्रकारकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयताश्रयस्य समुदायत्वस्य सत्त्वात्। अनतिरिक्तेति।

1423

PM1541(b) केवलान्वयिक्रोडपत्रम्

Beginning:

यादृशरूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वं प्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नतत्कालीनतत्पुरुषीयानुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं तादृशरूपनिष्ठविषयतात्वव्यापकान्वयव्याप्तित्वावच्छिन्नविषयतात्मकानुमितिफलोपहितकारणत्वं केवलान्वय्यनुमानत्वम्।

तादृशं च रूपमन्वयव्याप्तित्वावच्छिन्नमेव। तादृशकारणतावच्छेदकत्वं च अनतिरिक्तवृत्तित्वम्। तेन जलं निर्गन्धं पृथिवीत्वव्यापकीभूताभावप्रतियोगित्वादित्यादौ नाव्याप्तिः। अन्यथा स्वरूपसंबन्धरूपावच्छेदकत्वनिवेशे यादृशरूपपदेन तादृशव्यतिरेकव्याप्तिमादाय तद्रूपावच्छिन्नप्रकृतहेतुतावच्छेदकीभूततादृशव्याप्तिस्वरूपावच्छिन्नप्रकारताकत्वस्य स्वरूपसंबन्धरूपावच्छेदकतया तादृशरूपविषयतायामन्वयव्याप्तित्वावच्छिन्नविषयतात्वविरहेणाव्याप्तिप्रसङ्गात्। ईदृशयुक्त्या धूमत्वमादाय दोषसंभवेऽपि किंचिन्निरूपितव्याप्त्यात्मकयद्रूपविवक्षणे न दोष इति धूमत्वहेतुतावच्छेदकस्थलमुपेक्षितम्।

End:

एवं यादृशयादृशकेवलान्वयिसाध्यकस्थले व्यतिरेकव्याप्तिघटकतावत्पदार्थावगाहिभ्रमात्मकज्ञानमप्रसिद्धं तादृशतादृशकेवलान्वयिसाध्यकस्थले यादृशयादृशरूपावच्छिन्नसाध्यहेतुकस्थले विशिष्टव्यासेरप्रसिद्धया तादृशतादृशरूपावच्छिन्नसाध्यहेतुकस्थले यादृशपदेनान्वयव्याप्तेरुपादानासंभवात् अव्याप्तिरशक्यसमाधानेति प्रकृतहेतुतावच्छेदकेऽपि प्रकृतव्याप्तिधर्मितावच्छेदकत्वानिरूपकस्यैव एकत्र द्वयमिति रीतौ प्रकृतहेतुतावच्छेदक प्रकृतव्याप्त्युभय . . .

1427

67659 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

अयमात्मेति। ननु यत्समानाधिकरणा इत्यस्यानुपादानेऽपि साध्यव्यापकतावच्छेदकप्रतियोगितायां साध्यतावच्छेदकानवच्छिन्नत्वदानादेव नात्मत्वसामान्याभावसंग्रहः। न च द्रव्यत्वाभावस्य तथात्वादव्याप्तिरिति वाच्यम्। प्रतियोगितायाः साध्यनिष्ठत्वेन विशेषणीयत्वात्। यदि चैवं प्रमेयसाध्यतावच्छेदककेऽव्याप्तिरित्युच्यते तदा यत्किंचित्त्वेन साध्यतावच्छेदकं विशेषणीयम्। स्वव्यधिकरणधर्मावच्छिन्नत्वं वा देयम्। तेन जातिसामान्याभावीयप्रतियोगितायाः पूर्वोक्तविशेषणाक्रान्तत्वेऽपि नाव्याप्तिरिति चेन्न। तथापि हेतुसामान्याधिकरण्यापेक्षया गौरवात्। स्वविशिष्टत्वानिवेशात् लाघवमिति चेत् समनियताभावैक्यपक्षे घटत्वेन धूमाभावघटत्वेन वह्न्यभावयोरैक्येनातिव्याप्तिः। समानाधिकरणधर्मावच्छिन्नाभावस्य लक्षणाघटकत्वेन वक्ष्यमाणरीत्यापि वारणासंभवात्।

End is same as in the next number.

1428

73971(b) चतुर्दशलक्षणीक्रोडपत्रम्—शंकरभट्टीयम्

Beginning:

प्रथमस्वलक्षणे अयमात्मा ज्ञानादित्यादाविति। ननु यत्समानाधिकरणा इत्यनुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगितायां साध्यतावच्छेदकानवच्छिन्नत्वनिवेशादेव नात्मत्व-

सामान्याभावसंग्रहः । न च द्रव्यत्वाभावस्य तथात्वादव्याप्तिरिति वाच्यम् ; प्रतियोगितायाः साध्यनिष्ठत्वेन विशेषणीयत्वात् । न चैवं प्रमेयत्वसाध्यकेऽव्याप्तिरिति वाच्यं यत्किंचित्वेन साध्यतावच्छेदकस्य विशेषणीयत्वात् । स्वव्यधिकरणधर्मावच्छिन्नत्वं वा प्रतियोगितायां देयम् । तेन जातिसामान्याभावीयप्रतियोगितायाः पूर्वोक्तविशेषणाक्रान्तत्वेऽपि नाव्याप्तिरिति चेन्न ।

End:

इदानीं दीधित्युक्तविशेषणानां सार्थक्यस्य संपादनीयतया तदनुगुणप्रकारस्यैवादरणीयतया साध्यतावच्छेदकसमनियतत्वघटकव्यापकत्वसार्थक्याय यथोक्तप्रकारस्यैवादरणीयत्वात् । अन्यथा किंचेत्यस्यावतरणरीत्या वैयर्थ्यस्येष्टत्वेन भवदुक्तप्रकारस्यैव युक्तत्वात् । न च वह्निगगनोभयाभावमादाय निरुक्तप्रकारस्यैवादरणीयतया भट्टाचार्योक्तप्रकारो न युज्यत इति वाच्यम् । वह्निगगनोभयत्वस्य व्यावर्तनायाधेयतानवच्छेदकव्यासज्यवृत्तिधर्मभिन्नत्वस्य समानाधिकरणधर्मे निवेशनात् गगनत्वस्य संग्रहेण व्यापकत्वविशेषणस्य सार्थक्यादिति ।

Colophon:

इति कूटाघटितलक्षणीयटिप्पणीक्रोडपत्रं समाप्तम् ।

Scribe adds:

ஸ வருஷம் வைகாசி மீ 23 உ கும்பகோணம் பாட்டராசாரியார் தெருவிலிருக்கும் ஈயுண்ணி மாதவாசார்யர் பிள்ளை வேதாந்தாசார்யர் ஸ்வஹஸ்த லிகிதம்.

1429

7I314(c) चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

अप्रसिद्धिदोषस्यैव सत्त्वात् मूले प्रतियोग्यवृत्तिश्चेति दोषान्तरं किमित्युपात्तम्, अतस्तदर्थं शङ्कते—नन्वितीत्येवं नन्वित्यादि दीधितिमवतार्य अव्यभिचरितत्वमिति प्रतीकं धृत्वा अथेदं वाच्यमित्यादिग्रन्थाभिप्रेतमिति शेषः । तथा च घट एवेत्यादिमूलस्य केवलान्वयिनो व्यभिचारित्वेनालक्ष्यताप्रदर्शनपरत्वान्न पूर्वमूलासंगतिरिति ध्येयमित्याह **जगदीशः** । पारिभाषिकाव्यभिचरितत्वस्याथेदं वाच्यमित्यादि ग्रन्थानभिप्रेतत्वे साध्याभाववदवृत्तित्वमिति प्रथमलक्षणे साध्याभावाप्रसिद्धिवारणाभिप्रायकत्वमेतस्य ग्रन्थस्य वाच्यम् । अप्रसिद्धिनिबन्धनाव्याप्तेरेव केवलान्वयिन्यभावादित्यनेन विवक्षितत्वात् ।

End:

स च उक्तव्यभिचारधीविरोधिधीविषय एव । पारिभाषिकस्य त्वव्यभिचरितत्वस्य व्यभिचाराभावरूपत्वाभावेन व्यभिचारधीविरोधिधीविषयत्वाभावान्न पारिभाषिकाव्यभिचारितत्वं व्याप्तिरिति

सिद्धान्तिना अथेत्यादिग्रन्थे खण्डिते तदुपरि तादृशानुभवस्यैवासिद्धेः पारिभाषिकाव्यभिचरितत्वस्य व्याप्तित्वे कस्यापि बाधकस्यानुपलम्भेः नाथेत्यादिग्रन्थाभिप्रेतार्थदूषणं संभवतीत्यभिप्रायकदीधिति-कृदुद्भावितशङ्कायां प्रतियोग्यवृत्तिश्चेत्यनेन इदमुच्यते। व्यधिकरणधर्मावच्छिन्नाभावस्यैवासिद्धेः केवलान्वयिनि साध्यव्यापकतावच्छेदकप्रतियोगिताकाभावाप्रसिद्धेः तद्घटितपारिभाषिकाव्यभिचरित-त्वस्य व्याप्तित्वं न संभवत्येवेति। तस्मात् पूर्वापरमूलयोर्नासाङ्गत्यमिति।

अथेदं वाच्यमित्यादिग्रन्थाभिप्रेतमित्ययम्।
शेषो दीधितिवाक्यस्य पारिभाषिकमेव हि॥
इत्यादेर्बाधमिन्नस्य पूरणीय इतीरितम्।
जगदीशेन विदुषा विवृतं च शठद्विषा॥

1430

PM1723 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning is same as in the printed ed. (ALS 38, p. 203).

End:

साध्यवद्यत्किंचिद्व्यक्त्यसंबन्धस्य विशिष्टसामान्यकभिन्नत्वमित्यत्र सामान्यपदप्रवेशनं लाघवा-यैव। तथा हि—तथाविधसामान्यकभिन्नत्वं न तथाविधसामान्यकत्वावच्छिन्नप्रतियोगिकैकभेदवत्त्वं, स्वत्वस्यानुगतानतिप्रसक्तस्य अभावात्। किं तु तादृशस्वविशिष्टसामान्यकं यद्यत् तत्तद्व्यक्तित्वा-वच्छिन्नप्रतियोगिताकभेदकूटवत्त्वम्। अत एव यद्यत्त्वमित्यादि भट्टाचार्येणोक्तम्। तत्र च सामान्य-पदाप्रवेशे वह्न्यादिप्रतियोगितादेरपि तथाविधस्वविशिष्टकतया तद्भेदा अपि निवेशनीयाः प्रसज्येरन्। निवेशनं च तेषां निष्प्रयोजनमिति पर्यालोच्य भट्टाचार्यः सामान्यपदं दत्तवान्। इदानीं वह्न्यादि-प्रतियोगितादेरतादृशतया शैथिल्यप्रतियोगित्व तत्त . . . .

1431

69320 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

कूटघटितलक्षणे साध्याभाववद्वृत्तित्ववृत्तितादृशधर्मावच्छिन्नाभावनिवेशेऽपि घटवृत्तित्वत्वाद्य-वच्छिन्नसाध्यकघटत्वव्यापकादिहेतौ तादृशसाध्याभाववत् घटादिवृत्तित्वनिष्ठतादृशसाध्याभाववत्त्वरूप-तथाविधधर्मावच्छिन्नाभावस्य घटादिमात्रवृत्तेः हेतावसत्त्वात् अव्याप्तिर्दुर्वारेवेति प्राचीनपाठो दृश्यते। अत्र घटनिरूपितं किंचित्संबन्धावच्छिन्नवृत्तित्वं साध्यम्। न च संबन्धविशेषावच्छिन्न-त्वाविशेषितवृत्तित्वत्वेनैव साध्यता। अत एव घटवृत्तित्वत्वाद्यवच्छिन्नसाध्यकं इत्येवोक्तमिति

वाच्यम्। तथा सति घटादेस्तादृशसाध्याभाववत्त्वोक्तिविरोधापत्तेः। घटादेरपि गगनादौ कालिकसंबन्धेन वृत्तित्वात् घटवृत्तित्वे तादृशसाध्याभाववत्त्वोक्तिविरोधापत्तेश्च।

End:

यदि च स्वरूपसंबन्धेन साध्यता तदा घटस्यापि तादृशसाध्याभाववत्तया तन्निरूपितहेतुतावच्छेदकतादात्म्यसंबन्धावच्छिन्नवृत्तित्वस्यापि यावत्तादृशवृत्तित्वान्तर्गतत्वेन तत्र साध्याभावविरहात् नाव्याप्तिरिति विभाव्यते तदा घटत्वस्थाने घटत्वप्रकारकप्रमाविशेष्यत्वं निवेशनीयम्। साध्यतावच्छेदकसंबन्धस्वरूपसंबन्धविशेषः एतादृशसाध्याभावश्च न घटत्वप्रकारकप्रमाविशेष्यत्वाभावसमनियत इति बोध्यम्। वस्तुतस्तु प्राचीनपाठोऽपि साधीयान्। परं तु भावाभावसाधारणविशेषणतायाः कूटघटितलक्षणे वक्ष्यमाणतया तदभिप्रायेण यथाश्रुतपाठो लगनीयः। न तु तत्र घटनिरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वं साध्यम्। समवायेन घटत्वं प्रति स्वरूपसंबन्धेन व्यापकत्वं हेतुः। तादृशसाध्या .....

1432

70950(a) चतुर्दशलक्षणीक्रोडपत्रम्

Beginning is same as in the printed ed. (ALS 38, p. 203).

End:

तथा च यद्यपि हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वं प्रतियोगितावि-शेषणघटकभेदे निवेश्य वारयितुं शक्यते कस्यचिदपि भेदस्य हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानत्वाभावात्, तथापि साध्याभावोऽपि साध्यतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानो ग्राह्य इति दीधितिस्वरसविरोधः प्रसज्यते। तादृशरीत्या साध्यभाव एव तादृशविशेषणलाभेन प्रतियोगिवैयधिकरण्यघटकभेदे तादृशविशेषणप्रवेशस्य दीधितिकृतः संमतत्वात्। अतो हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे वर्तमानो योऽभावस्तन्निरूपितत्वमेव निष्कृष्टकरूपे लक्षणघटकीभूतप्रतियोगितायां निवेशनीयम्। तावता साध्याभाव एव तादृशविशेषणप्रवेशपर्यवसानेन तादृशदीधितिस्वरसविरोधः। एवं च सति वह्निमान् धूमादित्यादौ संयोगसंबन्धावच्छिन्नद्रव्यत्वावच्छिन्नप्रतियोगिताया अपि लक्षणघटकताया दुर्वारात्तन्निरूपकाभावस्य हेतुतावच्छेदकसंबन्धेनानुयोगिनि द्रव्ये व्युत्पत्तिकालावच्छेदेन सत्तावतो हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे निरूपितनिरवच्छिन्नवृत्तिताश्रयीभूतो योऽभावस्तन्निरूपितत्वमेव लक्षणघटकीभूतप्रतियोगितायां निवेश्यम्। तावतापि द्रव्यान्यत्वविशिष्टसत्ताभाववद्वह्मादित्यादौ द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताया लक्षणघटकता दुर्वारा, तन्निरूपकाभावस्य सत्ताभावस्य हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणे निरवच्छिन्नवृत्तित्वात्। अतो हेतुतावच्छेदकसंबन्धानुयोगितानिरूपितस्वनिरूपकाभावत्वावच्छिन्ननिरवच्छिन्नवृत्तिताश्रयीभूतो योऽभावस्तन्निरूपितत्वमेव प्रतियोगितायां निवेश्यम्। स्वं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वेनाभिमता प्रतियोगिता। तन्निरूपकाभावत्वं च साध्याभावत्वपर्यवसन्नम्।

तथा च निष्कृष्टकल्पेऽपि हेतुतावच्छेदकसंबन्धेन कस्यचिदधिकरणनिरूपितसाध्याभावत्वावच्छिन्नवृत्तिताश्रयत्वस्य अभावविशेषणत्वावश्यकतया तत्रैव तादृशविवक्षादरणसंभवेन तावतैव च कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावत्वाभावसाध्योभयोरपि वारणसंभवादलं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपे स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वविशेषणपर्यवसन्नेन अभावविशेषणीभूतप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यसमानाधिकरणत्वदलेनेति। अथ प्रथमदर्शितपूर्वपक्षद्वयमध्ये निविष्टप्रथमपूर्वपक्षस्य किंचिद्भाग्यन्तरं साध्याभावनिष्ठव्यापकवृत्तितानिरूपक . . . .

1433

TR531 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning is same as in the printed ed. (ALS 38, p. 203).

End:

अथाभावविशेषणीभूतव्याप्यवृत्तितायां संबन्धविशेषावच्छिन्नत्वस्य प्रयोजनान्तरविरहेणानिवेशाद्युज्यत एवेयमव्याप्तिः। न च धूमाभाववान् वह्न्यभावादित्यत्र समवायसंबन्धेन व्याप्यवृत्तेः धूमात्मकाभावस्यापि यावदन्तर्गतत्वेन लक्षणघटकत्वापत्त्याधिकरणविशेषणघटकव्याप्यवृत्तितायाः स्वप्रतियोगितावच्छेदकावच्छिन्नवत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नत्वनिवेशे धूमनिष्ठतादृशसंयोगसंबन्धावच्छिन्ननिरवच्छिन्नत्वाप्रसिद्धया तस्यां तदनिवेशे च धूमनिष्ठसमवायसंबन्धावच्छिन्ननिरवच्छिन्नवृत्तितानिरूपकीभूते धूमावयवे हेतोर्वृत्त्या, प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकत्वपक्षे च धूमाभावस्य केवलान्वयित्वेन धूमनिष्ठप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धया चाव्याप्तेर्वारणायाभावविशेषणीभूतव्याप्यवृत्तितायां तादृशसंबन्धावच्छिन्नत्वनिवेशनमावश्यकम्। तथा च तत्र धूमादिकाभावो लक्षणघटक एव न भवतीति व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वय इति वाच्यम्। धूमनिष्ठसमवायसंबन्धावच्छिन्नवृत्तिताया उत्पत्तिकालावच्छिन्नतया यथाश्रुतव्याप्यवृत्तित्वविशेषणेनैव तद्वारणसंभवात्। मैवम्। वह्निमान् धूमादित्यादौ संयोगसंबन्धावच्छिन्नद्रव्यत्वावच्छिन्नप्रतियोगिताकाभाववारणाय हेतुतावच्छेदकसंबधेन कस्यचिदधिकरणे व्याप्यवृत्तित्वम्।

1434

TR1204 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

चक्रवर्तिप्रथमलक्षणे यद्यपि वह्नित्वेन घटाभावादेः घटत्वेन वह्न्यभावाद्यभिन्नतया तादृशाभाव एव, तथापि प्रतियोगितावच्छेदकभेदेनाभावभेदमतेनेदं लक्षणम्। समनियताभावानामैक्याभिप्रायेण चाग्रिमलक्षणम् इति भट्टाचार्येणोक्तम्। तत्र विचार्यते—

वह्नित्वेन घटाभावस्य घटत्वेन वह्न्यभावाभिन्नत्वेऽपि न क्षतिः। साध्यतावच्छेदकयादृश-प्रतियोगितावच्छेदकोभयातिरिक्तानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन संबन्धेन स्वप्रकारकज्ञानं विरोधि तेन संबन्धेन हेत्वधिकरणवृत्तिर्यः साध्याभावः तदीयतादृशप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकमित्यस्य प्रागेव विवक्षिततया वह्नित्वावच्छिन्नघटनिष्ठप्रतियोगिताया यादृश-प्रतियोगितापदेन ग्रहणे तदवच्छेदकत्वसाध्यतावच्छेदकत्वयोरुभयोरपि वह्नित्व एव सत्त्वेन वह्नित्व-विशिष्टघटवान् पर्वत इत्याकारकज्ञानस्य तदतिरिक्तघटत्वावच्छिन्नप्रकारताकतया केवलवह्निमान् पर्वत इत्याकारकज्ञानस्यैव तादृशत्वेन तद्विरोधितायाश्च वह्नित्वेन घटो नास्ति, घटत्वेन वह्निर्नास्तीत्युभय-विधज्ञान एवासंभावाततया घटत्वावच्छिन्नवह्निनिष्ठप्रतियोगिताया एव तादृशप्रतियोगितापदेन धर्त-व्यतया तादृशप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदकेऽक्षतत्वेन दोषानवकाशात्।

End is same as in 1433.

1435

PM1724 **चतुर्दशलक्षणीक्रोडपत्रम्**

Beginning:

...वच्छेदकस्यार्द्रेन्धनत्वादेः सर्वस्यैव धूमसमानाधिकरणसमवायादिव्यधिकरणसंबन्धावच्छि-न्नाभावप्रतियोगितावच्छेदकत्वेऽपि धूमप्रकारकप्रमाविशेष्यत्वत्वादेः तादृशावच्छेदकयावदन्तर्गतस्य धूमसमानाधिकरणात्यन्ताभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितावच्छेदकत्वविरहान्नाव्याप्तिः। एवं प्रथमप्रतियोगिता विशेषणताविशेषावच्छिन्नत्वेन विशेषणीया। तेन वह्निमान् धूमादित्यादौ धूमस-मानाधिकरणसंयोगसमवायादिसंबन्धावच्छिन्नाभावप्रतियोगितावच्छेदकस्य वह्निप्रकारकप्रमाविशेष्य-त्वत्वादेर्यावदन्तर्गतस्य वह्निसमानाधिकरणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितावच्छेदकत्व-विरहेऽपि न क्षतिरिति दिक्।

End:

स्वविशिष्टाधिकरणवृत्तित्वमपि हेतुतावच्छेदकसंबन्धेन स्वविशिष्टाधिकरणे दैशिकविशेषणता-विशेषेण वर्तमानत्वम्। तेन वह्निमान् धूमादित्यादौ वह्न्यसमानाधिकरणधूमावयवत्वादेः दैशिक-विशेषणताविशेषेण वह्न्यसमानाधिकरणद्रव्यत्वादेश्च धूमसमानाधिकरणत्वेऽपि नाव्याप्तिरिति संक्षेपः। सद्धेत्वसद्धेत्वोर्लक्षणसत्त्वासत्त्वमुपपादयति—तथा हीति। वह्निसंबन्धित्वे वह्निसामानाधिकरण्ये। एवं सर्वत्र न ह्यतिप्रसक्तमिति। न वा साध्यसामानाधिकरण्यातिप्रसक्तं निरुक्तसाध्यसामानाधिकरण्या-वच्छेदकत्ववदित्यर्थः। संयोगादौ ...

1436

67759(b) **चतुर्दशलक्षणीक्रोडपत्रम्**

Beginning:

माद्यद्वादीभकुम्भस्थलदलनहरिर्मञ्जुलानां सदोद्य-
द्वाचामाचार्यतायाः पदमनुभवतां पण्डितानां वरिष्ठः।

देयाल्लोकत्रयान्तर्लुठदमलयशःपुञ्जनाश्चर्यरङ्ग-
द्भूपालप्रस्तुतात्मा गुरुरखिल ..... मे ॥

अथ हेतुसमानाधिकरणेतिविशेषणस्य चरमसंयोगध्वंसरूपमहाप्रलयरूपाभावमादाय वह्निमान् धूमादित्यादौ अव्याप्तिवारणरूपप्रयोजनसंभवादात्मत्वादिसाध्यकस्थलपर्यन्तानुधावनं निरर्थकम्। न च साध्यतावच्छेदकसंबन्धघटितव्यापकताकल्पाभिप्रायेणात्मत्वादिसाध्यकस्थलपर्यन्तानुधावनम् इति वाच्यम्। तथासति तद्रूपान्तरत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिः। एतद्रूपमात्रसमवेतपदार्थासिद्धेरिति चेन्न स्वविशिष्टेति विशेषणाननुसंधाने यत्र दोषः तादृशस्थलमात्मत्वादिस्थलमेवेति दिक्।

End:

अयं भावः—व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यानुपादाने धूमवान् वह्न्यधिकरणत्वादित्यत्रातिव्याप्तिः, व्यतिरेकिधर्ममात्रस्यैव साध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकतया तादृशप्रतियोगितावच्छेदकप्रमेयत्वाद्यवच्छिन्नसमवायादिसंबन्धावच्छिन्नाभाववति वह्न्यधिकरणत्वाभावात्। अतः प्रतियोगिवैयधिकरण्यमवश्यं तत्रोपादेयम्। इत्थं च प्रतियोगिव्यधिकरणसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य वह्निसंयोगाभावत्वेऽप्यनपायादिति व्याप्यवृत्तित्वमप्यभावविशेषणमावश्यकमिति।

Last folio contains Samgatigrantha.

1437

70285 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

यत्समानाधिकरणेत्यादि। अत्र यत्समानाधिकरणा इत्यनुक्तौ अयमात्मा ज्ञानादित्यादौ तादृशयावदन्तर्गतस्य आत्मत्वसामान्याभावस्य व्यापकताघटकसमवायेन प्रतियोग्यधिकरणे केनापि संबन्धेनावर्तमानत्वादव्याप्तिरतो यत्समानाधिकरणा इत्युक्तम्। समानकालीनत्वादिसंबन्धस्य वृत्त्यनियामकत्वेऽपि तेन संबन्धेनात्मत्वसामान्याभावस्य प्रतियोग्यधिकरणे संबन्धित्वनिवेशादेवाव्याप्तिवारणं संभवतीति यत्समानाधिकरणा इति व्यर्थमिति वाच्यम्। न च गगनाभावाभावस्य यावदन्तर्गतस्य समानकालीनत्वादिसंबन्धेन प्रतियोग्यधिकरणसंबन्धित्वाद्विनापि व्यधिकरणधर्मावच्छिन्नाभावं लक्षणसमन्वयसंभवात् प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुपपत्तिः।

End:

तन्न, आधेयतायां स्वनिष्ठत्वविशेषणवैयर्थ्यात्। तत्परित्यागे च अग्रे च स्वविशिष्टेति विशेषणप्रवेशवैयर्थ्यात्। तस्यापि परित्यागे तु स्वप्रतियोग्यधिकरणतासंबन्धेनैव व्यापकताया वक्तुं शक्यत्वात्। तथैव निवेश्यत इति चेत् तस्यापि प्रकारान्तरत्वात् यथासंनिवेशे वैयर्थ्याभावात्। स्ववैशिष्ट्यस्यापि निवेशे त्वयमनुगमः। अधिकरणतात्वविशिष्टधर्मवत्त्वम्। अधिकरणतात्ववैशिष्ट्यं

चाधेयतासंबन्धेन। आधेयता च स्वसमानाधिकरणेत्यादिभेदवत्त्वसंबन्धेन। स्वाधिकरणता स्वविशिष्टाधिकरणतात्वसंबन्धेन। अधिकरणतायां स्ववैशिष्ट्यं च स्वविशिष्टाभाववृत्तित्वस्वावच्छिन्न . . .

1438

70723 चतुर्दशलक्षणीक्रोडपत्रम्

The following is the full text of the work.

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे॥

द्वितीयस्वलक्षणे स्वप्रतियोगितावच्छेदकसंबन्धेन व्यापकत्वं निवेश्य प्रतियोग्यवृत्तिश्चेति ग्रन्थस्यासंगतिं परिहृतवान् भट्टाचार्यः। अत्रेदं विचार्यते—इदं वाच्यं ज्ञेयत्वादित्यादीत्यादौ व्यधिकरणसंबन्धावच्छिन्नाभावमादायैव लक्षणसमन्वयसंभवात् तादृशग्रन्थासंगतिर्दुर्वारैव। तथाहि संयोगादिसंबन्धावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नाभावस्य स्वरूपसंबन्धावच्छिन्नघटत्वाद्यभावसमनियततया तदभिन्नतया स्वरूपसंबन्धोऽप्युक्ताभावप्रतियोगितावच्छेदकः। तथा च स्वरूपसंबन्धघटितव्यापकतावच्छेदकतावच्छिन्ना या संयोगसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिता तन्निरूपकत्वात् तादृशस्वरूपसंबन्धेन वाच्यत्वत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वाच्च व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि क्षतिविरहात्। अथ स्वप्रतियोगितावच्छेदकेत्यत्र प्रतियोगितानां न स्वप्रतियोगितात्वेन निवेशः, अपि तु तत्तद्व्यक्तित्वेनैव। तथा च स्वावच्छेदकसंबन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इत्यर्थः। स्वपदं व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितापरम्। संयोगसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिता यदि स्वपदेन ध्रियते तदा तदवच्छेदकसंबन्धः संयोग एव। यदि च स्वरूपसंबन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिता ध्रियते तदा तदवच्छेदकसंबन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नस्य स्वस्याप्रसिद्धिः। अतः व्यधिकरणधर्मावच्छिन्नाभावाङ्गीकार आवश्यकः। इत्थं च स्वरूपसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नघटनिष्ठप्रतियोगिता स्वपदेन धार्या। तदवच्छेदकस्वरूपसंबन्धघटितव्यापकतावच्छेदकवाच्यत्वत्वावच्छिन्नप्रतियोगितानिरूपकत्वात्, वाच्यत्वत्वेन घटाभावस्य स्वावच्छेदकीभूतस्वरूपसंबन्धेन वाच्यत्वत्वावच्छिन्नसामानाधिकरण्यसत्त्वात्।

1439

71276 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

ननु पारिभाषिकमेवाव्यभिचरितत्वम्। तथा हि—यः कश्चिदभावः यदधिकरणे प्रतियोगिसमानाधिरणस्तद्वत्त्वम्। वह्निमान् धूमादित्यादौ घटत्वेन वह्न्याद्यभावादिर्यो लक्षणघटकः तस्य

हेत्वधिकरणे प्रतियोगिसामानाधिकरण्यवत्त्वात् लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ घटत्वेन धूमाभावादिः लक्षणघटकः, तस्य हेत्वधिकरणे प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः। यदि च धूमवान् वह्नेरित्यादौ यत्किंचिदभावपदेन घटत्वेन वाच्यत्वाद्यभावस्यापि ग्रहणसंभवात् तस्य हेत्वधिकरणे प्रतियोगिसामानाधिकरण्यादतिव्याप्तिरिति मन्यते तदा अभावे यावत्त्वविशेषणं दीयते। तथा च यावन्तोऽभावाः यदधिकरणे प्रतियोगिसमानाधिकरणाः तत्त्वमव्यभिचरितत्वम्। एवं च धूमवान् वह्नेरित्यादौ धूमत्वावच्छिन्नधूमाभावस्यापि यत्पदान्तर्गततया तत्र तस्य प्रतियोगिसामानाधिकरण्यवत्त्वाभावान्नातिव्याप्तिः। न च यस्मिन्कस्मिंश्चिदभावे व्यतिरेकिप्रतियोगिसामानाधिकरण्यमेव निवेश्यताम्। एवं च धूमवान् वह्नेरित्यादौ यावत्पदानुपादानेऽपि नातिव्याप्तिः, यत्किंचित्पदेन वाच्यत्वाभावग्रहणेऽपि तस्य व्यतिरेकिप्रतियोगिसामानाधिकरण्याभावात् इति वाच्यम्।

End:

न च वृत्त्यनियामकसंयोगेन धूमसंबन्धिनि परमाणौ चरमक्रियावैशिष्ट्यस्य प्रसिद्ध्या तत्र चरमक्रियाभावरूपप्रतियोगिनोऽपि सत्त्वात् संभवत्येव विवक्षणीयप्रतियोगिसामानाधिकरण्यम्। तादात्म्यसंबन्धावच्छिन्नहेतुकस्थलानुरोधेन हेत्वधिकरणावच्छेदेनेत्यत्र हेतुसंबन्धित्वमात्रस्यैव विवक्षितत्वादिति वाच्यम्। यादृशपरमाणौ कदाचिदपि धूमसंयोगो नास्ति तदीयचरमक्रियात्मकाभाववैशिष्ट्यस्य हेतुसंबन्धिन्यसत्त्वेन तमादायाव्याप्तेः संभवात्। यदि च महाकालस्यैव वृत्त्यनियामकसंयोगेन हेतुसंबन्धितया तत्र कालिकसंबन्धेन चरमक्रियाभाववैशिष्ट्यस्य दैशिकविशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामानाधिकरण्यसंभवात् वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छेदकसंबन्धत्वात्। न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थलेऽव्याप्तिरेवेति वाच्यम्। तेन रूपेण संबन्धतायां मानाभावात्। कालस्यावृत्तितया कालधूमसंयोगस्य कालनिष्ठाधेयत्वानिरूपकत्वेऽपि धूमस्य तेन संबन्धेन का . . . .

1440

71339(c) चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

दैशिकविशेषणतया उभयवृत्तय इति तत्तदयोगोलकान्यत्वाभावस्यापि कालिकेनोभयवृत्तित्वाद्दैशिकेति। तथा च यावदन्तर्गतस्य तत्तदयोगोलकीयसंयोगाद्यात्मकाभावीयदैशिकविशेषणतया वृत्तित्वविरहेण धूमवान् वह्नेरित्यादौ अतिव्याप्तिविरहेऽपि घटत्वभिन्नं जातित्वादित्यादौ हेतुसमानाधिकरणाभावमात्रस्य दैशिकविशेषणतासंबन्धेनैव वृत्तिमत्त्वादतिव्याप्तिः; अतः उभयपदम्। घटभिन्नं मेयत्वादित्यादौ तत्तद्घटीयरूपध्वंसात्मकाभावस्य यावदन्तर्गतस्य दैशिकविशेषणतया उभयवृत्तित्वाभावान् नातिव्याप्तिरतः तदिति। सर्वत्र लक्षणे हेतुसामानाधिकरण्यं नायमात्मा ज्ञानादित्यत्राव्याप्तिवारकम्, आत्मत्वाभावस्यापि दैशिकविशेषणतया उभयवृत्तित्वात्।

End:

केचित्तु सत्तावान् जातेरित्यत्राव्याप्तिवारणाय हेतुतावच्छेदकसंबन्धस्वरूपसंबन्धान्यतरसंबन्धावच्छिन्नाधेयत्वं वाच्यम्। तेन नाव्याप्तिरिति। न च गुणत्ववान् विषयितया घटाभावादित्यत्राव्याप्तिः, साध्याभावाधिकरणनिरूपितस्वरूपसंबन्धावच्छिन्नाधेयत्वस्य हेतौ सत्त्वादिति वाच्यम्। भावप्रतियोगिकस्वरूपसंबन्धस्यैव लक्षणघटकत्वादिति चेत्। न। गुणत्वसाध्यतदभाववद्वृत्तित्वस्य विषयतया हेतुत्वे अव्याप्तिरिति घटत्वेन तद्घटभेदाभावो न लक्षणघटकः। तद्घटत्वस्य कालिकसंबन्धावच्छिन्नाभावस्य विशेषणतया योऽभावः सोऽपि तद्घटत्वरूप इति तन्निरूपितप्रतियोगिताश्रयवत्तावुद्धेर्विषयप्रतिबन्धकतावच्छेदककालिकसंबन्धेन साध्यवदवृत्तित्वात्। किंतु साध्यवन्निरूपितनिरवच्छिन्नवृत्तित्वमेव भावभिन्नत्वघटकम्। कालिकादिसंबन्धावच्छिन्नवृत्तित्वं निरवच्छिन्नमिति संक्षेपः।

1441

72823(b) चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

(Fo. 5) तथा वह्निमान् धूमादित्यादौ समवायेन वह्नित्वेन वह्नित्वविशिष्टज्ञानाभावीयप्रतियोगितायाः वह्नित्वाव्यापकत्वात्, तेनैव वारणसंभवात् साध्यपदवैयर्थ्यमिति, तत्तुच्छम्। प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वलाभायैव साध्यपददानात्। अथवा साध्यतावच्छेदकव्यापकत्वमित्यत्र साध्यतावच्छेदकस्य व्यापकत्वनियामकसंबन्धः यः कश्चिच्चेत् पूर्वोक्तस्थले समवायेन गुणत्वेन विषयतया गुणत्वविशिष्टज्ञानाभावमादायाव्याप्तेर्दुर्वारत्वात्, यत्किंचित्कालिकसंबन्धेन गुणत्वस्य व्यापकत्वात्। अतः साध्यतावच्छेदकताघटकसंबन्धेन साध्यतावच्छेदकस्य व्यापकत्वनिवेशस्यावश्यकतया तल्लाभायैव साध्यपददानात्।

End:

स्वरूपसंबन्धेन विरोधितया साध्यतावच्छेदकया .... योगितावच्छेदकोभयातिरिक्तानवच्छिन्नप्रकारताशालिताद्दशबुद्धिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकस्वरूपसं . . . हेत्वधिकरणवृत्तिताद्दशाभावप्रतियोगितावच्छेदकत्वात् साध्यतावच्छेदकस्येत्यव्याप्त्या ताद्दशोभयानवच्छिन्नप्रकारताशालिबुद्धौ भ्रमान्यत्वविशेषणदानस्यावश्यकतया कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभाववत्त्वावच्छिन्नघटनिष्ठप्रकारताशालिबुद्धेः भ्रमात्मकतया भ्रमान्ययाद्दशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकसंबन्धेन हेत्वधिकरणवृत्तित्वविवक्षायामप्यव्याप्तेरभावादिति वाच्यम्। साध्यतावच्छेदकयाद्दशप्रतियोगितावच्छेदकोभयातिरिक्तानवच्छिन्नप्रकारतायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशनेनैव पूर्वोक्ताव्याप्तिसंभवे भ्रमान्यत्वस्याविशेषणीयत्वात्। ताद्दशविवक्षायां याद्दशप्रतियोगितावच्छेदकधर्मावच्छिन्नसाध्यतावच्छेदकसंबन्धावच्छिन्नप . . : .

1442

73971(a) चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

दीधितौ यत्समानाधिकरणा इति लक्षणे यत्समानाधिकरणसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावकूटवत्त्वमेव निवेश्यताम्। वह्निमान् धूमादित्यादौ तथाविधाभावकूटवत्त्वस्य हेतौ सत्त्वाल्लक्षणसमन्वयः। व्यभिचारिणि हेतुभेदस्य लक्षणघटकत्वेन नातिव्याप्तिः। न च तादृशाभावकूटवत्त्वं विशेषणतया विवक्षणीयम्। अन्यथा हेतुभेदस्यापि हेतौ कालिकेन सत्त्वाद् अतिव्याप्त्यापत्तेः। तथा च पृथिवी घटादित्यादावव्याप्तिः। साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि लक्षणघटकत्वेन तस्य घटे अवृत्तेरिति वाच्यम्। यत्सामानाधिकरण्यस्य विशेषणतया विवक्षणीयत्वात्, तावतापि प्रतियोगिसामानाधिकरण्यघटितलक्षणापेक्षया लाघवानपायात्।

End:

साध्यवदनुयोगिकविशेषणतासंबन्धावच्छिन्नाभावस्यैव लक्षणे निवेश्यतया कुत्राप्यदोषात्। परं तु विशेषण . . सर्गत्वाङ्गीकारापत्तिरिति तत्स्वीकारेणापि च साध्यतावच्छेदकसंबन्धेन साध्याभावस्य प्रवेशेऽपि न क्षतिः। विशिष्टसत्तावान् जातेरित्यादौ द्रव्यत्वेन प्रमेयाभावस्य प्रमेयमात्रप्रतियोगिकत्वमते अतिव्याप्तिवारणासंभवः। सर्वत्र वाच्यं ज्ञेयत्वादित्यादावपि घटत्वेन प्रमेयसामान्याभावस्यापि यत्प्रतियोग्यधिकरणवृत्तियद्धर्मावच्छिन्नप्रतियोगिताकतया सिद्धान्तिभिस्तदङ्गीकारेण प्रतियोग्यवृत्तिश्चेति ग्रन्थासंगतिः। एवं द्रव्यत्वत्वेन द्रव्यत्वसत्तान्यतराभावोऽपि भट्टाचार्यसंमत इति तमादायाप्युक्तातिव्याप्तिवारणम्। एवमन्यत्रापि बोध्यम्।

1443

73971(b) चतुर्दशलक्षणीक्रोडपत्रम्

Beginning:

यत्समानाधिकरणा इत्यादि। तत्र प्रतियोगितायां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनिवेशेनैवोपपत्तौ यत्समानाधिकरणा इति स्वविशिष्टेति च व्यर्थम्। तथाहि—साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाः यावन्तोऽभावाः यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणास्तत्त्वं व्याप्तिः। वह्निमान् धूमात्, अयमात्मा ज्ञानात्, कपिसंयोगाभाववान्मेयत्वादित्यादौ तादृशस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वाल्लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ तादृशस्य घटत्वेन धूमाद्यभावस्य हेत्वधिकरणीभूतायोगोलकान्तर्भावेन धूमात्मकप्रतियोगिसमानाधिकरणत्वाभावान्नातिव्याप्तिः।

End:

ननु तादृशाभावस्य जलत्वाभावरूपताव्यवस्थापने यदि निर्भरो न स्यात् तदा अतिसंक्षिप्तलेखननिर्बन्धितार्किकशिरोमणिः जलवृत्तित्वविशिष्टगोत्वाभावस्याभावो न धूमाभाव इत्येवाभिदध्यात्। तस्य जलत्वाभावरूपतावाचकपदं किमिति प्रयुञ्जीत। मैवं। तस्यापाततो युक्त्यन्तराभिधायकत्वात्। तथाहि जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावरूपतापक्षेऽतिरिक्ताभावव्यक्त्यकल्पनाप्रयुक्तलाघवं, तद्रूपतानभ्युपगमे तु गौरवमिति यदि परोऽभिदधीत तदा तं प्रति लाघवमादृत्य यदि जलवृत्तित्वविशिष्टगोत्वाभावत्वा . . .

1445

73984 चतुर्दशलक्षणीक्रोडपत्रम्

Beginning is same as in No. 1434 above.

End:

द्रव्यान्यत्वविशिष्टसत्ताभाववान् धूमादित्यत्रापि नाव्याप्तिरिति चेत् यथाहि तत्ताप्रतीतौ तदभावाभावो नास्तीति प्रतीत्या . . . . . प्रतीतौ तदभाववान्नेति प्रतीत्या तदभाववद्भेदस्यापि तत्स्वरूपानतिरिक्तताया दुर्वारत्वात् तदभाववद्भेदस्य तत्स्वरूपानतिरिक्त . . . . भेदादेश्च तत्तत्स्वरूपातिरिक्तत्वापत्त्यानवस्थापत्तेश्च। घटत्वाभावघटत्ववदन्योन्याभावत्वयोरिव तदभावाभावतदभाववदन्यो . . . . . । अत एव को हि तदभावतदन्योन्याभावयोर्विशेष इति दीधितिकृतोक्तं हेत्वाभासग्रन्थे।

1447

PM1720(h) तर्कवादक्रोडपत्रम्

Beginning:

यत्संशयव्यतिरेकनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयश्च यस्तद्धेतुरिति मूलस्य यत् यत्संशयप्रतिबध्यत्वे सति यद्व्यतिरेकनिश्चयप्रतिबध्यं तत् तन्निश्चयसाध्यमिति मिश्रैर्यथाश्रुतार्थः कृतः। अत्र घटादिव्यतिरेकनिश्चयप्रतिबध्ये घटादिनिश्चयाजन्ये घटादिनिश्चयाजन्यघटादिविशिष्टज्ञाने व्यभिचारवारणाय सत्यन्तम्। व्यभिचारसंशयप्रतिबध्ये व्यभिचारनिश्चयाजन्ये व्याप्तिनिश्चये व्यभिचारवारणाय विशेष्यदलम्। अव्यभिचारसंशयप्रतिबध्ये अव्यभिचारव्यतिरेकनिश्चयप्रतिबध्ये चाव्यभिचारनिश्चये अव्यभिचारनिश्चयाजन्ये व्यभिचारवारणाय यदभावत्वप्रकारकतानैयत्यं यत् संशयव्यतिरेकनिश्चययोः वैकल्पिकमिति तैरुक्तम्।

End:

प्रकारकत्वे नैयत्याभावाद् दृष्टान्तासिद्धिः। प्रमेयत्वे प्रामाण्यव्यतिरेकावगाहिनि प्रामाण्याभावावगाहित्वावच्छिन्नप्रमेयवच्छास्त्रश्रवणप्रवृत्तिप्रतिबन्धकताशालिनि प्रमेयत्ववच्छास्त्रे श्रवणं

कृत्यसाध्यमित्याकारकज्ञाने प्रामाण्याभावत्वप्रकारकत्वनैयत्याभावात् स्वरूपासिद्धेश्च वारणाय व्यतिरेकनिश्चयोपादाने धर्मितावच्छेदकताभिन्नत्वविशेषणस्यावश्यकत्वे तादृशव्याप्तिशरीरघटकतया वैयर्थ्यस्य दूषणावहत्वात् ।

1448

PM1680(c) तर्कवादक्रोडपत्रम्

Beginning:

ननु धूमो यदि वह्निजन्यो न स्यात् निरुक्तजन्यो न स्यात् इति जल्पोक्ततर्कस्यापाद्याभावेनापादकीभूतवह्निजन्यत्वाभावाभावनिर्णयद्वारा वह्निजन्यत्वाभावसंशयोच्छेदकत्वेऽपि वह्निजन्यव्याप्तिग्रहप्रतिबन्धकवह्निव्यभिचारित्वसंशयाविरोधितया कथं तस्य वह्निधूमव्याप्तिग्रह उपयोगित्वमिति चेत् । मास्तु तस्य साक्षादुपयोगित्वम् । एवमपि धूमो यदि वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात् इत्येतादृशस्य व्यभिचारसंशयविरोधितया तत्र वह्निजन्यत्वरूपापाद्यव्यतिरेकनिश्चयसंपादकतया तस्योपयोगात् । तत्रानुमिनोमीति अनुव्यवसायसाक्षिकानुमितित्ववत् तर्कयामीत्यनुव्यवसायसाक्षिकापत्तित्वापरनामा जातिविशेष एव तत्त्वम् । तच्च भ्रमप्रमासाधारणाहार्यमानसज्ञानवृत्तिमानसत्वव्याप्यम् । चाक्षुषत्वादिव्याप्यत्वे चक्षुःसंनिकर्षविरहदशायामन्धादीनां च तर्कानुदयप्रसंगात् ।

End:

तर्कस्तु पञ्चविधः—आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थप्रभेदात् इत्याचार्याः । तत्र स्वापेक्षापादकः प्रसंग आत्माश्रयः, अपेक्षा च ज्ञतावुत्पत्तौ स्थितौ च ग्राह्या । तत्राद्या यथा —एतद्घटज्ञानमेतद्घटज्ञानजन्यं स्यादेतद्घटभिन्नं स्यादिति । द्वितीया तु घटो यदि एतद्घटजनकः स्यादेतद्घटभिन्नः स्यादिति । तृतीया च घटो यद्येतद्घटवृत्तिः स्यात् तथात्वेनोपलभ्येत इति । स्वापेक्षापेक्षितत्वनिबन्धनः प्रसंगोऽन्योन्याश्रयः । यथायं घटो यदि एतद्घटजनकः स्यादित्युत्पत्तौ । एवं ज्ञतौ स्थितौ च स्वयमुदाहार्यम् । स्वापेक्षापेक्षितस्वापेक्षितत्वनिबन्धनः प्रसंगश्चक्रकः । पूर्वोक्त एवापादके जन्यपदान्तरमन्तर्भाव्य उदाहरणम् । अपेक्षा तु साक्षात्परंपरासाधारणी ग्राह्या । अनवस्था पुनरप्रामाणिकानन्तप्रवाहमूलकप्रसंगः । यथा घटत्वं यावद्घटहेतुवृत्तिः स्यात् इत्यादि । उक्तचतुष्कान्यप्रसंगः प्रमाणबाधितार्थकः । सोऽपि द्विविधः । व्याप्तिग्राहको विषयपरिशोधकः । तत्राद्यो यथा—यदि धूमो वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात् इति । द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यात् निर्धूमः स्यात् इत्यादिविषयवह्न्यादेः शङ्कानिवृत्तिद्वारा निश्चायकत्वेन परिशोधकत्वादित्यलं विस्तरेण ।

Colophon:

इति तर्कविचारः ।

1452

PM1727(a) पक्षताक्रोडपत्रम्

Beginning is same as in No. 1456 below.

End:

यावत्कारणसत्त्वे सव्यापारकदण्डादिसत्त्वे घटानुत्पादस्य क्वाप्यसंभवेनान्वयव्यभिचारस्य जगतीतलमात्र एवासंभवात् कपालसंयोगादौ तत्प्रसिद्धिः संभवतीति निपुणतरं विभावनीयं तर्कालंकाररसिकैरिति गुरुचरणाः। तत्तदेव विभावनीयं यद्यप्यस्तु यथाकथंचित्, तथापि शुद्धत्वनिवेशनव्यावृत्त्यन्तरसंभवेऽपि नीलपर्वतत्वावच्छिन्नपक्षकानुमितौ शुद्धपर्वतत्वावच्छिन्नवह्नितदभावकोटिकसंशयस्य पक्षतात्वापत्तिरतितरामनुपपत्तिग्रस्तैवेत्यलं काणवराटिकावहनव्यापारपर्यटनलम्पटस्यानन्तवसुगणाधीनापरिमितमणिगणविराजमान . . . चञ्चलतरणिनयनापनयनव्यापारचिन्तया।

1453

PM1727(b) पक्षताक्रोडपत्रम्

Beginning:

संदिग्धसाध्यधर्मत्वं पक्षत्वम् इति मूलस्य यथाश्रुतार्थे साध्यपक्षविशेष्यकसंशयानुगमभयेन पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयप्रतिबध्यसंशयः पक्षतेति दीधितिकृता व्याख्यातम्। तस्य पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्ना या बाधनिश्चयप्रतिबध्यता तदवच्छेदकीभूतस्वनिष्ठविषयताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यता तदाश्रयः पक्षतेति पर्यवसितोऽर्थः **भट्टाचार्येण** कृतः। तत्रेदं शङ्क्यते। तथा हि—पर्वतो महानसीयवह्न्यभाववान् इत्यादौ पर्वतो महानसीयवह्निमान् वह्निसामान्याभाववान् वेति संशयस्य पक्षतात्वानुपपत्तिः।

End:

अपेक्षाबुद्धिर्द्वितीयक्षणे विशेषणगुणान्तरोत्पादानुपगमेन तादृशस्खलाभावाद् अपेक्षाबुद्धेर्द्वितीयक्षणावस्थायित्वमत एव एतत्प्रतिबन्दिकथनं च। इदं तु चिन्त्यम्। अनुमित्युत्पत्तिक्षणे परामर्शजन्यसंस्कारस्योत्पादे बाधकविरहेण तादृशसंस्कारादनुमितिर्द्वितीयक्षणे अनुमित्यापत्तिवारणायैव उत्पत्तिनिवेशस्यावश्यकत्वम्। न च संस्कारान्यत्वमपि विशेषणं देयमिति वाच्यम्; अन्ततः संस्काराद्वा इत्युत्तरग्रन्थासंगतिः। न च तत्तत्संस्कारान्यत्वं देयमिति वाच्यम्, तथा सति अनन्तसंस्कारभेदस्य विशेषणत्वेन उत्पत्तिनिवेशापेक्षयापि गौरवापत्तेः। वस्तुतः उत्पत्तिनिबन्धनपाठ एव प्रामादिकः, अपेक्षाबुद्धिर्द्वितीयक्षणस्थायितामत एतल्लक्षणकरणेन पुनस्तृतीयक्षणस्थायित्वशङ्कायां संदर्भविरोधात्।

1454

PM1727(c) **पक्षताक्रोडपत्रम्**

Beginning:

वैशिष्ट्यावच्छिन्नमित्यस्योक्तार्थ एव तात्पर्यम्। एवं च कुतो ज्ञानवैशिष्ट्यावच्छिन्नत्वनिवेशो दुर्निवेश इति वाच्यम्। स्वसामानाधिकरण्य एककालीनत्वोभयसंबन्धेन घटज्ञानविशिष्टपटज्ञान-समानकालीनवह्नित्वावच्छिन्नसाध्यकस्थले तद्धर्मावच्छिन्नपक्षकस्थलीयसाध्यवत्तानिश्चयत्वावच्छिन्नाया अपि प्रतिबन्धकतानियमाज्ज्ञानवैशिष्ट्यघटितधर्मावच्छिन्नत्वे तत्तादृशसाध्यवदभावकोटिकसंशया-संग्रहादव्याप्तेर्वज्रालेपायितत्वात्। न च प्रकृतसाध्यतानवच्छेदकं यज्ज्ञानवैशिष्ट्यं तद्धर्मानवच्छिन्न-त्वनिवेशेन तत्संग्रहः संभवतीति वाच्यम्। अवच्छेदककोटिप्रविष्टस्यानवच्छेदकत्वेन पूर्वोक्तदूषणगण-प्रसङ्गात्।

End:

साध्यतावच्छेदकावच्छिन्नप्रकारत्वातिरिक्तप्रकारत्वानिरूपिता या पक्षतावच्छेदकावच्छिन्ना विशेष्यता तन्निरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबन्धकतानिवेशे न कश्चि-द्दोषः। यद्वा प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्न-प्रकारतानिरूपितप्रकारतासामान्यावच्छिन्नत्वनिवेशेनाप्येतद्दोषवारणसंभवः। केवलपर्वतो वह्निमा-नित्यादिज्ञाने वह्नित्वावच्छिन्नप्रकारतानिरूपितप्रकारिताया: सामान्यान्तर्गतायास्तत्प्रतिबन्धकतान-वच्छे .....

1455

PM1728 **पक्षताक्रोडपत्रम्**

Beginning:

...वच्छेदकताकत्वेन दोषात्। अथैवं प्रतिबन्धकतायां पक्षे साध्यनिश्चयत्वव्यापकत्व-निवेशनमफलं, वह्निसाध्यकस्थले महानसीयवह्निमान्नवेति संशयनिष्ठमहानसीयवह्निमत्तानिश्चयाय प्रति-बध्यतायां साध्यतावच्छेदकातिरिक्तमहानसीयत्वावच्छेद्यत्वावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रति-बन्धकतानिरूपितप्रतिबध्यतावच्छेदकेनैवावच्छिन्नतया निरुक्तावच्छेदकताकान्यप्रतिबन्धकतानिरूपित-प्रतिबध्यतावच्छेदकावच्छिन्नत्वविरहेणातादृशसंशयस्य पक्षतात्वापत्तिविरहात्। तादृशसंशयस्य पक्षतात्वापत्तिवारणे प्रतिबन्धकतायां निश्चयत्वव्यापकताया निवेशनीयत्वादिति। तन्न। महानसीय-वह्न्यभावाभावप्रत्यक्षं प्रति महानसीयवह्निमत्ताविधेयकप्रत्यक्षसामग्र्याः प्रतिबन्धकतया महानसीय-वह्निमत्त्वरूपयोग्यताज्ञानघटितसामग्र्याश्च एकरूपावच्छिन्नं प्रत्येव प्रतिबन्धकतया निरुक्तप्रति-

बन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्यत्वस्य पर्वतो महानसीयवह्निमान्न वेति संशये सत्त्वेन वह्निसाध्यकस्थले तस्य पक्षतात्वापत्तेर्दुर्वारत्वात्।

End:

केचित्तु पञ्चधासंशयसंग्रहाय विशिष्य निश्चयत्वादीनां निवेशनीयतया विरोधिविषयिकान्तदलवैयर्थ्यमिति चेन्न। स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्वसामानाधिकरण्यस्वावच्छेदकावच्छिन्ननिरूपितविरोधिविषयतानिरूपितत्वोभयसंबन्धेन प्रकृतपक्षविषयतानिरूपितसाध्यप्रकारताविशिष्टत्वे सति ज्ञानत्वमिति समुदितार्थ इत्याहुः।

1456

67759(a) पक्षताक्रोडपत्रम्

Beginning:

शुद्धपर्वतत्वावच्छिन्नेति। अत्र पक्षतावच्छेदके शुद्धत्वानिवेशे नीलपर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नविधेयकानुमितेरपि पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगसंबन्धावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वरूपकार्यतावच्छेदकाक्रान्ततया निरुक्तकारणतावच्छेदकाक्रान्तपर्वतो वह्निमान् न वेति संशयं विनापि नीलपर्वतो वह्निमान् न वेति संशयात् तादृशानुमित्युत्पत्त्या नीलपर्वतत्वावच्छिन्नपक्षकोक्तसंशयस्योपदर्शितकारणतावच्छेदकानाक्रान्तत्वेन शुद्धपर्वतत्वावच्छिन्नपक्षकानुमितिस्थलीयकार्यकारणभावस्य व्यतिरेकव्यभिचारग्रस्तत्वात्। अतः उद्देश्यतावच्छेदककोटौ शुद्धत्वनिवेशः। एवं चोपदर्शितानुमितेः कार्यतावच्छेदकानाक्रान्तत्वेन व्यभिचारानवकाशः। एवं विधेयतावच्छेदके शुद्धत्वानिवेशे पर्वतत्वावच्छिन्नपक्षकमहानसीयवह्नित्वावच्छिन्नविधेयकानुमितेरप्युक्तरूपाक्रान्ततया निरुक्तकारणतावच्छेदकाक्रान्तपर्वतत्वावच्छिन्नविशेष्यकशुद्धवह्नित्वावच्छिन्नप्रकारकसंशयं विनापि तादृशानुमित्युत्पत्त्या महानसीयवह्नित्वावच्छिन्नकोटिकसंशयस्य चोक्तकारणतावच्छेदकानाक्रान्तत्वान्न व्यभिचार इत्यतस्तन्निवेशः।

End:

स्यादेतत् साध्यवत्ताज्ञानप्रतिबध्यतावच्छेदकविषयतानिवेशकल्पे नायं दोषः संभवति। तथाहि— साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वं साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वम्। तच्च नोक्तसंशयनिष्ठप्रतिबध्यतावच्छेदकीभूतवह्निसामान्याभावविषयतायाः संभवति तद्घटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदककोटौ महानसीयत्वविषयतायाः अनिवेशादिति चेन्न। एवं सति महानसीयवह्निसाध्यके महानसीयवह्निमान् वह्निसामान्याभाववान्वेति संशयस्यासंग्रहप्रसंगात्। तत्संग्रहानुरोधेन साध्यतावच्छेदकावच्छिन्नत्वोपलक्षितप्रकारतायाः एव प्रतिबध्यतावच्छेदकघटकतया लक्षणे निवेशनीयत्वादिति बोध्यम्।

1457

69804 **पक्षताक्रोडपत्रम्**

Beginning:

संदिग्धसाध्यधर्मत्वं पक्षत्वमिति यथाश्रुतार्थे साध्यपक्षविशेष्यकसंशयाननुगमभयेन पक्षतावच्छेदकावच्छिन्नविशेष्यातानिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयप्रतिबद्धसंशयः पक्षतेति दीधितिकृता व्याख्यातम्। तस्य पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नाया बाधनिश्चयप्रतिबध्यतावच्छेदकीभूतस्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताश्रयः पक्षतेति पर्यवसितोऽर्थः भट्टाचार्येण कृतः। अत्रेदमाशङ्क्यते। तथाहि—पर्वतो महानसीयवह्न्यभाववानित्यादौ पर्वतो महानसीयवह्निमान् वह्निसामान्याभाववान् वेति संशयस्य पक्षतात्वानुपपत्तिः।

End:

अत्रापि साध्यवत्त्वनिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशपर्यन्तं संदर्भविरुद्धम्। साध्यवत्तानिश्चयप्रतिबध्यत्वनिवेशेऽपि पूर्वस्थले दोषविरहात्। अथास्त्वन्यत्र यथातथापि, महानसीयवह्निमत्पर्वतकालीनः पर्वतो वह्निमानित्यादौ पर्वतत्वावच्छेदेन महानसीयवह्निसंशयस्य पक्षतात्वापत्तिः, तस्यापि साध्यत्वनिश्चयत्वव्यापकप्रतिबन्धकत्वात्। न चोद्देश्यतावच्छेदकतातिरिक्तप्रकारित्वावच्छिन्नत्वं प्रतिबन्धकतायां देयमिति वाच्यम्। महानसीयवह्निमान् पर्वत इति ज्ञानस्यापि प्रतिबन्धकतया तादृशप्रतिबन्धकसत्त्वादिति चेन्न। साध्यतावच्छेदकमात्रावच्छिन्नप्रकारतानिष्ठावच्छेदकताकत्वस्य प्रतिबन्धकताविशेषणत्वात्। परं त्वेवंनिवेशे स्वरूपसंबन्धरूपावच्छेदकत्वकल्प एव न्याय्यः, व्यापकत्वनिवेशे गौरवात्।

Colophon:

इति **संशयपक्षताविचारः** समाप्तः।

1458

69845(b) **पक्षताक्रोडपत्रम्**

Beginning:

तादृशसंशयानुगमाय प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वावच्छिन्ननिरूपितप्रतिबन्धकतानिरूपितप्रतिबध्यत्वे सति तादृशनिश्चयप्रतिबन्धकताशून्यत्वमिति फलितार्थ इति **जागदीशी**। ननु प्रतिबन्धकदिशि निश्चयत्वनिवेशो व्यर्थः। न च पर्वतो वह्निमानित्यादौ वह्निमत्पर्वतो घटवान् न वेति संशयस्य पक्षतात्वापत्तिः। वह्निमत्पर्वतधर्मैक-

घटाभाववुद्धिं प्रति वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविषयतानिरूपितघटविषयता-शालिनिश्चयत्वेन प्रतिबन्धकत्वम्। अतः घटत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविषयता-निरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेनापि प्रतिबन्धकत्वात् तत्र धर्मितावच्छेदकांशे संशयस्यानभ्युपगमात् तादृशज्ञानत्वेनैव प्रतिबन्धकत्वं न तु निश्चयत्वेन, अतो निश्चयत्वावच्छिन्न-प्रतिबन्धकत्वं वक्तव्यमिति वाच्यम्। साध्यविषयताया अनवच्छेदकानात्मकत्वनिवेशेनैव वारण-संभवात्।

End:

न च तत्रानुमितेरेव स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिभिन्नतया न तदुत्तरमनुमित्या-पत्तिरिति वाच्यम्। तादृशानुमितेरप्रामाण्यज्ञानास्कन्दितत्वेन प्रतिबन्धकत्वायोगात्। न च तत्र सिद्ध्युत्पत्तिकाले भावि ज्ञानमप्रमेति अनुमितिधर्मिकाप्रामाण्यग्रहसत्त्वे अनुमित्यनुत्पादेन तादृशा-प्रामाण्यज्ञानस्य उत्तेजकत्वे मानाभाव इति न तादृशग्रहसत्त्वे अनुमित्यनन्तरम् अनुमित्युत्पत्तिरिति वाच्यम्। स्वांशे अप्रामाण्यग्रहात्मकस्थले तदनन्तरमनुमित्यापादनसंभवात्। तादृशाप्रामाण्यग्रहस्यानु-त्तेजकत्वे अनुमितिपूर्ववृत्तिसिद्धिनाशोत्तरपरामर्शान्तरे अनुमित्यनुपपत्तेः। न च तथापि यत्र सिषाधयिषानाशकाले सिद्ध्यात्मकपरामर्शः, ततोऽनुमितिः स्वांशे अप्रामाण्यग्रहात्मिका तदनन्तरमनु-मित्यापत्तिः तादृशपदानुपादानेऽपि दुर्वारा, तत्रेष्टापत्तेरसंभवादिति वाच्यम्। तत्रागत्या तत्तत्क्षणस्य प्रतिबन्धकत्वकल्पनात्। न चानुमित्यनुत्पाद . . . .

1460

69896(f) पक्षताक्रोडपत्रम्

Beginning:

शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगसंबन्धावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताका-नुमितिं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालि-निश्चयत्वव्यापकप्रतिबन्धकताकसंशयः पक्षता। अत्र तादृशनिश्चयत्वे स्वरूपसंबन्धरूपावच्छेदकत्व-स्वीकारे महानसीयवह्निसाध्यकस्थले महानसीयवह्निमान् वह्निसामान्याभाववान् वा पक्ष इत्यादि संशयासंग्रहः। वह्नित्वावच्छिन्नसाध्यकस्थले महानसीयवह्निमान् न वेति संशयस्य पक्षतात्वापत्तिः। अतो व्यापकत्वनिवेशः। अथ महानसीयवह्निसाध्यकानुमितौ महानसीयवह्नित्वावच्छिन्नप्रकारता-निष्ठावच्छेदकताकप्रतिबन्धकतानिवेशेनोपपत्तेः। महानसीयवह्नित्वावच्छिन्नप्रकारताया अपि वह्नित्वावच्छिन्नप्रकारतात्वेन वह्न्यभाववत्तज्ञानप्रतिबन्धकतावच्छेदकत्वादिति।

End:

न चैवं स्वघटितेत्यादिभूतान्तं त्यज्यतां, स्वावच्छेदकतावच्छेदकत्वेन निवेश्यतां, निरुक्त-विरोधिविषयतानिरूपितप्रकारतैव साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकत्वेन उपादीयतामिति वाच्यम्।

तथा सत्यवच्छेदकावच्छेदेनानानुमितौ सामानाधिकरण्येन कोटिद्वयमवगाहमानस्य पर्वतो वह्निमान् वह्निविरुद्धवह्न्यभाववान् चेति समूहालम्बनावच्छेदकावच्छेदेन साध्यनिश्चयबाधनिश्चयप्रतिबद्धत्वस्य पक्षतात्वापत्तेः। भूतान्तोपादाने च पर्वतत्वसामानाधिकरण्येन वह्न्यभावावगाहितायाः सामानाधिकरण्येन वह्न्यवगाहिताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकाभावान्न तादृशापत्तिः। अवच्छेदकतावच्छेदेन कोटिद्वयमवगाहमानस्य समुच्चयस्य पक्षतात्ववारणाय स्वावच्छेदक तेत्यादि निरूपितान्तम्। तथा च बाधनिश्चयप्रतिबद्धत्वतावच्छेदकस्वघटितधर्मावच्छिन्नप्रतिबन्धकता-निरूपितप्रतिबध्यता . . . .।

1461

72823(d) **पक्षताक्रोडपत्रम्**

Beginning:

ननु पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयः पक्षतेत्यत्र पर्वते महानसीयवह्निसाध्यकस्थले पर्वतो महानसीयवह्निमान् वह्निसामान्याभाववान् वा पक्ष इत्याकारकसंशयस्य पक्षतात्वानुपपत्तिः। पर्वते वह्निसाध्यकस्थले महानसीयवह्निमान् न वा पक्ष इत्याकारकसंशयस्य पक्षतात्वापत्तिरिति भिया अन्यूनवृत्तित्वरूपमवच्छिन्नत्वं निवेशितम्। अत्रेयमनुपपत्तिः। पक्षतावच्छेदकताश्रयपर्याप्तावच्छेदकताकविशेष्यतानिरूपितसाध्यतावच्छेदकताश्रयपर्याप्तावच्छेदकताकप्रकारत्वावच्छिन्नप्रतिबन्धकतानिरूपित-प्रतिबध्यत्वमिति रीत्या स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेन तादृशसंशयसंग्रहासंग्रहौ संभवत इति अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशो व्यर्थ इति चेन् मैवम्।

End:

केचित्तु बाधनिश्चयप्रतिबध्यतावच्छेदकतावच्छेदककिंचिद्धर्मावच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकताकप्रतिबन्धकतानिरूपितप्रतिबध्यत्वनिवेशान्न वह्निव्याप्यसाध्यकस्थले उक्तसंशये अतिव्यातिरित्याहुः। तत्तुच्छम्। अभाववह्निव्याप्यसाध्यकस्थले अभाववह्निव्याप्याभावाभावववह्निमानभाववह्निसामान्याभाववान् वा पक्ष इत्याकारकसंशये अतिव्याप्तेर्वज्रलेपायितत्वादिति पाठान्तरम्। न च स्वनिष्ठविषयित्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतायां साध्यवत्तानिश्चयप्रतिबन्धकतन्निरूपितत्वविवक्षायां नैष दोषः इति वाच्यम्। तथा सति साध्यं पक्षे न वेत्यादिसंशयासंग्रहापत्तेरिति निपुणतरमूहनीयम्।

1462

TR1032 **पक्षताक्रोडपत्रम्**

Beginning:

अनाहार्याप्रामाण्यकबाधनिश्चयसत्त्वे सिद्ध्यात्मकपरामर्शसत्त्वेऽनुमित्यापत्तिः **जगदीशेन** कृता। न चागृहीतप्रामाण्यकबाधनिश्चयस्य विरोधितया गृहीताप्रामाण्यकबाधनिश्चयमात्रदशायामपि

अनुमित्यापत्तिसंभवे संदिग्धाप्रामाण्यकबाधनिश्चयपर्यन्तानुधावनं संदर्भविरुद्धमिति वाच्यम्। निश्चिताप्रामाण्यकसाध्यसंदेहदशायामनुमितेरनुत्पादेनानिश्चिताप्रामाण्यकसाध्यसिद्धिप्रतिबध्यस्यैव प्राचां नयेऽनुमितिहेतुत्वात्। न चात्रानुमित्यनुत्पादे बीजाभाव इति वाच्यम्। ज्ञानधर्मिकाप्रामाण्यनिश्चयस्य विषयनिश्चायकतया तदनन्तरं साध्यनिश्चयबाधनिश्चययोरन्यतरस्यावश्यकारितत्वात्।

End:

अत्र कल्पे उत्तरक्षणे सिषाधयिषाविरहवदप्रामाण्यज्ञानाभावो निवेश्यः। अन्यथा यत्र सिद्ध्यात्मकपरामर्शाद्वितीयक्षणेऽप्रामाण्यज्ञानं ततोऽनुमितिस्तत्राप्रामाण्यज्ञानोत्पत्तिदशायामनुमित्यापत्तेः। एवं च तत्रैव उत्तरक्षणेऽनुमित्यर्थं सिद्धावपि अप्रामाण्यज्ञानविरह आवश्यकः तत्पदव्यावृत्तः। यद्यपि यत्रोभयपरामर्शजन्यानुमितिर्जायतामितीच्छा ततोऽपेक्षाबुद्ध्यात्मिका सिद्धिः ततः परामर्शः ततः परामर्शान्तरं ततोऽनुमितिः तत्रत्यसिषाधयिषाविरहस्य स्वसमयविशेषणतावा आवश्यकत्वेन द्वितीयपरामर्शोत्पत्तिदशायामनुमित्यापत्तिर्दुर्वारा, तथापि परकल्पे लाघवात्।

1463

72964(b) पक्षतात्पर्यटिप्पणी

Beginning:

मूले व्याप्त्यनन्तरं पक्षधर्मता निरूप्यत इति व्याप्तिनिरूपणानन्तरनिरूपणविषयताश्रया पक्षधर्मतेत्यन्वयबोधः। **गादाधर्यां** संगतीति। पूर्वापरग्रन्थैकवाक्यताप्रतिपत्त्यर्थस्य संगतिप्रदर्शनस्य सांप्रदायिकत्वात्। तदुक्तं प्रत्यक्षोपजीवकत्वादिति। न च व्याप्त्यनन्तरमित्यनेनैवावसरोक्तिर्न न्यूनतेति वाच्यम्, क्तप्रत्ययादेरेव तल्लाभकत्वेनास्य संगतिसाध्यसमर्पकत्वात् सकलसंगत्यप्रदर्शनात् न्यूनतेति वाच्यम्। केचित् अनुमितेर्लक्षणमिति समासायोगाद् आहानुमितिस्वरूपमिति। संगत्येति-व्याप्तिप्रयोज्यानुमितिप्रयोजकत्वज्ञानमिष्टसाधनमिति ज्ञानात् किं प्रयोजकान्तरमिति जिज्ञासया पक्षधर्मतानिरूपणात् संगतिलक्षणसमन्वयः। अनुकूलं न तज्जनकमित्याह—व्याप्तीति। ननु प्रयोजकत्वनिवेशे पक्षताया विषयतासंबन्धेन कारणतावच्छेदकत्वासंभवात् संबन्धान्तरेण तथात्वस्याग्रे दीधितिकृता दर्शनीयत्वाच्च संगत्यसत्त्वेऽग्रे तन्निरूपणानुपपत्तिरित्याशयेन शङ्कते—यद्यपीति।

End:

तथा च यन्निरूपितधर्मतावत्साध्यमिति विग्रहाद्वाक्यार्थबोधः। तथा च समासवाक्यात्तद्विपरीतसाध्यनिष्ठधर्मतानिरूपितधर्मितावदिति बोधः। अयं चार्थो धर्मपदस्यैव बहुव्रीहिस्थले पूर्वपदस्य तात्पर्यमात्रग्राहकतया चित्रगुरित्यादौ दृष्टचरत्वात्। तस्य भावः तत्त्वमित्यस्य धर्मित्वपर्यन्तमर्थ उक्तः। तथा च साध्यधर्मत्वान्तेन साध्यनिष्ठधर्मतानिरूपितधर्मितापर्यन्तं लभ्यते। अत्र संदिग्धं च तत् साध्यधर्मत्वं चेति कर्मधारये संदेहविषयाभिन्नं साध्यधर्मत्वमित्यर्थो भविष्यति। एवं च ह्रदो वह्निमानित्यादिस्थले अप्रसिद्धिः स्यादतः स्वस्मिन्निति पूरितम्। तेन संदिग्धं साध्यधर्मित्वं यत्रेति विग्रहवाक्ये

सप्तम्यर्थो विशेष्यत्वं स्वविशेष्यकसंदेहविषयसाध्यधर्मित्वम् । बहुव्रीहौ च तद्विपरीतः साध्याधिकरणत्वप्रकारकसंदेहविशेष्यविशेष्यकः । विशेष्यतासंबन्धेन तादृशसन्देहवानिति लभ्यते । तदेव पक्षत्वमित्यर्थः । न चैवं पक्षस्यैव लाभेऽपि पक्षनिष्ठधर्मविशेषालाभः । इष्टत्वात् । अन्यथा संदिग्धसाध्यधर्मत्वमित्येव मणिकारो ब्रूयात् । न साध्य इति । तथाच साध्ये संदिग्धधर्मत्वं यत्रेति व्युत्पत्त्या साध्यविशेष्य . . . . . .

1464

PM1720 (g) **पञ्चलक्षणीक्रोडपत्रम्**

Beginning:

साध्यवद्भिन्नेति । तत्र **गादाधर्यां** तादृशप्रतियोगितावच्छेदकयत्संबन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्संबन्धेन तद्वदवृत्तित्वस्य विवक्षितत्वादिति साध्यवद्भिन्नवृत्तिताघटकीभूतो यः साध्यतावच्छेदकसंबन्धेन वृत्तिमद्यत्किंचित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबन्धः, तेन संबन्धेन साध्यवद्भिन्नवृत्तिसाध्याभाववान् तदवृत्तित्वमर्थः । तथा च कालिकसंबन्धस्य साध्यवद्भिन्नवृत्तित्वघटकत्वान्न तेन हेतुमतः साध्याभाववत्त्वमादाय प्रमेयवान् कालत्वादित्यादावव्याप्तिरिति भावः ।

End:

न चैतद्दोषोऽपि एतन्मतोपरि इष्ट एवेति वाच्यम् । अव्याप्तिसंभवे तद्विहाय वक्ष्यमाणाव्याप्त्यसंगतिमात्रानुधावने न्यूनतापातादिति चेदत्र केचित् । हेतुतावच्छेदकसंबन्धेन स्वानुयोग्यधिकरणत्वं न विवक्षणीयम् । तत्रैव तात्पर्यात् । एवं च वृत्त्यनियामकसंबन्धेन व्याप्तेरभ्युपगमेऽपि क्षतिविरहः, साध्यवद्वृत्तित्वाभावस्यैव विवक्षणीयतया तद्वृत्तित्वाप्रसिद्धयैव वृत्त्यनियामकसंबन्धेन साध्यव्यभिचारिण्यतिप्रसंगविरहात् । तथा च विषयतायाः वृत्त्यनियामकतया तत्संबन्धघटिताव्याप्तिरेव नास्तीति क्वाव्याप्तिरित्याहुः ।

Page 85 to 96 of Kālīśaṃkarī. CSS. XXV.

1465

69319 **पञ्चलक्षणीक्रोडपत्रम्**

Beginning:

. . . . वमादायाव्याप्तेरवारणात् । ननु सत्तावान् जातेरित्यादौ गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नाभावमादायाव्याप्ते . . . . . वैशिष्ट्यानवच्छिन्नत्वविशेषणमावश्यकम् । न च साध्ये साकल्यविशेषणपक्षेऽपि नानाव्यक्तिकसाध्यकत्वस्य सत्तासाध्यत्ववद्धेतु . . . . . यास्साकल्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वयोः प्रयोजनाभिधानप्रस्तावे तद्विशेषणवारणीयाया एव

. . . . . काव्याप्तेस्तत्पक्षे इष्टत्वासंभवात्। तथा चायमर्थः संपन्नः। साध्ये साकल्य-निवेशपक्षे नानाव्यक्तिकसाध्यकत्वेन स . . . . . कत्वनिवेशपक्षे तु सत्तासाध्यकाव्याप्तेः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्यावर्तनीयतया नानाव्यक्तिकस . . . . . काव्याप्तिवारणाय वैशिष्ट्यानवच्छिन्नत्वमावश्यकमेव। न च तत्पक्षे तत्राव्याप्तिर्भट्टाचार्यसंमतैव। तेन वैशिष्ट्याव . . . . . तत्पक्षपरित्यागबीजत्वाभिधानविरोधापत्तेः।

End is same as in No. 1466.

1466

72964(c) **पञ्चलक्षणीक्रोडपत्रम्**—पट्टाभिरामकृतम्

Beginning is same as in No. 1467.

End:

तथा च नानाव्यक्तिकसाध्यकेत्यनेन वह्निमान् धूमात् जातिमान् सत्त्वादित्यादौ तत्तत्साध्य-व्यक्त्यभावं दर्शितविशिष्टाभावं चादायाव्याप्तिरविशेषेण प्रतिपादिता। तत्र विशेषः तत्तद्वह्न्यभाव-मादायाव्याप्तिः साकल्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वान्यतरविशेषणप्रवेशप्रयोजनप्रदर्शनाय प्रतिपाद्यते। विशिष्टाभावमादायाव्याप्तिस्तु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैवेति भट्टा-चार्याभिप्रायः। अतो न प्रथमदोषप्रसक्तिः। एतद्व्यक्तिवृत्तियावद्धर्मवान्नित्यस्य तु एतद्व्यक्तिमात्र-वृत्तियावद्धर्मवानित्यर्थः। अतो न द्वितीयदोष इति वदन्ति। तदसत्। भट्टाचार्यस्येदृशाभिप्रायवत्त्वे वह्निमान् धूमादित्यादौ वह्निजलोभयत्वावच्छिन्नाभावमादायाव्याप्तेरपि साद्ध्यतावच्छेदकावच्छिन्न-प्रतियोगिताकत्वविशेषणव्यावर्तनीयाया नानाव्यक्तिकसाध्यकेत्यनेन प्रतिपादनसंभवेन प्रथममेव तदुद्भाव्यपरिहारस्य संदर्भविरोधापादकत्वादित्यास्तां विस्तरः।

Colophon:

नानाव्यक्तिकसाध्यकसद्धेताविति निगूढार्थम्।
साकल्यलक्षणे यद्वाक्यं **तार्किकशिरोमणिः** प्रोचे ॥
भट्टाचार्यपरिष्कृतिमनुसंधाय च तदर्थविवृतिरियम्।
पट्टाभिरामसुधिया कृपया निरमायि दक्षिणामूर्तेः ॥

1467

75289 **पञ्चलक्षणीक्रोडपत्रम्**

Beginning:

न्यग्रोधमूलनिलयं प्रपद्य धाम प्रकाश्यते सद्यः।
व्याप्तिगदाधरफणितिः प्रायः पट्टाभिरामेण ॥

सर्वमिदं सति व्याप्तिनिश्चये स्यादिति **दीधितिस्वरसपर्यालोचनायामनुमानप्रामाण्यव्यवस्थापनं** प्रति व्याप्तिनिश्चयस्य कारणत्वं लभ्यत इति पर्यालोच्यैतदनुसारेण समारब्धानुमानप्रामाण्यपरीक्षा-कारणत्वं व्याप्तिग्रहविशेषणतया **मथुरानाथादि**भिर्व्याख्यातम्। तदनुसारेणैवानुमितिहेतुव्याप्तिज्ञान इति मूलेऽप्यनुमितिहेत्वित्यस्यानुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यर्थ उक्तो **मूलमाधुर्याम्**। अत्रानुमान-निष्ठप्रामाण्यानुमितिपदं तद्व्यवस्थापनपरमिति बोध्यम्। एतच्च व्याख्यानं न संभवति। स्वरूपासतो लोकानां व्याप्तिनिश्चयस्य अनुमानप्रामाण्यपरीक्षाकारणत्वासंभवात्। तत्कुत इति चेल्लोकानां व्याप्तिनिश्चयाभावेऽपि व्याप्तिनिश्चयो भवतीति व्यवस्थापने कृते अनुमानप्रामाण्यपरीक्षानिष्पत्तेः लोकानां व्याप्तिनिश्चयोत्पत्तावपि तद्व्यवस्थापने कृते अनुमानप्रामाण्यपरीक्षायाः अनुत्पत्तेश्च।

End:

ननु यत्र व्यभिचारिणि साध्यसामानाधिकरण्यमस्ति तत्रैव सामानाधिकरण्याभावे प्रमाणा-भावेनातिव्याप्तिर्वक्तव्या, न तु विरुद्धे, तत्र साध्यसामानाधिकरण्याभावस्य उभयवादिसिद्धत्वात्। अत एव विरुद्धव्यावर्त्तनाय व्यभिचारिणीत्युक्तम्। तथा च दर्शितहेत्वोर्विरुद्धत्वात् नोक्त दोष इति चेन्न। पिशाचत्ववान् पिशाचत्वस्तम्भान्यतरस्मादित्यत्र पिशाचत्वान्तर्भावेन साध्यसमानाधिकरणे व्यभिचारिणि अगुरुत्ववानपकृष्टमहत्त्वादित्यत्र पृथिव्याद्यन्तर्भावेन साध्यसमानाधिकरणे व्यभि-चारिणि च तात्पर्यादित्यादि महत्तरममिधातव्यमास्ते।

Colophon:

इति **गदाधरपञ्चलक्षणी**टिप्पणी समाप्ता।

1468

PM1660(a) पञ्चलक्षणीक्रोडपत्रम्

Beginning:

साध्याभाववदवृत्तित्वमिति मूलम्। ननु वह्निमान् धूमादित्यादावव्याप्तिः। हेत्वधिकरणताया अपि साध्याभावाधिकरणतया तन्निरूपितवृत्तित्वस्य हेतुनिष्ठायामाधेयतायां सत्त्वात्। न च हेत्वधि-करणताभिन्नत्वस्य साध्याभावाधिकरणतायां निवेशान्न दोष इति वाच्यम्। धूमाधिकरणताभिन्नं धूमादित्यादावप्रसिद्ध्यापत्तेः। न च साध्याभावाधिकरणनिष्ठाधिकरणानिरूपितवृत्तित्वाभावनिवेशान्ना-व्याप्तिरिति वाच्यम्; तथापि घटभिन्नं घटत्वाधिकरणतात्वादित्यादौ साध्याभावाधिकरणघटनिष्ठा या घटत्वाधिकरणता तन्निरूपितवृत्तित्वस्य निरुक्तहेतौ सत्त्वादव्याप्त्यापत्तेरिति चेन्न, स्वनिरूपितत्व-स्वनिष्ठाधिकरणतानिरूपितत्वोभयसंबन्धेन साध्याभावाधिकरणविशिष्टवृत्तित्वाभावस्य विवक्षितत्वात्।

End:

साध्यवत्त्वं च साध्यतावच्छेदकसंबन्धेन बोध्यमिति **मथुरानाथेनोक्तम्**। ननु संबन्धसामान्येन साध्यवत्त्वविवक्षणे वह्निमान् धूमादित्यादावव्याप्तिदानमसंगतम्, साध्यवत्त्वावच्छिन्नभेदस्य संयोगेन

साध्यवति पर्वतादावसंभवात् इति चेन्न, यत्किंचित्संबन्धेन साध्यवत्त्वविवक्षणाभिप्रायेणाव्याप्तेरुक्तत्वात्। न च विषयितादिकृतविशेषणतादियत्किंचित्संबन्धेन साध्यवदन्यस्मिन् हेतोर्वृत्त्या सर्वत्रासंभव एव वक्तुमुचितमिति वाच्यम्। इदं घटभिन्नसंयोगसंयुक्तं समवेतसविषयकान्यत्वविशिष्टतद्रूपवान् तद्घटभिन्नान्यत्वविशिष्टतद्रूपवान् वा तद्रसादित्यादौ लक्षणागमनात् अव्याप्त्यभिधानस्यैवोचितत्वात् इति सुधीभिर्विभावनीयम्।

Colophon:

इति **व्याप्तिपञ्चक**विवेचना।

1469

PM1660(b) पञ्चलक्षणीक्रोडपत्रम्

Beginning:

मूले नन्विति। अनुमितिः उक्तलक्षणालक्षिता पर्वतो वह्निमानित्याकारा। तद्धेतुः तत्कारणीभूतं यत् व्याप्तिज्ञानं धूमो वह्निव्याप्य इत्याकारकं ज्ञानम्। तद्विषयो व्याप्तिः। व्याप्तिपदार्थः क इत्यर्थः। ननु अनुमानप्रामाण्यनिरूपणमसमाप्य व्याप्तिग्रहोपायमनभिधाय वा व्याप्तिस्वरूपाभिधानमर्थान्तरग्रस्तं, अजिज्ञासिताभिधानमर्थान्तरमिति तल्लक्षणात्। अतो दीधितिकृता समारब्धेत्याद्यभिहितम्। एतच्च अनुमानप्रामाण्यनिरूपणं कृतमिति भ्रमवारणाय। तस्य कृतत्वे तदुपोद्घातालाभः। तत्र समारब्धत्वस्य प्रतिपादनविशेषणत्वं न युज्यते, उपायस्य वक्ष्यमाणत्वेन बाधादित्यत आह-समारब्धमिति। एतच्च अनुमितिहेतुव्याप्तिज्ञाने इति शब्दलभ्यमपि।

End:

तत्र घटनिष्ठावच्छेदकत्वस्य उत्पत्तिकालेनावच्छेदादिति ध्येयमिति **जगदीशः**। ननु हेतुतावच्छेदकसंबन्धावच्छिन्नहेत्वधिकरणावच्छेद्यसाध्योपलक्षितवृत्तित्वाभाव एव लक्षणे निवेश्यः। अन्यथा वह्निप्रागभावे वह्निविशिष्टनिरूपितवृत्तित्वाभावस्य सत्त्वाद्वह्निमान् वह्निप्रागभावादित्यादावव्याप्तिः। एवं च साध्यविशिष्टनिरूपितवृत्तित्वाभावसत्त्वेऽपि साध्योपलक्षितनिरूपितवृत्तित्वाभावविरहान्नाव्याप्तिः। तथा च कथं हेत्वधिकरणनिष्ठावच्छेदकतायां निरवच्छिन्नत्वं निवेशितमिति चेन्न। साध्योपलक्षितनिरूपितवृत्तित्वाभावनिवेशेऽपि वह्निमान् वह्निप्रागभावादित्यादावव्याप्तिवारणार्थं हेत्वधिकरणनिष्ठावच्छेदकतायां निरवच्छिन्नत्वं देयमेव, अन्यथा वह्न्यधिकरणकालावच्छेदेन वह्न्युपलक्षितनिरूपितवृत्तित्वाभावसत्त्वादव्याप्तेर्दुर्वारत्वात् इति ध्येयम्।

Colophon:

इति **जगदीशपञ्चलक्षणी** सिंहव्याघ्रलक्षणद्वयविवेचना।

1470

PM1720 (e) **पञ्चलक्षणीक्रोडपत्रम्**

Beginning:

प्रमाणविभाजकधर्मावच्छिन्नयदुपजीवकत्वं तदनन्तरनिरूप्यत्वव्याप्यमिति नियमेन प्रत्यक्ष-प्रमाणानन्तरमेव अनुमानप्रमाणं निरूपितमनुमितिकरणत्वावच्छेदेन प्रत्यक्षप्रमाणजन्यत्वात् । ईश्वरव्याप्तिज्ञानस्य अनुमितिकरणस्वरूपयोग्यत्वेऽपि फलोपधायकत्वगर्भकरणत्वासत्त्वात् । अय-मभिप्रायः । छिदानुपधायककुठारस्थले तत्कुठारेण छिनत्तीति प्रयोगवारणाय फलायोगव्यवच्छिन्न-व्यापारवत्कारणत्वं करणत्वम् । तदर्थश्च स्वनिरूपितकार्यतावच्छेदकसंबन्धेन कार्याधिकरणे तत्कार्योपधायकव्यापाराव्यवहितप्राक्कालावच्छेदेन कारणतावच्छेदकसंबन्धेन वर्तते यत्तद्वृत्तित्वविशिष्टं कारणत्वम् । एवं च व्याप्तिज्ञानत्वावच्छिन्नकरणतायाः स्वनिरूपितकार्यतावच्छेदकीभूतसमवायसंबन्धेन अनुमित्यधिकरणे जीवात्मनि कारणतावच्छेदकसमवायेन वृत्तित्वविशिष्टायाः परमेश्वरीयव्याप्तिज्ञाने असत्त्वेन करणत्वायोगः । अत्रेदं बोध्यम् ।

End:

न चैतन्मते पुरुषाभाववान् दण्ड इति ज्ञानकाले रक्तदण्डवत्पुरुषवानयं देश इति ज्ञानानुप-पत्तिः । पुरुषप्रकारतानिरूपितदण्डविशेष्यतायाः तादृशबाधज्ञानप्रतिबध्यतावच्छेदकविषयतारूपायास्तत्र सत्त्वादिति वाच्यम् । पुरुषत्वावच्छिन्नप्रकारतात्वावच्छिन्नप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यतायाः एव पुरुषाभाववान् दण्ड इति ज्ञानप्रतिबध्यतावच्छेदकत्वात्, उक्तज्ञाने च पुरुषप्रकारतानिरूपि-तदण्डत्वावच्छिन्नविशेष्यताविरहात् न च तादृशबाधप्रतिबध्यतापत्तिः । न चैवमपि धूमविशिष्टधर्मि-विशिष्टधर्मिविशिष्टधर्मिविशिष्टवान् देश इति बहुविधान्तरानिर्द्धर्मित्वावच्छेदककज्ञानस्य बाधप्रति-बद्धयतया तदवच्छेदकशरीरगौरवं दुष्परिहरमेवेति वाच्यम् । तथापि तत्तद्वस्तुप्रकारकस्मरणे तत्तद्वस्तु-विशेष्यकस्मरणे तत्तद्वस्तुप्रकारकतत्तद्वस्तुविशेष्यकसंस्काराणां कारणतया तत्र विपरीतस्मरणवारणाय तत्तद्वस्तुप्रकारतात्वावच्छिन्ननिरूपिततत्तद्वस्तुविशेष्यताकसंस्कारत्वेन हेतुतायाः कल्पनीयतया परमते महागौरवादित्यलं पल्लवितेन ।

1471

PM 1731 **पञ्चलक्षणीक्रोडपत्रम्**

Beginning:

समारभते इत्यादि । आरभते इत्यन्तो ग्रन्थः किमर्थमित्याशङ्कायां अनुमानप्रामाण्यस्य पूर्व-निरूपितत्वादिदानीं व्याप्तिनिरूपणस्य क्रियमाणत्वादुभयोर्निरूपणयोः संगत्यप्रदर्शनेन न्यूनता स्यादिति तयोरुपोद्घातत्वरूपसंगतिं प्रदर्शयति । तथा च प्रयोजकत्वमुपोद्घातत्वं, तच्च व्याप्तिनिरूपणे

उपपादितमिति न संगत्यप्रदर्शनन्यूनतेति केचित्। तद्दूषयितुं प्रकारान्तरेणावतारयति समारब्धेति। अनुमानप्रामाण्योपपादकतयेति। हेतुभूतव्याप्तिज्ञाने का व्याप्तिरिति प्रश्नग्रन्थेनैव मूले प्रसंगसंगति-प्रदर्शनात् संगत्युपपादकतया व्याख्यानमसंगतम्। अन्यथा प्रश्नस्यैव वैयर्थ्यापत्तेः, न तावदव्यभिचरितत्वं व्याप्तिरित्येव सुवचत्वात्। एवं च अनुमानप्रामाण्यपरीक्षाघटकानुमितिहेतुभूतव्याप्तिज्ञान-विषयत्वरूपसंबन्धप्रदर्शनेन स्मृतत्वसंभवात् संगतिः प्रदर्शितेति न संगतिप्रदर्शनपरत्वं समारब्धेति-ग्रन्थस्य।

End:

ननु व्याप्तेस्तद्व्यक्तित्वरूपतया न कस्यापि तत्तद्व्यक्तित्वस्यानतिप्रसक्तं धूमत्वमिति धूमत्वस्य व्याप्यतावच्छेदकत्वं न स्यात्। न चेष्टापत्तिः, धूमत्वावच्छिन्नलिङ्गपरामर्शादनुमित्यपलापापत्तेः, धूमादित्यादिन्यायप्रयोगस्यापि असंगतत्वापत्तेरित्यत आह—केनापि रूपेणेति। तादृशतत्तद्व्यक्तित्वा-नामन्यतमत्वेन तावत्समुदायत्वेनानुगतानां व्यक्तीनामनतिप्रसक्तमेव धूमत्वमिति तादृशव्यक्तीनां सामान्यलक्षणाप्रत्यासत्त्या ज्ञातुं शक्यत्वेन न दुर्ज्ञेयतापीति भावः। स्वानुयोगिनो यदधिकरणमिति हेतुतावच्छेदकसंबन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्नस्वात्मिका या याधिकरणता तत्तदन्या . . . . . .

1472

PM 1743 (a) पञ्चलक्षणीक्रोडपत्रम्

Beginning:

अव्याप्यवृत्तिसाध्यकसद्धेताविति। अत्र न व्याप्यवृत्ति अव्याप्यवृत्ति। व्याप्यवृत्तिभिन्नमिति यावत्। तथा च व्याप्यवृत्तिभिन्नं साध्यं यस्येति विग्रहः। व्याप्यवृत्तित्वं चानवच्छिन्नाधिकणताकत्वम्। एवं चानवच्छिन्नाधिकरणताकत्वस्य संयोगादावसत्त्वेन संयोगादेस्तद्भिन्नतया तत्साध्यकैतद्दृक्षत्वादाव-व्याप्तिरिति भावः। कपिसंयोगी गगानादित्यादावव्याप्तिवारणाय वृत्तिमत्त्वार्थकं सत्पदं। न च जन्यज्ञानस्य कालिकाव्याप्यवृत्तित्वेन विषयतासंबन्धेन सर्वमित्याकारकजन्यज्ञानस्य केवलान्वयितया तत्साध्यकप्रमेयत्वादेरपि व्याप्यवृत्तिभिन्नसाध्यकसद्धेतुतया तत्राव्याप्तिसंभवेऽपि द्वितीयलक्षणस्य तत्राव्याप्तिवारणासंभवादसंगतिः। विषयतासंबन्धावच्छिन्नज्ञानाधिकरणताया यत्किंचित्क्षणावच्छिन्नतया तस्य व्याप्यवृत्तिभिन्नत्वादिति वाच्यम्। व्याप्यवृत्तित्वस्यान्यादृशस्य विवक्षणीयत्वात्।

End:

केचित्तु अव्याप्यवृत्तिभावरूपं साध्यं यस्य हेतोः स चासौ सद्धेतुश्चेत्यर्थं वर्णयन्ति। केचित्तु व्याप्यवृत्तिसाध्यं यत्र तत्र सन् पक्षधर्मतावान् हेतुरव्याप्यवृत्तिसाध्यकसद्धेतुरित्यर्थं इति प्रजल्पन्ति। तदपि परास्तम्। तत्रत्यत्रलः सप्तम्यैवाधेयतालाभेनावृत्तिगगनादिवारणे तद्वारकसत्पदवैयर्थ्यस्य दुर्वारत्वात् इति। वस्तुतस्तु सप्तमीतत्पुरुषः समीचीन इति प्रतिभाति। न चैवं तद्दोषापत्तिः, अन्यथा वैयधिकरण्यसंबन्धत्वयोरन्यतरत्वे साध्ये तद्व्यक्तित्वादेरसांगत्यापत्तेः।

काभावं चादाय दोषः। साध्यतावच्छेदकसंबन्धावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ समवायसंबन्धावच्छिन्नप्रतियोगिताकाभावं, कालिकसंबन्धेन द्रव्यत्वाभावसाध्यककालत्वादिहेतौ दैशिकविशेषणतासंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावं चादाय दोष इति **गदाधरभट्टाचार्यैरभिहितम्**। अत्राभावद्वयत्रिके प्राथमिकाभावत्रयं अव्याप्यवृत्तिप्रतियोगिकाभावस्याधिकरणभेदेन भेदमते। अभावमात्रस्यैवाधिकरणभेदेन भेद इति मते तु द्वैतीयीकाभावत्रयमिति विवेकः। अत्र विचार्यते।

End:

ननु संबन्धघटकप्रतिबध्यतावच्छेदककोटिप्रविष्टप्रकारतायां साध्यतावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबन्धावच्छिन्नत्वे न निवेश्यते प्रयोजनाभावात्, किंतु . . .

1479

66777 **पञ्चलक्षणीटिप्पणी**

Beginning:

अप्रमाणसाधर्म्येणेत्यादिग्रन्थेनानुमानव्यवस्थापनेन वादिनो निरासे व्याप्तिस्वरूपनिरूपणं व्यर्थमित्याशङ्कोच्छेदाय समारब्धेति विशेषणमित्याह—व्याप्तिग्रहेत्यादि। तथा च प्रामाण्यव्यवस्थापनस्यैव निरासहेतुत्वमिति भावः। तदिति प्रामाण्यव्यवस्थापनं संभवतीति सामग्र्यन्तरेण नैव संभवतीति ज्ञापयितुं करणीभूतेत्यनेन पुनरभिधानमिति भावः। तद्विषयके कृतिध्वंसासमानकालीनतद्विषयककृतिरारम्भः। वर्तमानध्वंसप्रतियोगित्वं क्तप्रत्ययार्थः, समित्युपसर्गस्य सफलत्वमर्थः। द्वयोः कृतावन्वयः। प्रतिष्ठितं पूजयेदित्यादौ प्रतिष्ठायां तथान्वयदर्शनात्। आरभतेति। आरम्भविषयतेत्यर्थः।

End:

प्रतियोगिवैयधिकरण्यमात्रनिवेशे दूषणमाह—समनियतेत्यादि। हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणवृत्तितानिवेशे चेत्यर्थः; अन्यथा सत्ताभावस्यापि निरूपकविशेषणाक्रान्तस्याधिकरणे जात्यादौ हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धयैव नातिव्याप्तिः। अत्र घटपटौ पक्षीकृत्य पर्याप्तिसंबन्धेनोभयत्वं यत्र साध्यते उभयत्वविशेषो हेतुः तत्र अव्याप्तिर्बोध्या। तथा च कपिसंयोगादिसाध्यके हेतोस्तादृशसाध्याभाववद्वृत्तित्वमेव परंपरया कपिसंयोगाभावादिसाध्यकाव्याप्तिप्रयोजकमिति। यथा साक्षात्तत्प्रयुक्तकपिसंयो . . .

1480

68318 **पञ्चलक्षणीटिप्पणी**

Beginning:

दीधितौ समारब्धेति। वर्तमानकालवृत्तिध्वंसप्रतियोगिनी सफला या आद्यकृतिः तद्विषयीभूतेत्यर्थः। समित्युपसर्गस्य सफलत्वमर्थः रभिधातोराद्यकृतिः। कृत्प्रत्ययस्य वर्तमानकालवृत्तिध्वं-

सप्रतियोगित्वरूपमतीतत्वमर्थः। विषयत्वं च कृत्प्रत्ययार्थः। ननु कृत्प्रत्ययार्थभूतवर्तमानध्वंसप्रतियोगित्वान्वितधात्वर्थान्वयस्वीकारेणैवैतादृशान्वयबोधः स्यात्। स एव न संभवति, केवलप्रकृत्यर्थान्वितस्वार्थबोधकत्वस्यैव प्रत्ययानां दृष्टचरत्वेन स्वार्थान्वितप्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य प्रत्ययानामदृष्टचरत्वादिति चेन्न। प्रतिष्ठितं लिङ्गमित्यत्र कृत्प्रत्ययार्थवर्तमानध्वंसप्रतियोगित्ववति या प्रतिष्ठा तत्कर्मीभूतं लिङ्गमित्यन्वयस्य दृष्टत्वात्।

End:

न चैवं सत्यग्रे स्वनिष्ठत्वनिवेशसार्थक्यकथनासंगतिः कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावसाध्यकस्थले कालिकसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावाभावस्य साध्यव्यापकतावच्छेदकत्वाभावादिति वाच्यम्। अतिरिक्तेतिधर्मस्यावच्छेदकत्वस्वीकारे द्रव्यवृत्तित्वविशिष्टः भावसाध्यकस्थलेऽव्याप्तिवारणाय साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वव्यापकत्वमेव निवेश्यम्। एवं चोक्तस्थलेऽपि साध्याभावाभावनिष्ठानुयोगिताया साध्यव्यापकतावच्छेदकरूपव्यापकत्वेन संगत्यभावात्। अत्रेदं बोद्धव्यम्। नित्यवृत्तित्वविशिष्टाभाववान्नित्यत्वादित्यादावव्याप्तिः, साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य कालिकसंबन्धावच्छिन्नप्रतियोगिताकाभावनिष्ठा या अनुयो . . .

1481

69800 पञ्चलक्षणीटिप्पणी

Beginning:

पूर्वं प्रत्यक्षप्रमाणनिरूपणानन्तरमनुमाननिरूपणे संगतिः प्रदर्शिता। तदनन्तरं पूर्वपक्षिणः एवमाशशङ्किरे अनुमानस्य प्रामाण्यं स्याच्चेदनुमाननिरूपणं कर्तुं शक्यते। तदेव न संभवति। अनुमानं न प्रमाणं प्रमितिकरणतावच्छेदकरूपशून्यत्वात् घटवत्, यत्र यत्र प्रमितिकरणतावच्छेदकरूपशून्यत्वं तत्राप्रमाणत्वमिति चेत्। घटे प्रमितिकरणतावच्छेदकं रूपं चक्षुष्ट्वादिकं, तच्छून्यत्वं घटे वर्तते, प्रमाणत्वाभावोऽपि तत्र वर्तते, तद्वत् अनुमानेऽपि प्रमितिकरणतावच्छेदकरूपशून्यत्वस्य सत्त्वात् प्रमाणत्वाभावो आवश्यकः। एतादृशानुमानेन प्रमाणत्वाभावः सिध्यतीत्युक्तं **प्राभाकरैः**। तेषामाशयः क इति चेत्, अयोग्योपाधिसंदेहेन व्यभिचारसंदेहो जायते, व्यभिचारसंदेहे सति व्याप्तिनिश्चयात्मकानुमानं न संभवति।

End:

यथाश्रुतप्रथमलक्षणार्थबोधकत्वं तादृशवाक्यस्य कथमिति चेत्, इत्थम्—अधिकरणं न भवतीत्यनधिकरणं, साध्यस्याधिकरणं साध्याधिकरणं, साध्याधिकरणम् अनधिकरणं यस्येति विग्रहवाक्यस्य यन्निष्ठाधेयतानिरूपकभिन्नं साध्यनिष्ठाधेयतानिरूपकमित्यर्थः। समासवाक्यस्य तु स्वनिष्ठाधेयतानिरूपकभिन्नसाध्यनिष्ठाधेयतानिरूपकमित्यर्थः। तदुत्तरत्वप्रत्ययेन तत्त्वं बोध्यते। साध्यपदोत्तरसंनिविष्टनञा तदभावः प्रतीयते, यथाश्रुतप्रथमलक्षणार्थबोधकत्वं तस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपप्रथमलक्षणनिष्कृष्टयथाश्रुतार्थबोधकत्वमपि साध्यानधिकरणानधिकरणपदस्य संभवति। तथा हि—नाधिकरणं अनधिकरणं, अधिकरणम् अनधिकरणं साध्यं यस्येति

विग्रहवाक्येन यन्निष्ठाधेयतानिरूपकभिन्नं आधेयतानिरूपकमित्यर्थः प्रतीयते । समासवाक्येन तु अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावानित्यर्थः प्रतीयते । साध्यम् अधिकरणानधिकरणं यस्येति द्वितीयव्युत्पत्तिः । यच्छब्दार्थः शैवालादिः । षष्ठ्यर्थः आधेयत्वं, तस्याधिकरणपदार्थैकदेशाधेयत्वेऽन्वयः । तथा च यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयतावत्साध्यमिति विग्रहवाक्यार्थः । साध्याधिकरणभिन्नाधिकरणवृत्तीति समासवाक्यार्थः । तदुत्तरत्वप्रत्ययेन तत्त्वं, साध्यपदोत्तरसंनिविष्टनञा तदभाव इति उक्तार्थबोधकत्वं तस्य ।

1482

66357(b) **बाधलक्षणक्रोडपत्रम्**

Beginning is same as in MT. 1404(b).

End:

यदि च तादृशगगनसाध्यकस्थले गगनसामान्याभाववत्पक्षस्यैव बाधत्वमङ्गीक्रियते, न तु गगनाभाववदभाववत्कालीनगगनाभाववत्पक्षस्य, वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदादेस्तादृशसत्प्रतिपक्षस्य च वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वं निवेश्यते प्रतिबन्धकतायाम्, तदा एतत्कल्पद्वयमपि साधु । अनुमितिनिष्ठजन्यतापदमनुमितित्वावच्छिन्नजन्यतापरम् । तेन वह्न्यभाववद्ध्रदात्मकबाधादौ विशिष्टवैशिष्ट्यानवगाहिबुद्धित्वावच्छिन्नजन्यतामादाय तादृशानुमितिनिष्ठवह्न्यभाववद्विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्नविषयत्वावच्छिन्नत्वस्य प्रतिबन्धकतायां सत्वेऽपि नासंभवः । उद्देश्यताकत्वमितिनिष्कर्षः । वह्न्यभाववान् ह्रदो वह्निमानित्यादौ वह्न्यभाववन्निर्वह्निह्रदात्मके बाधेऽव्याप्तिः । विशिष्टपक्षे साध्याग्रहस्याहार्यतया तादृशग्रहत्वावच्छिन्नप्रतिबध्यत्वाप्रसिद्ध्या तद्घटितलक्षणासत्त्वात् इति चेन्न । उद्देश्यतान्तःपातिप्रकारताशालिज्ञानत्वाभावत्वावच्छिन्नप्रयोज्यतानिरूपिता सती स्वनिरूपितप्रयोज्यतावच्छेदकावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकतावच्छेदकविशिष्टावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतावच्छेदकीभूतविषयत्वानवच्छिन्ना या स्वात्मकप्रयोजकता तदाश्रयविषयताकधर्मवत्त्वस्य निष्कृष्टत्वात् । विरोधिपक्षतावच्छेदकस्थले विशिष्टविषयत्वावच्छिन्नप्रतिबध्यत्वाप्रसिद्धावपि उक्ताभावप्रयोज्यत्वसत्त्वात् लक्षणसमन्वयः । ननु वह्निव्याप्यवान् पर्वत इति परामर्शात् इतरबाधसहकारदशायां काञ्चनमयपर्वतो वह्निमानित्यनुमितिः । तत्र पर्वतवृत्तिकाञ्चनमयत्वाभावरूपबाधेऽव्याप्तिरिति चेन्न । अत्र प्रकृतपक्षग्रहाद्यविरोधित्वं च परामर्शे पक्षसाध्ययोः यादृशरूपेण भानं तादृशरूपावच्छिन्न . . .

1483

73082 **बाधलक्षणक्रोडपत्रम्**

Beginning:

उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तविशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यबोधीयविषयितान्तःपातिप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपिता सती स्वनिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रति-

बध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकीभूतविषयित्वानवच्छिन्ना या प्रतिबन्धकता तदवच्छेदकस्वनिरूपितविषयिताकत्वं समुदितार्थः। अथात्र स्वनिरूपितप्रतिबध्यताश्रान्यनुमित्यवृत्तिविषयित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयित्वानवच्छिन्नत्वमेव प्रतिबन्धकतायां निवेश्यं, तावतैव वह्निव्याप्याभाववद्ध्रयभाव उभयवान् पर्वत इत्यादौ वह्निव्याप्यवत्पर्वते नातिव्याप्तिः। वह्निमत्पर्वतविषयिताया: तादृशाप्रतिबध्यताश्रालिपर्वतो वह्निव्याप्याभाववान् वह्निमांश्चेति समूहालम्बनज्ञानवृत्तित्वात् कृतं तादृशप्रतिबध्यतावच्छेदकेत्यादिविशेषणेन। न च तादृशानुमितेरप्रसिद्धिः तत्कारणीभूतवह्निव्याप्याभाववान् पर्वतः वह्निव्याप्यवानिति ज्ञानस्यापेक्षिततया पर्वते वह्निव्याप्याभावावगाहितायास्तत्रासंभवादिति वाच्यम्। वह्निव्याप्याभाववान् पर्वतः वह्निमत्पर्वतवानित्याकारकानुमितेः संभवेन तत्र वह्निमत्पर्वतविषयिताया वृत्तेः।

End:

यदि च तादृशस्थले शुद्धगगनाभावस्यैव दोषत्वं स्वीकृत्य वह्न्यभाववज्जलादिमद्वृत्तिजलवद्वृदादेस्तादृशसत्प्रतिपक्षस्य च वारणाय ज्ञानस्य वैशिष्ट्यानवच्छिन्नत्वं प्रतिबन्धकतायां निवेश्यते, तदा तत्कल्पद्वयमपि साधु। अनुमितिनिष्ठजन्यतापदमनुमितित्वावच्छिन्नजन्यतापरम्। तेन वह्न्यभाववद्वृदात्मकबाधादौ विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यतामादाय तादृशानुमितिनिष्ठवह्न्यभावत्वविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्नविषयित्वावच्छिन्नत्वस्य प्रतिबन्धकतायां सत्त्वेनासंभवः।

Colophon:

इति शंकरभट्टाचार्यविरचितं बाधलक्षणक्रोडपत्रम्।

1484

70950(c) बाधलक्षणक्रोडपत्रम्

Beginning:

बाधग्रन्थे अत्रायं विचारः। न च पर्वतः वह्निव्याप्याभाववह्न्यभाव उभयवानित्यत्र पर्वतधर्मिकवह्निव्याप्यप्रकारकनिश्चयत्वावच्छिन्ना या बाधस्थलीयप्रतिबन्धकता तन्निरूपिता या पर्वतधर्मिकवह्निव्याप्याभावप्रकारकबुद्धित्वावच्छिन्ना प्रतिबध्यता तदवच्छेदको वह्निव्याप्याभावप्रकारतानिरूपितत्वेन रूपेण पर्वतो वह्निव्याप्याभाववद्वह्न्यभाव उभयवानिति ज्ञानीयविशेष्यता जाता। तादृशविशेष्यत्वावच्छिन्ना पर्वतधर्मिकवह्न्यभावप्रकारकबुद्धित्वावच्छिन्नप्रतिबध्यता जाता तन्निरूपिता वह्निव्याप्यप्रकारकपर्वतविशेष्यकनिश्चयत्वावच्छिन्ना प्रतिबन्धकता तदवच्छेदिका पर्वतो वह्निमानिति अनुमितिनिरूपिता विषयता। तदवच्छिन्नजन्यतानिरूपितजनकतावच्छेदिका या पर्वतो वह्निव्याप्यवानितिनिश्चयीयविषयता तदवच्छिन्नवह्नित्वस्य वह्निव्याप्यवत्पर्वतरूपबाधप्रतिबन्धकतायाः सत्त्वात् तादृशबाधेऽव्याप्तिरिति वाच्यम्।

Fo. No. 39a बाधग्रन्थे उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तविशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यावगाहिबोधीयविषयतान्तःपातिप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपिता सती स्वनिरूपितप्रतिबध्यतावच्छेदकविषयित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयकत्वानवच्छिन्ना या प्रतिबन्धकता तदवच्छेदकस्वनिरूपितविषयिताकत्वमिति लक्षणं परिष्कृतम्। अत्रेदं चिन्त्यते। एतल्लक्षणस्य ह्रदो वह्निमान् धूमादित्यादौ जलवान् वह्न्यभाववान् इति ज्ञानसहितस्य जलवान् ह्रद इति ज्ञानस्य ह्रदो वह्निमानित्यनुमितिप्रतिबन्धकतया निरुक्तविशेषणाक्रान्तानुमितिप्रतिबन्धकतावच्छेदकतायाः जलवद्ह्रदविषयतायां सत्त्वेन न तत्रातिप्रसङ्गः।

End:

न च वह्न्यभाववद्व्याप्याभाववद्व्याप्यवह्न्युभयवानित्यादौ वह्न्यभाववद्व्याप्यवद्ह्रदरूपसत्प्रतिपक्षेऽतिव्याप्तिरिति वाच्यम्। तादृशजनकतावच्छेदकविषयतायां तादृशप्रतिबध्यतावच्छेदकविषयित्वावच्छिन्नत्वविशेषणमपहाय विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यावगाहिबोधीयविषयतान्तःपातित्वनिरूपितयातादृशप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वं तादृशप्रकारित्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकविषयिताभिन्नत्वस्य निवेश्यत्वात्। न च विशेषणदानेऽपि भट्टाचार्योक्तविशेषणापेक्षया गौरवमिति वाच्यम्। वह्निव्याप्यवह्नि एतदन्यतराभाववान् पर्वत इत्यादौ तादृशान्यतरत्वेनान्यतराभाववत्ताबुद्धिं प्रति प्रत्येकरूपेण प्रत्येकवत्ताज्ञानस्यापि विरोधितया लक्ष्ये वह्निव्याप्यवत्पर्वतात्मकबाधे अव्याप्तिवारणाय सिद्धान्तेऽप्येतद्विशेषणस्यावश्यकत्वमिति चेन्न। सिद्धान्ते यत्किंचित्प्रतिबन्धकतामादाय लक्षणसमन्वयेन तादृशविशेषणदानस्यानुचितत्वादिति ध्येयम्।

1485

72756(c) विशेषपदार्थविचारः

Beginning:

परमाणुवृत्तिविशेषाद्विद्यत इति। अत्र गगनवृत्तिविशेषेतरभेदस्य साध्यत्वं न संभवति। तथा सति शब्दाद्यन्तर्भावेण प्रकृतहेतोर्व्यभिचारादिति भावः। स्वेतरवृत्तिधर्मानवच्छिन्नविशेष्यताकत्वविवक्षयेति। वस्तुतस्तु स्वेतराविशेष्यकत्वविवक्षयैवेत्येव युक्तः पाठः। स्वेतरवृत्तिधर्मानवच्छिन्नविशेष्यका चेति। एतेनाभ्यां विशेषणाभ्यामपि निरुक्तानुमितिविशेष्यतामादायासंभवस्तु न वार्यत इति सूचितम्। नन्वेवमपि एतद्विशेषः इतरभिन्नः एतत्परमाण्वनुयोगिकसमवायादित्यनुमितिमादायासंभवः तादृशानुमितिविषयभेदस्य स्वमात्रवृत्तेस्तथात्वात्। तथा चासंभवस्योभयोरपि तुल्यत्वेन कथं तद्विशेषणस्य वैयर्थ्यं ब्रूष इत्याशङ्कते—तत्तत्परमाणुनिष्ठो यो विशेष इति।

End:

घटः इतरेभ्यो भिद्यते इत्याद्यनुमितेः विशेषसमानाधिकरणेतरघटादिसाधारणघटत्वात्मकलिङ्गजन्यत्वात् यावद्विशेषसजातीयप्रतियोगिकभेदविषयकत्वाच्च न तादृशानुमित्यप्रसिद्धिर्निबन्धनासंभवः।

एतद्विशेषः विशेषान्तराद्भिन्नः जलपरमाणुवृत्तिविशेषाद्भिन्नः पृथिव्यनुयोगिकसमवायादित्यनुमितेः यावत्स्वेतरस्वसजातीयप्रतियोगिताकत्वाभावात्। एतद्विशेषः विशेषान्तरेभ्यो भिद्यते इत्यनुमितेस्तादृशत्वेऽपि तज्जनकलिङ्गस्य स्वसमानाधिकरणमात्रवृत्तिभिन्नत्वाभावेन न ते अनुमिती आदायाप्यसंभवः संभवतीति यद्यपि शक्यते वक्तुं तथापि स्वत्वस्याननुगतत्वेन स्वपदेन यत्किंचिद्विशेषधरणे तद्घटितलक्षणं विशेषान्तरे नास्तीत्यव्याप्तिर्दुर्वारैव। तदेतत्सर्वमभिप्रेत्योक्तमास्तां विस्तर इति।

1486

67861(c) व्याप्तिवादक्रोडपत्रम्

Beginning:

स्वप्रतियोगिभिन्नप्रतियोगित्वानधिकरणनिष्ठभेदप्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्वं साध्यतावच्छेदकव्याप्यम् इति निष्कर्षपक्षे वक्ष्यमाणग्रन्थासंगतिः। प्रतियोगिताकाभावनिवेशनेनैवोपपत्तेः। ॥ टि ॥ ननु साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताक एव साध्याभावे यावत्त्वमुपादीयताम्। किमुक्ताभाव इत्यत आह—अत एवेत्यपि कश्चित्। न संदर्भविरुद्धम्। ॥ टि ॥ घटत्वपटत्वाभ्यां प्रमेयसामान्याभावस्य साध्याभावरूपतया यावत्पदानुपादाने सर्वत्र व्यभिचारिण्यतिव्याप्तिसंभवेन साध्याभावमादाय क्वचिदतिव्याप्तिप्रदर्शनमयुक्तमित्यस्वरसः सूचितः।

End:

(गदाधरी) अत्र च ज्ञानवानात्ममहाकालान्यतरत्वादित्यादौ अतिव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धेन व्यापकत्वं तेनैव संबन्धेन प्रतियोगितासामानाधिकरण्यम्। ॥ प्र ॥ टि ॥ आत्मत्वप्रकारकप्रमाभावमादाय अतिव्याप्त्युद्धाराय महेति। ॥ द्वि ॥ टि ॥ द्रव्यत्वेन घटाभावमादायाव्याप्तेः साध्यतावच्छेदकसंबन्धेन व्यापकत्वं बोध्यम्। ॥ ग ॥ साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य प्रयोजनविरहेणानिवेशात्। तन्निवेशेऽपि ॥ टि ॥ प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थोत्थित्यर्थम् ॥ ग ॥ अस्तु वा व्यापकतावच्छेदकरूपांश एव भाववृत्तित्वविशेषणम् ॥ टि ॥ वह्निसाध्यके घटवृत्तिरूपध्वंसात्मका . . .

1487

PM1680(a) व्याप्तिवादक्रोडपत्रम्

Beginning:

असंभववारणार्थं साध्यवत्त्वावच्छिन्नप्रातियोगिताकान्योन्याभावस्य लक्षणघटकत्वे पञ्चमलक्षणेनाभेदापत्तिरतः प्रतियोग्यवृत्तित्वेनाभावो विशेषणीयः इति माथुरी। अत्रेदमवधेयम्। स्वप्रतियोगिवृत्तित्वस्य तादृशाभावविशेषणत्वे अन्योन्यपदवैयर्थ्यम्। साध्यवत्प्रतियोगिकात्यन्ताभावमादाय दोषस्य स्वप्रतियोग्यवृत्तित्वविशेषणेनैव वारणात्। अत्र केचित्। धर्मिभेदस्य धर्मात्यन्ताभावा-

नतिरिक्ततया साध्यवत्प्रतियोगिकान्योन्याभावस्यापि स्वनिष्ठात्यन्ताभावत्वनिरूपकसाध्यरूपप्रतियोगिवृत्तित्वेन स्वप्रतियोग्यवृत्तिताद्दशाभावाप्रसिद्ध्याव्याप्तिः स्यात्, अतस्तद्वारकस्यान्योन्याभावत्वनिरूपकीभूतप्रतियोग्यवृत्तित्वत्वोभयोरन्योन्यपदम्।

End:

सकलसाध्याभाववन्निष्ठाभाववन्निष्ठाभावप्रतियोगित्वमित्यत्र निरवच्छिन्नत्वनिरुक्तसाध्याभावाधिकरणतावन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकहेतुताघटकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वं व्याप्तिः इत्यत्र व्यापकतायां प्रतियोगिवैयधिकरण्यं निरवच्छिन्नत्वं वा न निवेशितं **मथुरानाथेन**। अत्रेदं बोध्यम्—वह्न्यभाववति कालिकादिसंबन्धेन धूमाभावाभावसत्त्वाद् वह्निमान् धूमादित्यादौ द्रव्यत्वाभाववति गुणादौ विशिष्टसत्ताभावाभावसत्त्वात् द्रव्यं विशिष्टसत्त्वाद् इत्यत्राव्याप्तिः। अतस्तद्वारणाय स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसंबन्धावच्छिन्ननिरुक्तसाध्याभावाधिकरणतानिरूपितवृत्तितावच्छेदकीभूतानुयोगितावदभावप्रतियोगितानवच्छेदकत्वं वाच्यम्। **जगदीशेन** तु एतद्दोषवारणार्थमेव प्रतियोगिवैयधिकरण्यं निवेशितमिति।

1488

67425(a) **व्युत्पत्तिवादक्रोडपत्रम्**

Beginning:

शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति व्युत्पत्तिवादे प्राथमिकः ग्रन्थः।

अत्रेदं चिन्त्यते। लोके तावत् ग्रन्थकर्तृभिः सर्वैः ग्रन्थारम्भावसरे परमतनिरसनपरः स्वमतव्यवस्थापनपरो वा ग्रन्थः प्रथमत आरभ्यते। ततः सर्वज्ञैः तार्किकशिरोमणिभिः **गदाधरभट्टाचार्यैः** प्रथमतः प्रणीयमानः शाब्दबोधे च एकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासत इति ग्रन्थोऽपि परमतनिरासपरः स्वमतव्यवस्थापनपरो वा नेयः। न चेतदुपपद्यते। तथाहि—तत्र शाब्दबोधे एकपदार्थेऽपरपदार्थस्य संसर्गः प्रकारतया भासत इति मीमांसकादिमतम्। तन्मतनिरासार्थमयं ग्रन्थः प्रक्रान्त इति चेत्। स्यादेवं यदि मीमांसकानां तथा मतम्। तदेव नं। तन्मतेऽपि संबन्धस्य संसर्गतयैव भानदर्शनात्।

End:

स्तोकमोदनस्य पाक इति वाक्यस्य क्रियात्वाभावे ओदनस्येति कर्मकारकषष्ठी न स्यादिति सूचनायौदनस्येति। ननु सुन्दरस्तोकमोदनस्य पाक इत्यादौ कथं द्वित्वादितात्पर्येण तत्र सुन्दरावित्याद्यापत्तिश्च। क्रियायां द्वितीयान्तनपुंसकभिन्नपदार्थान्तराभेदान्वयबोधे तत्तद्धातूत्तरप्रत्ययस्य किंचिदर्थपरत्वज्ञानं प्रतिबन्धकमित्युक्तौ तु न कश्चिद्दोषः। असाम्यादिति। न च तादृशस्वत्वसंबन्धेन राजविशिष्टपुरुषादितात्पर्यकससुन्दर इत्यादि स्थले शाब्दबोधानुसारेण भवन्मतेऽप्युक्तानुमितिद्वयस्य तं प्रति प्रतिबन्धकत्वमावश्यकम्।

1489

67425(b) **व्युत्पत्तिवादक्रोडपत्रम्**

Beginning:

ननु तद्धर्मावच्छिन्नपर्याप्तसंख्यानिष्ठव्यापकतानिरूपितव्याप्यतावच्छेदकसंख्यात्वव्याप्यधर्मवत्त्वं नाम न तावत् तादृशसंख्यासमानाधिकरणभेदप्रतियोगितावच्छेदकतावच्छेदकतादृशधर्मवत्त्वम्। एवं तद्धर्मावच्छिन्नपर्याप्तसंख्यानिष्ठव्याप्यतानिरूपितव्यापकतावच्छेदकसंख्यात्वव्याप्यधर्मवत्त्वमपि न पूर्वोक्तभेदप्रतियोगितावच्छेदकतानवच्छेदकतादृशधर्मवत्त्वम्। यत्र दशघटाः सन्ति पटाश्च पञ्च, तत्र एतान् घटानपेक्ष्य एते पटा न्यूनसंख्याका अधिकसंख्याका इति व्यवहारयोरनुपपत्त्यापत्त्योर्दुर्वारत्वात्।

End:

धर्मे तादृशपर्याप्त्यवच्छेदकधर्मवैशिष्ट्यं च, स्वसमानाधिकरणधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकावच्छिन्नपर्याप्त्यवच्छेदकत्वस्वाधिकरणस्वसमानाधिकरणधर्मानधिकरणमात्रवृत्तित्वोभयसंबन्धेन। तद्धर्मावच्छिन्नपर्याप्तसंख्यात्रिपादाधिकत्वं च—स्वाधिकरणस्वभिन्नस्वावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकधर्मावच्छिन्नपर्याप्त्यवच्छेदकधर्माधिकरणस्वविशिष्टधर्माधिकरणैतत्त्रितयमात्रवृत्तिधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकत्वसंबन्धेन तद्धर्मावच्छिन्नपर्याप्तसंख्यापर्याप्त्यवच्छेदकधर्मविशिष्टसंख्यात्वव्याप्यधर्मवत्त्वम्। धर्मे स्ववैशिष्ट्यं च—स्वाधिकरणस्वभिन्नस्वावच्छिन्नपर्याप्तिनिरूपकतावतावच्छेदकावच्छिन्नपर्याप्त्यवच्छेदकैतदुभयमात्रवृत्तित्वसंबन्धेन। तत्तद्घटकतत्तत्पदप्रयोजनं सुधीभिरवहितचित्तैरूहनीयम्। तदेतत् सर्वमभिप्रेत्य आह इत्यादिकं सुदूरतरमालोचनीयमिति दिक्।

1490

69673(d) **व्युत्पत्तिवादक्रोडपत्रम्**

Beginning:

संपन्नो व्रीहिरित्यादावेकवचनार्थैकत्वस्य स्वाश्रयप्रकृत्यर्थतावच्छेदकाश्रयत्वसंबन्धेन प्रकृत्यर्थव्रीह्यादावन्वय इत्युक्तं **भट्टाचार्येण**। अत्र समभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकत्वविशिष्टैकत्वस्यैव एकवचनार्थताया वक्ष्यमाणतया उक्तरूपेण स्वसजातीयव्रीहिनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यैव व्रीहिनिष्ठैकत्वे सत्त्वेन तदनवच्छेदकत्वबाधादुदाहृतवाक्यस्याप्रामाण्यं स्यात्। न च जात्येकत्वतात्पर्यकस्थले उक्तविशेषणविशिष्टमेकत्वं नार्थः, अपि तु शुद्धमेव इति शक्यं वक्तुम्, अर्थपदेन शक्यत्वविवक्षायां नानाशक्तिप्रसंगात्, बोध्यत्वविवक्षायामपि यत्तुमतोक्तरीत्या एकत्वत्वेनोपस्थितानां नानैकत्वानां साक्षात् व्रीहिष्वेवान्वयस्य वक्तुं शक्यत्वेन उक्तपरंपरासंबन्धेनान्वयाश्रयणवैयर्थ्यात् इति केचिदाक्षिपन्ति। तदसत्।

End:

अत एव समभिव्याहृतपदार्थनिष्ठविषयतानिरूपितसांसर्गिकविषयताश्रयत्वं संबन्धे निवेश्यम्। वह्निना सिञ्चतीत्यादौ सेककरणत्वस्याधेयतया वह्न्यन्वितत्वेन वह्न्याधेयस्य सेककरणत्वनिष्ठविषयतानिरूपितसांसर्गिकविषयताश्रयत्वान्न वह्निनेत्यस्य प्रामाण्यापत्तिरिति निरस्तम्। अत्र संयोगेन प्रमेयमस्तीत्यादौ भूतलसंयुक्तत्वस्य प्रमेयांशे स्वरूपसंबन्धेन भासमानतया भूतलसंयुक्तत्वनिष्ठविषयतानिरूपितसांसर्गिकविषयताश्रयत्वस्य स्वरूपसंबन्धे सत्त्वेन तन्निरूपितप्रतियोगित्वानुयोगित्वान्यतरस्य भूतलसंयुक्तत्वे सत्त्वेन प्रामाण्यानुपपत्तेः वह्निना सिञ्चतीत्यादावपि वह्निनेत्यंशस्याप्रामाण्यमशक्यवारणम्। वस्तुतो जलादिनिरूपितया आधेयतया वह्नेः सेककरणत्वे भानदशायां सेककरणत्वनिष्ठविषयतानिरूपितसांसर्गिकविषयताश्रय जलनिरूपिताधेयत्वीयप्रतियोगित्वानुयोगित्वान्यतरवत्त्वस्य वह्नौ बाधात्।

1491

71654(b) व्युत्पत्तिवादक्रोडपत्रम्

Beginning:

29-1-4 ननु दीधितिकृन्मतेऽपि आश्रयतासंबन्धावच्छिन्नप्रतियोगिताकज्ञानाभाववांश्चैत्रः सुन्दर इत्यादिविशिष्टवैशिष्ट्यबुद्धिं प्रति जानातीत्यादिशाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनमधिकम्। मणिकृन्मते तु न तथा तादृशशाब्दसामग्र्यां सत्यामाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकज्ञानाभावप्रकारकबुद्धेरेवानुदयादित्यत आह—शेषमिति। दर्शितेति। राजस्वत्वाभाववान् पुरुषः सुन्दर इत्यादाविवेति शेषः। अयमत्राशयः—दीधितिकृन्मते एतादृशप्रतिबध्यप्रतिबन्धकभावकल्पनाधिक्येऽपि निरूपितत्वसंबन्धावच्छिन्नप्रतियोगिताकज्ञानाभावविशिष्टाश्रयत्ववैशिष्ट्यबोधं प्रति जानातीत्यादि शाब्दसामग्र्याः मणिकृन्मते प्रतिबन्धकत्वम् अवश्यमधिकं कल्पनीयम्। दीधितिकृन्मते तु न तथा, ज्ञानप्रकारकनिरूपितत्वसंसर्गकाश्रयत्वविशेष्यकयोग्यताज्ञानघटितशाब्दसामग्र्यां सत्यां निरूपितत्वसंबन्धावच्छिन्नप्रतियोगिताकज्ञानाभावविशिष्टाश्रयत्वबुद्धेः बाधमुद्रयैव प्रतिबन्धेनानुदयात्।

110-2-1 End:

व्याप्यधर्मेति। अत्र चैत्रकर्तृकाध्ययनाधारत्वत्वावच्छिन्नावच्छेद्यत्वे विवक्षिते चत्वारिंशद्दिनपर्यन्तमध्ययनकर्तरि चैत्रे मासमधीत इति प्रत्ययानुपपत्तिः। चैत्रकर्तृकाध्ययनाधारतात्वावच्छिन्नन्यूनवृत्तितया त्रिंशत्त्वस्य स्वरूपसंबन्धरूपावच्छेदकत्वासंभवादतो व्याप्यधर्मेति। 118-1-6 स्वयमूहनीयमिति। अयमूहप्रकारः। स्वावध्यवृत्तित्वविशिष्टव्यापकतासंबन्धेन गमनरूपसमभिव्याहृतक्रियायामन्वयः; व्यापकत्वं च स्वाधिकरणदेशनिष्ठाभावप्रतियोगितानवच्छेदकतीर्थविशेषवत्त्वम्। स्वाधिकरणत्वं च स्वाधिकरणकाशीप्रतीचीत्वावच्छिन्नभेदवैशिष्ट्यदैशिकविशेषणतासंबन्धेन बोध्यमिति।

1492

72823(f) **व्युत्पत्तिवादक्रोडपत्रम्**

Beginning:

शाब्दबोधे चैकपदार्थ इत्यादेः एकपदार्थानुयोगिकापरपदार्थप्रतियोगिकसंसर्गः शाब्दबोध-निरूपितसंसर्गत्वाभिन्नविषयतावानेवेत्यर्थः। चो भिन्नक्रमस्योऽवधारणार्थः। न च ज्ञानमात्रे यथोक्त-संसर्गस्य संसर्गतारूपविषयतावत्त्वात् शाब्दबोध इत्यव्यावर्तकमिति वाच्यम्। यतो हि प्रकृतवाक्या-च्छाब्दबोधे पदानुपस्थितस्यार्थस्य भानवारणाय तद्विषयकशाब्दत्वावच्छिन्नं प्रति पदजन्यतद्विषय-कोपस्थितेः कारणत्वमावश्यकम्। तच्च शाब्दबोधे पदानुपस्थितस्यापि संसर्गस्य भानाद् व्यभिचारेणा-संभवग्रस्तम्।

End:

अथवा राज्ञः पुरुष इत्यादौ स्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकबोध एवासिद्धः। संसर्गत्व-स्यापदार्थत्वेन पदार्थस्य संसर्गत्वायोगात्। किं चात्र स्वत्वसंबन्धेन तथान्वयबोधस्वीकारे वृत्त्यनि-यामकसंबन्धस्याभावप्रतियोगितानवच्छेदकत्वात्। पुरुषो न राज्ञस्तथाबोधस्वीकारानौचित्यात्। वृत्त्यनियामकस्याभावप्रतियोगितावच्छेदकत्वेऽपि एतादृशज्ञानदशायां राजस्वत्वाभाववान् पुरुषः सुन्दर इत्याकारकविशिष्टवैशिष्ट्यबोधापत्तेः। न च स्वत्वसंसर्गकबोधोऽपि स्वीक्रियते, स्वत्वप्रकारक-बोधोऽपीति, कुतः तदापत्तिः। बाधाघटितसामग्रीसत्वेन विशेष्यताकच्छेदकप्रकारकनिर्णयाभावादेवा-पत्त्यभावादिति वाच्यम्। यस्य पुरुषस्य राज्ञः पुरुष इत्यादौ स्वत्वसंसर्गकबोध एव जातः तस्य तदापत्तेर्दुर्वारत्वात्। किं च पदे पदे वृत्त्यनियामकसंबन्धस्य . . .

1500

70212(a) **शब्दप्रामाण्यविचारः**

Beginning:

श्रीकण्ठस्तु मणिकृन्मतमुपन्यस्तवान् मणिकृतस्त्वित्यादिना इत्याहुरित्यन्तेन। तत्र च प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्। अत्र च प्रयोगो वाक्यम्। तद्धेतुभूतं यदर्थतत्त्वज्ञानं तज्जन्यशब्दत्वं प्रमाणशब्दत्वम्। वाक्यार्थभ्रममादाय वह्निना सिञ्चतीत्ययोग्यवाक्येऽतिव्याप्तिवारणाय तत्त्वपदम्। तथापि पदार्थतत्त्वज्ञानमादायायोग्येऽतिव्याप्तिवारणाय प्रयोगहेतुभूतेति। इत्थं चार्थपदस्य वाक्यार्थपर्यवसानात् न पदार्थतत्वज्ञानमादायातिव्याप्तिः। तथा हि—हेतुपदसमभिव्याहृतभूतपदस्य भू प्राप्ताविति धात्वनुसारादितरनैरपेक्ष्ये व्युत्पन्नतया सजातीयनैरपेक्ष्यस्यात्र विवक्षिततया यत् प्रयोग-प्रतिपाद्यं ज्ञानं प्रयोगे कर्तव्ये प्रयोगप्रतिपाद्यज्ञानान्तरं नापेक्षते तादृशार्थतत्त्वज्ञानजन्यत्वं लक्षणं लब्धम्।

End:

जन्यधीजन्यमात्रवृत्तिधर्मशून्यत्वमित्युक्तौ सविकल्पकत्वस्य तन्मात्रवृत्तित्वेनाव्याप्तिरिति जातिपदम्। सविकल्पकत्वं तु न जातिः चाक्षुषत्वादिना सांकर्यात्। जन्यधीजन्यवृत्तीत्युक्तावपि असंभवः ज्ञानत्वादेर्जन्यधीजन्यसविकल्पकवृत्तित्वाद्, अतो मात्रेति। जन्यधीजन्यभिन्नावृत्तित्वे सति जन्यधीजन्यवृत्तित्वं तन्मात्रवृत्तित्वम्। चाक्षुषत्वादिजातेरपि धीजन्यमात्रवृत्तित्वादसंभवः, अतः प्रथमं जन्यपदम्। तस्य जन्यज्ञानाजन्यनिर्विकल्पकवृत्तित्वान्न तन्मात्रवृत्तित्वमिति प्रत्यपादि श्रीकण्ठेन। अत्रोच्यते....

1502

66238 **सत्प्रतिपक्षक्रोडपत्रम्**

Beginning:

प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिग्रहप्रतिबन्धकतावच्छेदिका सती प्रकृतपक्षसाध्यग्रहाविरोधिप्रकृतपक्षे प्रकृतसाध्यग्रहविरोध्युन्नायकतावच्छेदिका यादृशविशिष्टविषयिता तादृशविशिष्टत्वं सत्प्रतिपक्षत्वमिति। अत्र सत्यन्तदले तादृशग्रहत्वनिष्ठावच्छेदकताकप्रतिबध्यतानिवेशो ग्रहत्वस्य तादृशवैशिष्ट्यावगाहिग्रहत्वानतिरिक्ततया प्रतिबध्यतामात्रस्यैव ग्रहत्वावच्छिन्नतया तादृशवैशिष्ट्यावगाहिग्रहत्वावच्छिन्नत्वात् तादृशविशेषणस्याव्यावर्तकतापत्तेरित्यतः तादृशवैशिष्ट्यावगाहिताविशिष्टग्रहत्वघटकसमुदायवृत्त्यवच्छेदकताकप्रतिबध्यता निवेशनीयेत्याशयेन काञ्चनमयह्रदो वह्निमान् ह्रदः काञ्चनमयवह्निमान् इत्यादौ वह्न्यभावव्याप्यवद्ध्रदात्मकसत्प्रतिपक्षे स्वरूपसंबन्धरूपावच्छेदकत्वमाशङ्क्याव्याप्तिर्दत्ता। तत्प्रतिबध्यतावच्छेदकत्वस्य तादृशवैशिष्ट्यावगाहिताघटककाञ्चनमयत्वादिविषयतायामभावात्।

End:

वह्न्यभाववद्ध्रदत्वावच्छिन्नविशेष्यकत्वावच्छिन्नप्रतिबन्धकतायाःसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदकके जलवद्ध्रदत्वधर्मितावच्छेदककानुमितित्वव्यापकतया तस्याश्च विशिष्टसाध्यग्रहत्वव्यापकत्वादिति वाच्यम्। अनुमितौ अवच्छेदकतासंबन्धेन हेतुमत्तानिश्चयत्वव्यापकत्वनिवेशेन व्यापकताघटकसंबन्धरूपधर्मितावच्छेदकतायाः विशिष्टसाध्यघटकधर्मव्यावृत्तरूपस्य निवेशनीयतया उक्तासाधारण्यविषयकत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रतिबध्यतामादाय लक्षणसमन्वयादिति ध्येयम्।

Colophon:

इति श्रीशंकरभट्टाचार्यविरचितगदाधरीयसत्प्रतिपक्षलक्षणक्रोडः समाप्तः।

1505

PM1554 **सत्प्रतिपक्षक्रोडपत्रम्**

Beginning:

प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति विशिष्टपक्षसाध्यग्रहाविरोधि प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपोन्नायकत्वमिति **दीधितिः**। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्य-

तावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती विशिष्टपक्षसाध्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकनिरुक्तपक्षसाध्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यादृशविशिष्टनिरूपितविषयता तादृशत्वमिति **गादाधरी**। अत्र सत्यन्तदले प्रकृतपक्षकत्वमनिवेश्य किंचिद्धर्मावच्छिन्नपक्षकत्वनिवेशे ह्रदो वह्निमानित्यादौ किंचिद्धर्मपदेन वह्न्यभाववद्वह्न्यभावव्याप्यव्याप्यवत्कालीनह्रदत्वमादाय वह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपसत्प्रतिपक्षोद्धायके अतिव्याप्तिः। अतस्तन्निवेशः। उन्नेयदले प्रकृतपक्षकत्वमनिवेश्य किंचिद्धर्मावच्छिन्नपक्षकत्वनिवेशे पर्वतो वह्निव्याप्याभाववानित्यादौ किंचिद्धर्मपदेन वह्निव्याप्यवद्वह्निमत्कालीनपर्वतत्वमादाय वह्निव्याप्यवत्पर्वतरूपबाधे अतिव्याप्तिरतस्तन्निवेशः।

End:

विरोध्यनुमितिजनकतानवच्छेदकत्वमित्यनेन प्रकृतानुमितित्वव्यापकप्रतिबध्यताविशिष्टविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतानवच्छेदकत्वस्यैव विवक्षितत्वात्। वैशिष्ट्यं च स्वनिरूपितप्रतिबन्धकतावच्छेदकत्वस्वावच्छेदकावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वोभयसंबन्धेन। एवं च वह्न्यभावव्याप्यवद्ह्रदविषयता न निरुक्तोभयसंबन्धेन प्रतिबध्यताविशिष्टा; तस्यां स्वनिरूपितप्रतिबन्धकतावच्छेदकत्वसत्वेऽपि स्वावच्छेदकावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वाभावात्। किं तु वह्न्यभाववद्ह्रदविषयतैव तादृशीति तदवच्छिन्नजन्यतानिरूपितजनकतानवच्छेदकत्वस्य उक्तविशिष्टद्वयविषयतायां सत्त्वेन अतिव्याप्तेर्वारणासंभवादिति ध्येयम्।

1506

PM1739 सत्प्रतिपक्षक्रोडपत्रम्

Beginning:

साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यकलिङ्गत्वमिति यथाश्रुतमूलोपरि पर्वतो वह्निव्याप्याभाववानित्यादौ वह्निव्याप्यवान् वह्निमानिति समूहालम्बनोपस्थितिमादाय पर्वतो वह्निव्याप्यवानिति बाधनिश्चयकाले प्रकृतपरामर्शकाले हेतोः सत्प्रतिपक्षितत्वव्यवहारापत्तिवारणार्थं समर्थान्तेन साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकताश्रयत्वपर्यन्तं विवक्षितं **भट्टाचार्येण**। ननु अत्रेयमाशङ्का। वह्निव्याप्यवद्वह्निमत्कालीनपर्वतो वह्निव्याप्याभाववानित्यादौ बाधनिश्चयकाले प्रकृतहेतुपरामर्शकाले हेतोः सत्प्रतिपक्षितत्वव्यवहारापत्तिर्दुर्वारैव। तादृशपर्वतो वह्निव्याप्याभाववानिति बुद्धिं प्रति वह्निमान् वह्निव्याप्यवान् वह्निमांश्च तादृशपर्वत इति ज्ञानस्य अवच्छेदकधर्मदर्शनविधया प्रतिबन्धकत्वेन वह्निमत्पर्वतत्वावच्छिन्नविषयतायां साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वसत्त्वादिति।

End:

न च तथापि ह्रदो वह्निव्याप्याभाववह्न्यभावोभयवानित्यादौ वह्निव्याप्यवानिति बाधनिश्चयकाले प्रकृतहेतुपरामर्शकाले हेतोः सत्प्रतिपक्षत्वापत्तिः; वह्निमत्पर्वतत्वावच्छिन्नविषयतायाः

तथात्वादिति वाच्यम्। इष्टत्वात्। अत एव बाधग्रन्थे अत्र स्थल इव अनुमितेर्वह्निव्याप्यामाव-विषयकत्वेन वह्निव्याप्यवत्त्वस्य बाधार्हत्वं भट्टाचार्यो वक्ष्यति इति तुल्ययुक्त्या अनुमितेर्वह्न्यभाव-विषयकत्वेन वह्निव्याप्यवत्त्वस्य सत्प्रतिपक्षत्वस्यापि वक्तुं शक्यत्वादिति ध्येयम्।

1507

PM1740 **सत्प्रतिपक्षक्रोडपत्रम्**

Beginning:

. . . कत्वस्वावच्छेदकतावच्छेदकसंसर्गघटकत्वान्यतरसंबन्धेनेव प्रतिबन्धकतायां जनकता-वच्छेदकविषयतात्वव्यापकत्वविवक्षणात् नोक्तोभयविधसत्प्रतिपक्षे अव्याप्तिः; न वा उक्तोभयवद्भेदे अतिव्याप्तिरिति वाच्यम्। एवं च सति जलव्यापकवह्न्यभावसमानकालीनजलवह्न्यभावव्याप्यव्याप्यो-भयवद्भेदे अतिव्याप्तेर्दुर्वारत्वात्। जलव्यापको वह्न्यभावः, जलवान् ह्रदः, वह्न्यभावव्याप्यव्याप्य-व्यापको वह्न्यभावः वह्न्यभावव्याप्यव्याप्यवांश्च ह्रद इति उभयोरेकरूपेण प्रतिबन्धकत्वाङ्गीकारात्, निरुक्तज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायाः स्वावच्छेदकतावच्छेदकसंबन्धघटकत्वसंबन्धेन जनक-तावच्छेदिकायाः प्रत्येकज्ञानीयविषयतायामपि सत्त्वेन निरुक्तान्यतरसंबन्धेन निरुक्तविषयतात्वव्यापक-प्रतिबन्धकताया निरुक्तोभयवद्भेदविषयताव्यापकत्वात्।

End:

एवं च निरुक्तपरिष्कारस्य निर्दोषतया निरुक्तातिव्याप्तिर्निरस्यैवेति वाच्यम्। न च तादृशप्रकारकत्वावच्छिन्नाभावस्यैव पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वपदेन विवक्षणीयतया वह्निजला-भावोभयसाध्यकस्थले केवलजलाभावत्वावच्छिन्नप्रकारतात्वाद्यधिकरणतादृशप्रकारताकत्वत्वावच्छिन्ना-भावाधिकरणतायाः केवलवह्न्यभाववद्भेदत्वावच्छिन्नविषयताप्रयोज्यत्वाभावात् तत्स्थलीयतादृशसत्प्र-तिपक्षे अव्याप्त्या निरुक्तपरिष्कारो न संभवत्येवेति अतिव्याप्तिर्दुर्वारैवेति वाच्यम्। तादृशप्रकार-ताकत्वनिष्ठप्रतियोगिताकाभावस्यैव अवगाहित्वाभावान्तेन विवक्षणात् निरुक्तसामान्याभावविवक्षणेन उक्ताव्याप्त्यप्रसक्त्या उक्तपरिष्कारेणैव उक्तातिव्याप्तेर्वारणीयत्वादित्यलं वाग्जालेन।

Colophon:

इति **सत्प्रतिपक्षविभाजक**लक्षणोपरि विचारः।

1508

69878(a) **सत्प्रतिपक्षक्रोडपत्रम्**

Beginning:

सत्प्रतिपक्षलक्षणे सत्यन्तदले तादृशग्रहत्वनिष्ठावच्छेदकताकप्रतिबध्यतानिवेशो तादृशग्रहत्वस्य शुद्धानतिरिक्ततया प्रतिबध्यतामात्रस्यैव तथात्वेन सत्प्रतिपक्षोन्नायकेऽतिव्याप्तेः। अतस्तादृशवैशिष्ट्या-

वगाहितावच्छिन्नग्रहत्वघटकसमुदायवृत्त्यवच्छेदकता निवेशनीयेत्याशयेन काञ्चनमयो ह्रदो वह्निमानित्यादिस्थले सत्प्रतिपक्षाव्याप्तिर्दत्ता। तादृशप्रतिबध्यतावच्छेदकतायाः तादृशसमुदायघटककाञ्चनमयत्वादिविषयितायाममावाद् इति शांकरी। इदं चानुपपन्नम्। तादृशसमुदायवृत्त्यवच्छेदकताकत्वस्य तादृशप्रतिबध्यतायां सत्त्वात् तादृशसत्प्रतिपक्षाव्याप्त्यसंभवात्। तादृशसमुदायपर्याप्तावच्छेदकताकत्वस्य प्रतिबध्यतायां निवेशे पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतात्वावच्छिन्नप्रतियोगिताकभेदप्रतियोगितावच्छेदकविषयतात्वव्यापकतावच्छेदकताकत्वरूपतया तादृशावच्छेदकत्वस्य ह्रदो वह्निमानित्यादौ तादृशप्रतिबध्यतायां संभवेऽपि नीलह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यवद्भ्रदे अव्याप्तिसंभवात् तदकथनेन ग्रन्थकर्तुः न्यूनतापादकत्वात्।

End:

प्रकारतावैशिष्ट्यं—स्वावच्छेदकधर्मावच्छिन्नत्वस्वावच्छेदकसंबन्धावच्छिन्नत्वोभयसंबन्धेन। स्वविशिष्टत्वान्यतरेत्यत्र स्ववैशिष्ट्यं—स्ववृत्त्यधिकरणताविशिष्टप्रकारतानिरूपितत्वसंबन्धेन। अधिकरणतावैशिष्ट्यं—स्वाश्रयविधेयतानिरूपितोद्देश्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्व स्वनिरूपकप्रकारतावच्छेदकसंबन्धावच्छिन्नत्व स्वविशिष्टवृत्तित्वत्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितत्व त्रितयसंबन्धेन। वृत्तित्वप्रकारतायां स्ववैशिष्ट्यं—स्वाश्रयविधेयताविशिष्टप्रकारतानिरूपिताभावत्वावच्छिन्नस्वप्रतियोग्यनधिकरणत्वसंबन्धानवच्छिन्नप्रकारतानिरूपितनिरूपितत्वसंबन्धावच्छिन्नप्रकारतानिरूपितत्वस्वनिरूपकप्रकारतावच्छेदकसंबन्धावच्छिन्नत्वप्रकारतानिरूपितत्व उभयसंबन्धेन। विधेयतावैशिष्ट्यं—स्वावच्छेदकसंबन्धावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नत्वस्वावच्छेदकावच्छिन्नत्वोभयसंबन्धेन।

1509

69896(c) सत्प्रतिपक्षक्रोडपत्रम्

Beginning:

प्रकृतानुमितिप्रतिबन्धकत्वजनकत्वोभयं यद्रूपावच्छिन्नविषयतानिरूपकत्वव्यापकं तद्रूपावच्छिन्नत्वं सत्प्रतिपक्षत्वम्। अथ वह्न्यभाववद्ह्रदभावव्याप्यव्याप्यवत्कालीनह्रदपक्षकवह्निसाध्यकस्थले वह्न्यभावव्याप्यव्याप्यवत्तादृशह्रदेऽतिव्याप्तिरिति चेन्न ॥ 1 ॥

उन्नेयविषयतायां प्रकृतानुमितिप्रतिबध्यतावच्छेदकत्वस्यापि निवेशेनानुपपत्त्यभावात्, इदानीं प्रतिबन्धकतावच्छेदकत्वानुपादाने जलाभाववद्वह्निमत्कालीनह्रदपक्षकवह्निसाध्यकस्थले जलव्याप्यवत्तादृशह्रदेऽतिव्याप्तिः। सत्यन्तदलानुपादाने जलाभाववद्वह्निमत्कालीनवह्न्यभाववज्जलवत्कालीनह्रदपक्षकवह्निसाध्यकस्थले जलव्याप्यवत्तादृशह्रदेऽतिव्याप्तिः ॥ 2 ॥

न च प्रकृतानुमितित्वव्यापकप्रतिबध्यतावच्छेदकत्वनिवेशेऽपि वह्न्यभाववद्ह्रदभावव्याप्यव्याप्यवत्कालीनवह्न्यभावव्याप्याभाववद्वह्निमत्कालीनह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावव्याप्यव्याप्यवत्तादृशह्रदेऽतिव्याप्तिरिति वाच्यम् ॥ 3 ॥

Fo. 22a वृत्तित्वं च स्वावच्छेदकविषयतावत्व स्वावच्छेदकतावच्छेदकविषयतावत्त्व एतदन्यतरसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंबन्धेन ॥ 22 ॥ न चैवमपि ह्रदः सुन्दरवह्निमद्वह्निमत्कालीनजलसुन्दरवह्न्युभयवानित्यत्र सुन्दरवह्न्यभावव्याप्यजलवद्ध्रदरूपसत्प्रतिपक्षेऽव्याप्तिरिति वाच्यम् ॥ 23 ॥ साध्यतावच्छेदकावच्छिन्नविषयताशाल्यनुमितिवृत्तित्वघटितत्रितयाभावस्य प्रकृतानुमितित्वव्यापकप्रतिबन्धकतायां निवेशेन दोषाभावात् ॥ 24 ॥

End:

गगनाभाववत्कालीनगगनाभाववत्तादृशगगनाभावव्याप्यव्याप्यवत्कालीनघटः तादृशगगनवानित्यत्र सत्प्रतिपक्षोद्धायके, घटः अभावविशिष्टव्यापकसामान्यत्वाभावकालीनसामान्यत्ववानित्यत्र अभावविशिष्टव्यापकसामन्यत्वाभावकालीन सामान्यत्वाभावाभाववन्निरूपितसमवायसंबन्धावच्छिन्नाधेयत्वीयस्वरूपसंबन्धावाच्छिन्नाधेयतात्वावच्छिन्नप्रतियोगिताकाभावविशिष्टाभाववन्निरूपितनिरुक्तसंबन्धावच्छिन्नाधेयतात्वावच्छिन्नाभावविशिष्टवद्घटे सत्प्रतिपक्षोद्धायके चातिव्याप्तिर्बोध्या । एवमुन्नेयविषयितायां जनकतानवच्छेदकत्वनिवेशे वह्न्यभाववज्जलव्यापकवह्न्यभावकालीनजलव्याप्यवत्कालीनजलव्यापकवह्न्यभावकालीनजलाभाववद्वह्निमत्कालीनह्रदपक्षकवह्निसाध्यकस्थले जलव्यापकवह्न्यभावकालीनजलव्याप्यवत्तादृशह्रदेऽतिव्याप्तिर्बोध्या ।

1510

70950(d) सत्प्रतिपक्षक्रोडपत्रम्

Beginning:

साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यकलिङ्गकत्वमिति मूले वह्निव्याप्याभावादिसाध्यकवह्न्यनुमितिजननयोग्यया वह्निव्याप्यवत्पक्षोपस्थित्या बाधनिश्चयरूपया कार्यप्रतिरोधदशायामतिव्याप्तिवारणाय साध्यविरोधित्वं प्रथमोपस्थितिविशेषणम् । वह्निव्याप्यवत्पक्षोपस्थितेरपि साध्यवत्ताज्ञानप्रतिबन्धिकां वह्निव्याप्यवत्पक्षविषयकसमूहालम्बनरूपवह्निमत्पक्षविषयकानुमितिं प्रति स्वरूपयोग्यतया यथाश्रुतेऽतिप्रसंगस्य दुर्वारतया साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठकार्यतानिरूपितकारणताश्रयत्वपर्यन्तं **भट्टाचार्येणोक्तम्** । अथ वह्निव्याप्याभाववद्वह्निमत्कालीनपर्वतो वह्निव्याप्याभाववानित्यत्र व्यापकधर्मदर्शनविधया साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदिका या तादृशपर्वतत्वावच्छिन्नविषयितानिरूपितवह्नित्वावच्छिन्नप्रकारिता तदवच्छिन्नानुमितिनिष्ठकार्यतानिरूपितकारणताश्रयीभूतं यत्तादृशपर्वतो वह्निव्याप्यवानिति ज्ञानं, तद्दशायामतिव्याप्तिः, उक्तसाध्यवत्ताज्ञानं प्रति तादृशपर्वतधर्मिकवह्निमत्ताज्ञानत्वेनैव प्रतिबन्धकतया ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशेऽपि अप्रतीकारात् ।

End:

अव्यापकीभूतविषयताशून्यानुमितिनिष्ठप्रतिबध्यतानिवेशेनैव सामञ्जस्ये किमनुमितित्वव्यापकत्वनिवेशेनेति । अत्रेदं समाधानम्—वह्न्यभावव्याप्याभावकालीनह्रदो वह्निमानित्यादौ तादृशह्रदो

वह्निमान् वह्न्यभावव्याप्याभाववानिति त्वव्यापकीभूतविषयिताशून्यानुमितिनिष्ठैकरूपावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वतादृशप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषयतात्वावच्छिन्नानुमितिजनकतावच्छेदकत्वस्य वह्न्यभावव्याप्यव्याप्यवद्भूदत्वावच्छिन्नविषयतायां सत्त्वात् सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः।

1512

PM1551 सव्यभिचारक्रोडपत्रम्

Beginning:

स्वधर्मितावच्छेदकहेतुमत्ताज्ञानकालीनयादृशविशिष्टविषयकनिश्चयसामान्यं स्वसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबन्धकं तादृशत्वं सव्यभिचारत्वं, हेतुमत्ताज्ञानसमानकालीनव्यभिचारनिश्चयस्य तथाविधनिश्चयसामान्यान्तर्गतस्वसमानकालीनहेतुमत्ताज्ञाने प्रसिद्ध्या असंभवादिति प्रथमं कालीनान्तं निश्चयविशेषणमिति **भट्टाचार्येणोक्तम्**। अथ इदं न संगच्छते, वह्निसाध्यकाधेयत्वहेतुकस्थलीयवह्न्यभाववद्वृत्त्याधेयत्वात्मकव्यभिचारनिश्चयसामान्यस्य संयोगेन वह्न्यादिसाध्यकप्रतियोगितासंबन्धेन वह्न्यादिहेतुकस्थले प्रतियोगितासंबन्धेन वह्निनिष्ठाभाववद्वृत्तिवह्निरूपव्यभिचारनिश्चयसामान्यस्य च स्वात्मकस्याधेयत्वावच्छिन्नविशेषणतापन्नस्याभाववद्वृत्तित्वात्मकहेतुमत्तानिश्चयस्य अभाववत्त्वावच्छिन्नविशेषणतापन्नवह्निरूपहेतुमत्तानिश्चयस्य च समानकालीनस्य प्रसिद्ध्या तत्र लक्षणसमन्वयसंभवेनासंभवाभावात्।

End:

उक्तशङ्कायां शङ्काप्रवृत्त्योर्विरोधज्ञानं प्रतिबन्धकमित्येव व्याघातेनेत्यादिनोक्तिरित्यभिमानिनां मतमुपन्यस्यति—एतेनेति। अत्राप्यनवस्थेति। शङ्कानिवृत्त्यर्थं तन्निश्चयापेक्षायामप्यनवस्थेत्यर्थः। नियमघटितविरोधिनिश्चयार्थमपि तद्विरोधिशङ्कानिवर्तकतर्कापेक्षणादिति भावः। स्वक्रिया एवेति। वादप्रवृत्तेरेव वादिनः शङ्कायां प्रतिबन्धकत्वेन अभिधानविरोधग्रहस्येत्यर्थः। एतदेव मतमुपन्यस्यति—**मिश्रास्त्विति**।

1514

PM1741 सव्यभिचारसामान्यनिरुक्तिक्रोडपत्रम्

Beginning is same as in MT 3655(b).

End:

एवं च ह्रदो वह्निमद्भूदकालीनघटवान् जलवद्धूदकालीनजलादित्यादिस्थलीयानुमितिनिष्ठप्रतिबध्यतायां साध्यतावच्छेदकविशिष्टसाध्यग्रहत्वव्यापकत्वस्यैव सत्त्वेन उक्तविशिष्टे नातिव्याप्तिः।

ह्रदो वह्निमद्ह्रदकालीनवह्निमान् जलवद्ह्रदकालीनजलादित्यादौ वह्निव्यापकीभूताभावप्रतियोगिजल-रूपासाधारण्ये लक्षणसमन्वयो निष्प्रत्यूह एव, घटो जलवद्ह्रदकालीनजलवानिति निश्चयकालीनवह्नि-व्यापकीभूताभावप्रतियोगि जलमिति निश्चयस्यापि सामान्यान्तर्गतत्वात्। न च ह्रदो जलवद्ह्रदकालीन-जलवानिति निश्चयकलीनासाधारण्यविषयकनिश्चयस्यापि सामान्यान्तर्गततया स्वसमानकालीनहेतु-मत्तानिश्चयधर्मितावच्छेदकीभूतह्रदत्वावच्छिन्नधर्मिकताद्दशसाध्यानुमितिप्रतिबध्यतायां साध्यतावच्छेद-कविशिष्टसाध्यग्रहत्वव्यापकत्वस्यैव सत्वादव्याप्तिरिति वाच्यम्। साध्यतावच्छेदकविशिष्टसाध्यग्रहनि-ष्ठभेदप्रतियोगितानवच्छेदको यो धर्मः तद्धर्मावच्छिन्नविशेष्यकहेतुतावच्छेदकावच्छिन्नप्रकारकान्यत्व-स्यैव वा सधर्मितावच्छेदककहेतुमत्तानिश्चये विशेषणीयत्वात्। भेदप्रतियोगितावच्छेदकता च— स्वावच्छिन्नविशेष्यताकत्वसंबन्धावच्छिन्ना ग्राह्या। एवं च ह्रदो जलवद्ह्रदकालीनजलवानिति निश्चये प्रकृतसाध्यग्रहनिष्ठभेदप्रतियोगितानिरूपितस्वावच्छिन्नविशेष्यकत्वावच्छिन्नावच्छेदकत्वाभावविशिष्टह्र-दत्वावच्छिन्नविशेष्यकहेतुप्रकारकत्वसत्त्वेन न तादृशज्ञानकालीनासाधारण्यमादाय अव्याप्तिरिति ध्येयम्।

1515

69332 सव्यभिचारसामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

अथ विरोधवारकसामानाधिकरण्यग्रहाविरोधिदलेन साध्याभाववत्तांशे निर्धर्मितावच्छेदककसा-मानाधिकरण्यग्रहाप्रतिबन्धकतया तादृशबाधवारणसंभवेऽपि साध्यवत्तांशेऽधिकरणत्वधर्मितावच्छेदक-कसामानाधिकरण्यग्रहाविरोधित्वनिवेशे अतिव्याप्तिवारणसंभवे कृतमनतिरिक्तविशेषणेन। न च यत्र गगनं साध्यं अधिकरणत्वं हेतुः तत्र गगनाभाववदधिकरणात्मकव्यभिचारे अतिव्याप्तिभिया अधि-करणत्वस्य धर्मितावच्छेदकत्वनिवेशासंभवादिति वाच्यम्। अधिकरणत्वसामानाधिकरण्येन गगनाभावस्यैव व्यभिचारत्वात् अधिकरणत्वसामानाधिकरण्येन साध्यसामानाधिकरण्यग्रहाविरोधितया तादृशसामानाधिकरण्यग्रहसामान्याविरोधित्वात्। द्रव्यमभाववद्वृत्ति सत्त्वादित्यादौ द्रव्यत्वाभाववद्वृत्ति-सत्तात्मकव्यभिचारेऽतिव्याप्तिवारणाय साध्यसामानाधिकरण्यग्रहत्वव्यापकत्वस्य प्रतिबन्धकतायामवश्यं निवेशनीयतया व्याप्तिग्रहत्वावच्छिन्नप्रतिबन्धकतामादाय तत्र लक्षणसमन्वयसंभवाच्चेति चेन्न।

End:

एवं च बाधनिश्चयोत्तरमपि लौकिकसंनिकर्षाधीनसंशयापत्तेः विपरीतकोटिभानसंभवात्। अथ उक्तप्रतिबन्धकताकल्पने लौकिकसंनिकर्षजन्यसंशयः क्वापि न स्यादिति चेन्न। भवत्येव लौकिक-संनिकर्षात् संशयः। संशयपूर्वकाले कोट्युपस्थितेरावश्यकत्वात्। तादृशज्ञानप्रत्यासत्तिबलात् सर्वकोट्यंशे उपनीतभानात्मकस्यैव संशयस्योपगमात्। अथ संशयपूर्वकोटिभासकलौकिकसंनिकर्षादिमत्त्वे कथं लौकिकतज्ज्ञानानुदयः। कथं वा विपरीतकोटिभानमुक्तप्रतिबन्धकसत्त्वादिति चेन्न। तदानीं लौकिक-संनिकर्षसत्त्वेऽपि संशयजनकदूरत्वादिरूप

1517

69886(b) सव्यभिचारसामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

अनुगमस्तु यादृशविशिष्टविषयकनिश्चयत्वव्यापकं प्रकृतानुमितिविशिष्टान्यत्वं तादृशविशिष्टत्वम्। वैशिष्ट्यं तु स्वाप्रतिबन्धकत्वस्वीयसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयकालीनत्वैतदुभयसंबन्धेन । तथा च ह्रदो वह्निमान् जलादित्यत्र वह्निव्यापकीभूताभावप्रतियोगिजलत्वावच्छिन्नविषयकनिश्चयरूपासाधारण्यविषयकनिश्चयस्य स्वधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनस्य स्वाप्रतिबन्धकत्वसंबन्धेन ह्रदो वह्निमानिति अनुमितिविशिष्टत्वेऽपि स्वीयसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकीभूतह्रदत्वावच्छिन्नविशेष्यकजलप्रकारकनिश्चयकालीनत्वसंबन्धेन तादृशानुमितिविशिष्टत्वाभावान्निरुक्तोभयसंबन्धेनानुमितिविशिष्टान्यत्वमक्षतमेव ।

End:

तथा हि यादृशसामान्यधर्मघटितविशेषधर्मावच्छिन्नाभाववत्तानिश्चयस्य यत्र प्रतिबन्धकत्वं तत्र तादृशसामान्यधर्मावच्छिन्नाभाववत्तानिश्चयस्य **भट्टाचार्यैर्व्यवस्थापितत्वात्**। प्रकृते वृत्तिमदत्यन्ताभावप्रतियोगितात्वरूपसामान्यधर्मघटित . . . अधिकरणवृत्त्यत्यन्ताभावप्रतियोगितात्वरूपसामान्यधर्मावच्छिन्नाभाववत्तानिश्चयस्य घट आकाशवान् पट आकाशवान् इत्यत्र प्रतिबन्धकतया तत्र तादृशसामान्यधर्मावच्छिन्नाभाववत्तानिश्चयस्य प्रतिबन्धकत्वादिति चेन्न। भवन्मतेऽपि घटः पृथिवीभिन्नो घटत्वादित्यत्र व्यभिचारेऽव्याप्तेर्दुर्वारत्वात्। तथाहि—धर्मितावच्छेदककहेतुमत्तानिश्चयः पृथिवी घटत्ववतीति निश्चयः। तत्समानकालीन यद्रूपावच्छिन्नविषयताशालिनिश्चयोऽपि सामान्यान्तर्गतः स्वसमानकालीन हेतुमत्तानिश्चयविशेष्यतावच्छेदकावच्छिन्नविशेष्यकसाध्यप्रकारकसाध्यव्याप्यहेतुविशेष्यकानुमितेरप्रसिद्धत्वात्।

1518

PM1742 साधारणग्रन्थक्रोडपत्रम्

Beginning:

यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकत्वं, तादृशज्ञानान्तरसहिततादृशविशिष्टविषयकज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविशिष्टपर्याप्तविषयतावैरहवत्त्वे सति यद्रूपावच्छिन्नविषयता सामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नत्वं मिश्रमते सामान्यलक्षणमिति साधारणग्रन्थे **भट्टाचार्यैः** परिष्कृतम्। नन्वत्र तादृशविशिष्टविषयकज्ञानानधिकरणक्षण इत्यनेन किं विवक्षितम्। तादृशविशिष्टविषयकज्ञानाधिकरणनिष्ठप्रतियोगिकभेदवत्त्वं, उत तादृशविशिष्टविषयकज्ञानाधिकरणत्वावच्छिन्नप्रतियोगिकभेदवत्त्वम्; आहोस्वित् तादृशविशिष्टविषयक-

ज्ञानाधिकरणत्वभेदकूटत्वं वा। नाद्यः। ह्रदो धूमवान् वह्नेरित्यादौ धूमाभाववदयोगोलकं, अयोगोलकवृत्तिर्वह्निरिति ज्ञानद्वयकाले अयोगोलकवृत्तिवह्नेः साधारण्यानुपपत्तिः।

End:

अस्यायमनुगमः—प्रतिबन्धकताविशिष्टत्वम्। वैशिष्ट्यं च आधेयत्वस्वविशिष्टविषयतानिरूपकतावच्छेदकत्वसंबन्धावच्छिन्नस्वनिष्ठप्रतियोगिताकात्यन्ताभाववत्त्वोभयसंबन्धेन। विषयतायां स्ववैशिष्ट्यं च स्वनिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकताधिकरणताविशिष्टत्वसंबन्धेन। तद्वैशिष्ट्यं च स्वाश्रयविषयतानिरूपकतावच्छेदकधर्मावच्छिन्नत्वस्वविशिष्टक्षणवृत्तित्वोभयसंबन्धेन। क्षणे स्ववैशिष्ट्यं च स्वविशिष्टप्रतिबन्धकताविशिष्टत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंबन्धेन। प्रतिबन्धकतायां स्ववैशिष्ट्यं च स्वनिरूपकतावच्छेदकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताविशिष्टत्वसंबन्धेन। तद्वैशिष्ट्यं च स्वावच्छेदकतावच्छेदकविषयताशालिज्ञानविशिष्टस्वावच्छेदकविषयतानिरूपकतावच्छेदकधर्मावच्छिन्नविषयताशालिनिश्चयाधिकरणत्वसंबन्धेनेति। इत्थं च न बाधादेरनित्यदोषतापत्तिः। अथवा यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकत्वमित्यत्र प्रकृतानुमितिप्रतिबन्धकतातिरिक्तवृत्तिविषयताकत्वेन यादृशविशिष्टस्य विशेषणीयत्वान्न बाधादेरनित्यदोषत्वापत्तिः, बाधादेर्यादृशविशिष्टपदेन धर्तुमशक्यत्वादिति दिक्।

1519

69787(b) साधारणग्रन्थक्रोडपत्रम्

Beginning is same as in MD 4319.

End:

अथैवमपि ह्रदो वह्निमान् धूमादित्यादौ नित्यदोषे वह्न्यभाववद्ध्रदेऽव्याप्तिः ह्रदे धूमवत्ताबुद्धिं प्रति वह्न्यभाववान् धूमाभाववान् इति निश्चयसहितस्य वह्न्यभाववान् ह्रद इति निश्चयस्य एकविशिष्टापरत्वेन प्रतिबन्धकतया यद्रूपपदेन वह्न्यभाववद्ध्रदत्वस्योपादाने यद्रूपावच्छिन्नविषयकनिश्चयस्य यादृशयादृशज्ञानान्तरविशिष्टत्वेन प्रतिबन्धकता तादृशतादृशज्ञानविशिष्टतादृशविशिष्टविषयकज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविशिष्टपर्याप्तविषयताविरहघत्त्वस्य प्रत्येकज्ञानाधिकरणकाले असत्त्वादिति चेत्, अत्र केचित्।

1520

72756(b) साध्यवत्ताग्रहविरोधितानियामकसंबन्धविचारः

Beginning:

साध्यवत्ताग्रहविरोधितानियामकसंबन्धो नाम साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताश्रयीभूतज्ञाननिरूपित-

प्रकारतावच्छेदकसंबन्धः। न चैवं समवायेन सत्तावान् जातेरित्यादौ समवायेन सत्तावान् घट इत्याकारकज्ञानं प्रति स्वरूपसंबन्धेन सत्ताभाववान् घटः कालिकसंबन्धेन घटवान् काल इत्याकारकसमूहालम्बनात्मकज्ञानस्यापि प्रतिबन्धकतया कालिकसंबन्धस्यापि तदीयप्रकारतावच्छेदकसंबन्धत्वादव्याप्तिरिति वाच्यम्। तादृशप्रतिबन्धकतावच्छेदककोटिप्रविष्टप्रकारतावच्छेदकत्वस्य विवक्षितत्वात्। उक्तस्थले च कालिकसंबन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतायाः दर्शितप्रतिबन्धकतावच्छेदककोट्यप्रविष्टतया दोषाभावात्। न च तथापि कालिकसंबन्धेन घटवान् समवायेन सत्तावानित्याकारकज्ञानं प्रति कालिकसंबन्धेन घटवान् स्वरूपसंबन्धेन सत्ताभाववानित्याकारकज्ञानस्य प्रतिबन्धकतया, तदवच्छेदककोटिप्रविष्ट घटनिष्ठा या धर्मितावच्छेदकतारूपा प्रकारता तदवच्छेदकीभूतकालिकसंबन्धमादाय तद्दोषतादवस्थ्यमिति वाच्यम्। प्रकारतायाः स्वनिष्ठत्वेन निवेशात्।

End:

स्यादेतत्। निरुक्तसाध्याभाववद्वृत्तित्वं यद्यभावस्य येन केनापि संबन्धेन तदा वह्निमान् धूमादित्यादावव्याप्तिः, साध्याभाववद्ध्रदादिनिरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वस्य धूमे सत्त्वात्। यद्यभावीयविशेषणतासंबन्धेन तदा धूमवान् वह्नेरित्यादौ वह्न्यभावात्मकाभावस्याभावीयविशेषणतासंबन्धेनावृत्त्या अतिव्याप्त्यापत्तेः। यदि हेतुतावच्छेदकसंबन्धेन तदा सत्तावान् जातेरित्यादौ अव्याप्त्यापत्तेः। साध्याभाववत्सामान्यादिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धेः। उच्यते। साध्याभाववद्वृत्त्यभावप्रतियोग्यधिकरणकाभावप्रतियोगित्वस्य विवक्षया विशेषणतासंबन्धेनैव साध्याभाववद्वृत्तित्वस्य विवक्षणात्। वह्न्यभावाधिकरणत्वाभावस्य भावप्रतियोगिकतया अतिरिक्तत्वेन वह्न्यनात्मकतया तस्य विशेषणतासंबन्धेनैव साध्याभाववत्ययोगोलके वर्तमानत्वात्तादृशाभावप्रतियोगिकत्वस्यैव वह्न्यभावाधिकरणतायां सत्त्वेन धूमवान् वह्नेरित्यादावतिव्याप्तिविरहादिति दिक्।

1521

PM1754 सिंहव्याघ्रलक्षणक्रोडपत्रम्

Beginning:

साध्यनिष्ठाधेयतावन्निरूपकाधिकरणत्वव्यापकाभावप्रतियोगिप्रतियोग्यधिकरणतासामान्यकत्वमित्यत्र हेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वाभावत्वं साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वमिति निष्कर्षः। अत्र हेतुतावच्छेदकसंबन्धावच्छिन्नाभावत्वं साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकमित्यनुक्तौ चैत्रत्ववान् तद्धनादित्यत्र स्वामित्वसंबन्धेन हेतुतायां वृत्त्यनियामकसंबन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या अव्याप्तिः। एवं वह्निसाध्यकसंयोगेन रूपहेतावतिव्याप्तिः। संयोगसंबन्धावच्छिन्नरूपसामान्याभावस्य केवलान्वयितया तादृशाभावत्वस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकत्वात्। यद्धर्मावच्छिन्नाधिकरणत्वप्रवेशे च संयोगसंबन्धावच्छिन्नरूपाधिकरणत्वाप्रसिद्ध्या नातिव्याप्तिः।

End:

एवं धूमवान् वह्नेः पृथिवीरूपादित्यादौ अयोगोलकीयवह्नौ जलीयरूपादौ च यत् साध्यवद्वृत्तित्वाभावाधिकरणत्वं तस्याव्याप्यवृत्तित्वेन हेत्वधिकरणावच्छेद्यत्वाभावासत्वादतिव्याप्तिरिति चेत्, अत्र साध्यवद्वृत्तित्वं स्ववृत्तिहेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नसंबन्धित्वसंबन्धेन। तथा च वह्निमान् धूमादित्यत्र महानसीयधूमस्यापि स्ववृत्ति यद् धूमत्वं तदवच्छिन्नसंबन्धित्वसंबन्धेन पर्वतेऽपि सत्त्वात्। कस्मिन्नपि धूमे एतादृशसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावः हेत्वधिकरणावच्छेदेनास्ति, किं तु वह्निधूमोभयवत्कपालसमवेतमहानसमात्रसंयुक्तघटे एतादृशसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावः व्याप्यवृत्ति धूमत्वस्य घटे विरहात्। तथा च तादृशाधिकरणतासामान्य एव हेत्वधिकरणावच्छेद्यत्वाभावसत्त्वात् न वह्निमान् धूमादित्यत्राव्याप्तिः। न वा धूमवान् वह्नेः, पृथिवी रूपादित्यादौ च स्ववृत्तिधूमत्वरूपत्वाद्यवच्छिन्नाधिकरणत्वसंबन्धेन धूमवद्वृत्तित्वपृथिवीत्ववद्वृत्तित्वस्य चायोगोलकीयवह्नौ जलीयरूपादौ च पर्वतावच्छेदेन पृथिव्यवच्छेदेन च तादृशसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वस्याप्रसिद्धयैव नातिव्याप्तिरिति संक्षेपः।

1522

PM1755 सिंहव्याघ्रलक्षणक्रोडपत्रम्

Beginning:

साध्यासामानाधिकरण्यानधिकरणत्वमिति। समानं अधिकरणं यस्य सः समानाधिकरणः, तस्य भावः सामानाधिकरण्यम्, साध्यस्य सामानाधिकरण्यं साध्यसामानाधिकरण्यं, तस्याभावः साध्यासामानाधिकरण्यं तस्यानधिकरणत्वम्। समानशब्दः अधिकरणवाची, अधिकरणपदं आधेयतानिरूपकपरं, यस्येत्यत्र षष्ठ्यर्थः निष्ठत्वं, तस्याधिकरणपदार्थैकदेशाधेयतायामन्वयः। तथा च विग्रहार्थः—यन्निष्ठाधेयतानिरूपकमधिकरणमिति पर्यवसितः। समासार्थस्तु अधिकरणनिरूपिताधेयतावान् य इति। तदुत्तरष्यञ्प्रत्ययेन अधिकरणनिरूपिताधेयतेति पर्यवसितम्। साध्यस्येत्यत्र षष्ठ्यर्थो निरूपितत्वं, तस्य सामानाधिकरण्यपदार्थैकदेशाधिकरणतायामन्वयः। तथा च साध्यसामानाधिकरण्यं पर्यवसितोऽर्थः। तदुत्तरषष्ठ्याः प्रतियोगित्वमर्थः, तस्य च अभावे अन्वयः। तथा च साध्याधिकरणवृत्तित्वाभावानधिकरणत्वं लक्षणम्। एवं च द्रव्यं सत्त्वादित्यादावतिव्याप्तिः ॥ १ ॥ समानमेव सामानं, साध्यस्य न सामानं साध्यासामानं, साध्यासमानमधिकरणं यस्य तत्साध्यासामानाधिकरणं, तस्य भावः साध्यासामानाधिकरण्यं, तस्यानधिकरणत्वम्। समानशब्दः अधिकरणवाची। साध्यस्येत्यत्र षष्ठ्यर्थनिरूपितत्वस्य समानशब्दार्थैकदेशाधिकरणतायामन्वयः, अधिकरणताविशिष्टस्य नञर्थैकदेशे भेदे अन्वयः। अधिकरणपदं आधेयतानिरूपकपरम्। तथा च समासशब्दार्थः साध्यानधिकरणनिरूपिताधेयतावत्। तदुत्तरष्यञ्प्रत्ययेन तत्त्वं, तस्यानधिकरणत्वम्। इत्थं च साध्यानधिकरणनिरूपिताधेयतानधिकरणत्वं फलितम्। तथा च द्वितीयेन सह पौनरुक्त्यम्।

End:

तथा च समानं यन्निष्ठाधेयतानिरूपिताधिकरणत्वावच्छिन्नभेदवदिति विग्रहवाक्यार्थः संपन्नः। समासवाक्ये तु—समाननिष्ठभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपिताधेयताशालीति साध्यादिरूपान्यपदार्थमुख्यविशेष्यकबोधः। यदधिकरणानधिकरणेत्यस्य अत्रैव तात्पर्यम्। साध्यमसमानं यस्येति विग्रहे यत्पदं शैवालपरं, षष्ठ्यर्थो आधेयत्वं, अन्वयश्चास्य समानपदार्थैकदेशाधिकरणत्वे। तथा च साध्यं यन्निष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपिताधेयताशालीति विग्रहवाक्यार्थः। समासवाक्ये तु साध्यनिष्ठाधेयतानिरूपिताधिकरणत्वावच्छिन्नप्रतियोगिताकभेदवन्निष्ठाधिकरणतानिरूपिताधेयताशालीति शैवालमुख्यविशेष्यकबोधः। तत्र समासवाक्यार्थस्य द्वितीयलक्षणवाक्यार्थभिन्नतया विग्रहवाक्यार्थस्यैव लक्षणत्वमाहतं दीधितिकृता। तत्रैव च विशिष्टैकार्थतारूपतानुपपत्तिरिति ध्येयम्।

Colophon:

इति समासवाक्यार्थः।

1523

72964(e) सिंहव्याघ्रलक्षणक्रोडपत्रम्

Beginning:

अत्र साध्यासामानाधिकरण्यानधिकरणत्वलक्षणे समानम् अधिकरणं यस्य तत् समानाधिकरणं, अधिकरणतावद्वृत्त्यधिकरणतानिरूपकमिति यावत्, तस्य भावः सामानाधिकरण्यं, साध्यस्य सामानाधिकरण्यं साध्यसामानाधिकरण्यं, साध्यसामानाधिकरण्यस्याभावः साध्यासामानाधिकरण्यम्। साध्याधिकरणावृत्तित्वमिति फलितम्। एतत्कल्पाश्रये दोषमाह—द्रव्यं सत्त्वादिति। धूमवान् वह्नेरित्यादौ तु नातिव्याप्तिसंभवः। पर्वतीयवह्नेः धूमाधिकरणे सत्त्वेऽपि अयोगोलकीयवह्नेः धूमाधिकरणावृत्तित्वेन धूमाधिकरणवृत्तित्वाभावाधिकरणत्वाभावात्। अतोऽत्र द्रव्यत्वसाध्यकव्यभिचार्यनुसरणम्। नन्वु साध्यासामानाधिकरण्यमित्यस्य नोक्तरीत्या विग्रहः, किं तु समानमेव सामानम्। प्रज्ञादिभ्यश्चेति स्वार्थे अण्। साध्यपदं साध्याधिकरणपरं, समानपदं चाभिन्नपरं, साध्यस्य सामानं साध्यसामानम्। साध्याधिकरणाभिन्नमिति यावत्। न साध्यसामानं, साध्यासामानम्। साध्याधिकरणभिन्नमित्यर्थः। साध्यासामानमधिकरणं यस्य तत् साध्यासामानाधिकरणं, तस्य भावः तत्त्वम्। साध्याधिकरणभिन्नवृत्तित्वमिति फलितम्। तथा च द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाधिकरणभिन्नगुणवृत्तित्वानधिकरणत्वाभावादित्यत आह—तदनधिकरणवृत्तित्वस्येति।

End:

प्रथमलक्षणस्य नानाव्यक्तिसाध्यकेऽव्याप्तिकथनात् द्वितीयलक्षणस्य तत्रैवाव्याप्तेर्वक्तुमुचितत्वा तं परित्यज्य नानाव्यक्तिसाध्यकानुसरणं दीधितिकृतां निरर्थकमित्याशङ्कां परिहरति—

एकव्यक्तिसाध्यक इति। नन्वेवं मूलस्य न्यूनतापत्तिः धूमे चेत्यनेन मूले धूम एवाव्याप्त्यभिधानादत आह—तथा चेति। द्वितीयलक्षणे त्विति। द्वितीयलक्षणाभिप्रायेण व्याख्यानस्य मानं धूम इति मूलमित्यर्थः।

Colophon:

जगतां मुदे सिंहव्याघ्रलक्षणव्याख्या समाप्ता।

1525

66801(b) सिंहव्याघ्रलक्षणक्रोडपत्रम्

Beginning:

यत्पदेन सत्तादेरुपादानासंभवादिति। यत्तु व्यभिचारिमात्रेऽतिव्याप्तिरित्या . . . . . णत्वे-नातिव्याप्तिविरहात् अयोगोलकीयवह्न्यनधिकरणपर्वतादे . . . . . तिप्रसिद्धव्यभिचार्युपेक्षा। सत्तावान् द्रव्यत्वादित्यादावव्या . . . . . करणत्वादिति भावः। समानाधिकरणयोरेव व्याप्यव्यापक . . . . . पि वह्निमान् धूमादित्यादौ धूमादेरयोगोलकीयवह्न्या . . . . .

End:

न चैवं दैशिकविशेषणतया भूतलवृत्तिर्घटाभाव इतिवद्दैशिकविशेषणतया भूतलवृत्तिर्घट इति प्रतीतिव्यवहारयोरापत्तिरिति वाच्यम्। दैशिकविशेषणतासंबन्धावच्छिन्नभूतलादिवृत्तितावच्छेदकत्वस्य घटत्वादावनभ्युपगमात्। अयं कालः कालिकसंबन्धेनाकाशाभावादित्यादावपि नाव्याप्तिः। तत्र हेत्वभावाभावस्य कालिकविशेषणतारूपत्वस्य कालत्वरूपत्वस्य वाभ्युपगमाद्धेत्वभावस्य व्यापकता-भङ्गविरहात्। एवं द्रव्यं विशिष्टसत्त्वादित्यादावपि नाव्याप्तिः विशिष्टसत्ताभावाभावस्य द्रव्यत्वरूपत्व-स्यैवाभ्युपगमादिति तदपि न, भावाभावसाधारणताया वक्ष्यमाणत्वात्। नव्यास्तु हेतुतावच्छेदकसं-बन्धान्यभेदप्रतियोगिकसंबन्धानवच्छिन्नत्वमेव वृत्तित्वे निवेश्यते तावतैव सत्तावान् जातेरित्यादाव-प्रसिद्धिनिबन्धनाव्याप्तिवारणसंभवात्। एतेन यथोक्तदोषवारणाय . . हेतुतावच्छेदकस्वरूपान्यतर-संबन्धावच्छिन्नत्वं निवेश्यत इति न सत्, अयं कालः कालिकसंबन्धेनाकाशाभावादित्यादावव्याप्तेरिति परास्तमित्याहुः। गुरुचरणास्तु . . .

1528

PM1680(d) सिद्धान्तलक्षणक्रोडपत्रम्

Beginning:

अथ प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नभिन्न-त्वनिवेशे तत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिरतोऽनवच्छेदकगर्भता। तत्र चावच्छेदकतायां

साध्यतावच्छेकतावच्छेदकताघटकसंबन्धावच्छिन्नत्वनिवेशस्य रूपवान् पृथिवीत्वादित्यादावव्याप्ति-वारणायावश्यकत्वेन कथं तत्तद्व्यक्त्यभावस्य लक्षणघटकता। न च वह्नित्वावच्छिन्नवान् धूमादित्यादावव्याप्तिर्दत्ता, तत्र च वह्नित्वावच्छिन्नत्वस्य स्वरूपसंबन्धेन साध्यतावच्छेदकत्वादिति वाच्यम्। तथा सत्यग्रे वह्नित्वस्यावच्छेदकत्वेनाव्याप्तितादवस्थ्याभिधानविरोधात्। न च तत्तद्व्यक्तित्वं तत्तद्रूपादिस्वरूपमेवेति वाच्यम्। तथा सत्युत्पत्तिकाले तत्तद्व्यक्तित्वं नास्तीति प्रत्ययापत्तेः, इति चेदत्र केचित्। वह्नित्वावच्छिन्ननिरूपितसमवायेन वह्नित्वस्य साध्यतावच्छेदकस्थले तादृश-संबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वाप्रसिद्धया साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नप्रतियो-गितावच्छेदकता निवेशयितुमशक्यया, इति तत्तद्व्यक्तित्वावच्छिन्नभावस्य लक्षणघटकत्वम्। अन-वच्छेदकानुसरणे च साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसंबन्धेन तादृशप्रतियोगितावच्छेदकत्वविवक्षणासंगतिरित्याहुः।

End:

यदि च व्यासज्यवृत्तिसाद्धयतावच्छेदकत्वादेः पर्याप्तिसंबन्धो न प्रामाणिकः। अत एव अवच्छेदकत्वनिरुक्तौ एकत्वादेः पर्याप्तिसंबन्धे मानाभाव इति जगदीशेनोक्तम्। तदा तु नेदृशी रीतिः संभवतीति साध्यतावच्छेदकतदितरेत्यादिविशेषणमावश्यकम्। अथ साध्यतावच्छेदकतदि-तरेत्यादिविशेषणदाने सामान्याभावैकतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताया एव वह्नित्वावच्छिन्नतया अव्याप्तिवारणानुपपत्त्यनुदयात् संगत्या सामान्याभावे अ . . .

1530

PM1753 सिद्धान्तलक्षणक्रोडपत्रम्

Beginning:

अथ प्रतियोग्यसमानाधिकरणेत्यादिमूललक्षणेऽव्याप्तिवारणाय दीधितिकृता नञ्व्यत्यासः कृतः। तत्रेदं चिन्तनीयम्। स्वप्रतियोगितावच्छिन्नकत्वस्वाश्रयसामानाधिकरण्योभयसंबन्धेन यत्किंचिद्धर्म-विशिष्टान्यो योऽभावस्तत्प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः। वह्निमान् धूमादित्यादावव्याप्तिवारणसंभवात्। न च संयोगी सत्त्वादित्यादावतिव्याप्तिः साध्याभावस्यैतादृशसंसर्गेण साध्यतावच्छेदकविशिष्टत्वादिति वाच्यम्, गुणावृत्तित्वावच्छिन्नाभाव-मादाय लक्षणस्य तत्रातिव्याप्तिविरहात्। न च साध्यतावच्छेदकघटकसंबन्धेनावच्छेदकत्वस्याग्रे विवक्षणीयत्वात् न तदभावमादायातिव्याप्तिवारणसंभव इति वाच्यम्। मूलोक्तलक्षणे तस्यानिवेशात् प्रतियोगितावच्छेदकताघटकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नभिन्नत्वस्य साध्ये निवेश-नीयत्वात् न रूपवान् पृथिवीत्वादित्यादौ रूपत्ववज्ज्ञानाभावमादायाव्याप्तिः।

End:

धर्मसंबन्धपदयोरुपादानमिति। ननु समवायिनः संयोगेन साध्यतायामव्याप्तिवारणार्थं संबन्ध-विधया संयोगावच्छिन्नत्वस्य धर्मविधया समवायावच्छिन्नत्वस्य वान्यतरस्यैव निवेश उचितः। संयोगिनः

समवायेनाभावप्रतियोगितायामन्यतरस्याभावादिति वाच्यम् । समवायिनः समवायेन साध्यतायां संयोगिनः समवायेनाभावमादायाव्याप्त्यापत्तेः । तादृशप्रतियोगितायां संबन्धतया समवायावच्छेद्यत्व-समवायनिष्ठावच्छेदकतानिरूपकतानिरूपकत्वोभयसत्त्वात् । तन्निवेशे च धर्मविधया संयोगावच्छेद्यत्व-सत्त्वेऽपि धर्मविधया समवायावच्छिन्नत्वासत्त्वान्न दोषः । एवं संयोगिनः संयोगेन साध्यतायां तादृशाभावमादायाव्याप्त्यपत्त्या तदावश्यकत्वात् । तन्निवेशे धर्मविधया संयोगावच्छेद्यत्वसत्त्वेऽपि संबन्धविधया संयोगावच्छेद्यत्वाभावान्न दोषः । संबन्धविधया समवायावच्छेद्यत्वस्यैव सत्त्वात् ।

Colophon:

इति सिद्धान्तलक्षणविचारः ।

1531

66782(b) सिद्धान्तलक्षणक्रोडपत्रम्

Beginning:

समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः दैशिकविशेषणतयोभयवृत्तयस्तत्त्वमिति कुतो नोक्तं दीधितिकारेण . . . धूमादित्यादौ हेतुसमानाधि-करणत्वसाध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणाक्रान्तानां यावदभावानां घटत्वेन वह्न्यभावादीनां दैशिकविशेषणतया पर्वत . . त्वादिरूपोभयवृत्तित्वात् । धूमवान् वह्नेरित्यादावपि तादृशविशेषणा-क्रान्तधूमत्वेन धूमाभावस्य तत्तदयोगोलकोभयवृत्तित्वसत्त्वेऽपि तादृशविशेषणाक्रान्त . . . . त्वा-भावस्य तत्तदयोगोलकत्वरूपस्य तादृशसंबन्धेनोभयवृत्तित्वाभावादेवातिव्याप्तिवारणसंभवात् । न च संबन्धसामान्ये . . . . . वृत्तित्वस्य सुवचत्वात् तादृशसंबन्धनिवेशनवैयर्थ्यमिति वाच्यम् । कालिकादिसंबन्धमादाय तत्तदयोगोलकान्यत्वाभावानामपि उभयवृत्ति . . . . नातिप्रसंगात् । न च तथापि उभयवृत्तित्वविशेषणं व्यर्थं तत्तदयोगोलकत्वरूपतदभावस्य दैशिकविशेषणतया वृत्तित्वेऽपि तादृशयावदभावान्तर्गततत्तदयोगोलकरूपाभावाभावस्य तत्तदयोगोलकीयरूपात्मकाभावस्य वृत्तित्व-स्य दैशिकविशेषणतयाभावादेवातिप्रसंगवारणसंभवादिति वाच्यम् ।

End:

तथा च यथाश्रुतवाक्याद् अव्यभिचरितत्वपदार्थे अनुमितिजनकतावच्छेदकविषयताव्य-वच्छेदस्य लाभेऽपि न तस्य साध्यत्वे तात्पर्यम् । अपि त्वनुमितिजनकत्वे तद्विषयकत्वावच्छिन्न-भेदस्यार्थतो लभ्यस्यैव साध्यत्वे तात्पर्यमिति भावः । अनुमितिजनकतायामपि लिङ्गादिविधया अव्यभिचरितत्वविषयत्वस्यावच्छेदकतया बाधप्रसंगादाह—अव्यभिचारपदार्थावच्छिन्नत्वहेतुविषय-तेति । अव्यभिचारपदप्रतिपाद्यतावच्छेदकावच्छिन्नावच्छेदकतानिरूपकहेतुविषयताघटितधर्मावच्छिन्ना नेत्यर्थः । तेन सिद्धान्तिमतेऽपि साध्याभाववदवृत्तित्वादेः व्यापकसामानाधिकरण्यत्वेनावगाहिनो भ्रमात्मकपरामर्शाद् अनुमित्युत्पादेऽपि न क्षतिः । अत्र चाव्यभिचारपदप्रतिपाद्यतावच्छेदक-

साध्याभाववदवृत्तित्वत्वावच्छिन्नविषयकत्वावच्छिन्नस्यानुमितिजनकतायां लिङ्गादिविधया सिद्धान्तिनामप्यनुमतत्वाद् बाधवारणाय हेतुविषयताप्रवेशः। पर्याप्त्यनिवेशसूचनायैव घटितपदम्।

1532

67863(b) सिद्धान्तलक्षणक्रोडपत्रम्

Beginning:

गदाधरीयसिद्धान्तलक्षणे प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानधिकरण्यमिति मूलस्य तादृशाभावप्रतियोगितावच्छेदका ये धर्माः प्रत्येकं तत्तदवच्छिन्नभेदकूटसामानाधिकरण्यं साध्यतावच्छेदके निवेश्य लक्षणपरिष्कारे सत्तावान् जातेरित्यादौ विशिष्टसत्ताभावमादायाव्याप्तिरुक्ता। अत्रेयमनुपपत्तिः। वह्निमान् धूमादित्यत्र सामानाधिकरण्यसंबन्धेन पर्वतान्यत्वविशिष्टवह्न्याद्यभावमादायाव्याप्तिसंभवे प्रसिद्धस्थलपरित्यागस्यात्यन्तमनौचित्यमिति। न च तादृशसंबन्धेन पर्वतान्यत्ववैशिष्ट्यस्य इतरवह्नौ संभवेऽपि पर्वतीयवह्नावसंभवेन तदवच्छिन्नान्यत्वस्य तत्र संभवान्नाव्याप्तिरिति वाच्यम्।

End:

हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकम् एतादृशं स्वं साध्यतावच्छेदकमिति अनवच्छेदकान्तपारिभाषिकबलाद् दण्डिमानित्यादौ नैतादृशं किमिति दण्डस्वरूपहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं यावद्दण्डस्य प्रत्येकं कस्यापि दण्डस्य स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वविरहादिति परंपरासंबन्धस्यानुसरणं **भट्टाचार्यस्य** वस्तुत इत्यादिनेति लिखितं तन्न सम्यक्। यत्र यादृशं साध्यतावच्छेदकं तत्र तादृशमेव . . . न धर्तव्यम्, अन्यथा महानसीयविशिष्टत्वस्य साध्यतावच्छेदकत्वस्थले व्यभिचारिण्यतिव्याप्तिः। तथा चात्रापि दण्डत्वेन रूपेण दण्डस्योपादानात् सर्वस्यैव दण्डस्य दण्डत्वावच्छिन्नसबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वसंभवेनाव्याप्तेरयोग इति वस्तुत इत्यादिपाठः प्रामाणिक इति।

1533

70212(b) सिद्धान्तलक्षणक्रोडपत्रम्

Beginning is same as in No. 1530.

End:

अत्र केचित्—हेतुमन्निष्ठाभावविशिष्टसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः। हेतुमन्निष्ठाभाववैशिष्ट्यं च स्वनिरूपितप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धावच्छिन्नप्रतियोगिताकाभाववत् साध्यतावच्छेदकतापर्याप्त्यनुयोगिता-

वच्छेदकवत्वसंबन्धेन । अथवा . . . हेतुमन्निष्ठाभावस्य अभावविशिष्टसाध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मवत् साध्यतावच्छेदका . . . . . पितप्रतियोगितावच्छेदकतात्वविशिष्टप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकम् । इत्थं च . . . . . भावप्रतियोगितावच्छेदकतात्वेनैव लक्षणे निवेशः । न च यथोक्तदीर्घरूपेण किं तु संसर्गविधया तादृशस्य निवेशेनाननुगमोऽपि नास्तीति । यदि च साध्यतावच्छेदकस्य प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहं प्रति तादृशव्याप्तिबुद्धेरप्रतिबन्धकतापत्तिः । न चेष्टापत्तिः । व्याप्त्यनुगमग्रन्थे दीधितिकृतां तादृशग्रहविरोधित्वेन व्याप्ति . . . . . .

1535

TR1033 सिद्धान्तलक्षणक्रोडपत्रम्

Beginning:

श्रीजगदीशकृतसिद्धान्तलक्षणव्याख्याया वादोपयोगिनी टीका । वह्नित्वावच्छिन्नसर्वस्यैवेत्यादि । अत्रेयमनुपपत्तिः । अथ रूपवान् पृथिवीत्वादित्यादौ विषयितया रूपत्ववज्ज्ञानाभावमादायाव्याप्तिवारणायावश्यविवक्षणीयसाध्यतावच्छेदकताघटकसंसर्गावच्छिन्नप्रतियोगितावच्छेदकतानिवेशेनैव तत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिः न संभवतीति चेन्न । यथाश्रुतलक्षणे प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकविशिष्टं यत् तद्भिन्नत्वस्य साध्ये निवेशादेव रूपवान् पृथिवीत्वादित्यादौ प्रतियोगितावच्छेदकताघटकविषयितासंबन्धेन यद्रूपत्वविशिष्टं ज्ञानं तद्भिन्नत्वस्य साध्ये सत्त्वान्नाव्याप्तिः । तथा च तत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिदानसंगतिः ।

End:

अथाव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्कते इति **शिरोमणिना** लिखितम् । तत्रेयमनुपपत्तिः । यद्यपि स्वव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेन अव्याप्तिमाशङ्क्य तदा संयोगाभाववान् गुणत्वादित्यादौ कथम् अव्याप्तिः इत्यत आह . . . . . अव्याप्यवृत्तिसत्ताश्रयीभूतहेतावव्याप्तिमाशङ्क्याह . . . . . । तदा पृथिवीजलसंयोगाभाववान् तेजोवायुसंयोगादित्यादौ अव्याप्तिर्न स्यात् अभावसाध्यके इत्युक्तम् । गुणवान् जलीयपरमाणुरूपादित्यादौ नाव्याप्तिः । तस्यार्थः स्वाधिकरणवृत्तिसाध्याभावकेऽव्याप्तिः इति पर्यवसितार्थः ।

1539

PM1752 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning is same as in MD 4324.

End:

न च स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकः कश्चित् स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य एवं भूतं यद्यत् स्वं मेयत्ववि-

शिष्टव्यभिचारत्वादि तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य विवक्षणीयतया न कोऽपि दोष इति वाच्यमिति **गादाधरी**। अत्र प्रतियोगिनि स्वत्वं निविष्टम्। तथा च स्वं मेयत्वविशिष्टबाधत्वादिकं स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः शुद्धबाधत्वादिः, एवंभूतं यत् स्वं मेयत्वविशिष्टबाधत्वमिति तदवच्छिन्नाघटितत्वस्य बाधादौ सत्त्वात् लक्षणसमन्वयः, मेयत्वविशिष्टबाधादावसत्त्वात् नातिव्याप्तिश्च।

1544

67759(c) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

यद्रूपावच्छिन्नविषयतात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयताशून्यत्वं निश्चये निवेशितं **भट्टाचार्येण**। तत्र दोषमाशङ्कते—यद्रूपावच्छिन्नविषयतेति। यादृशविशिष्टे लक्षणं संगमनीयं तादृशविशिष्टविषयतेत्यर्थः। अशक्यमिति। तथा च तत्रापि वह्न्यभाववद्ध्रदत्वविशिष्टविषयकत्वसत्त्वेन तत्रानुमितिप्रतिबन्धकत्वाभावादसंभव इति भावः। ननु अभावत्वावच्छिन्नविषयतात्वस्य वह्न्यभाववद्ध्रदत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात् तादृशविषयताशून्यत्वस्याभाववान् वह्न्यभाववान् इति ज्ञाने अभावात् तद्वारणं शक्यमेवेत्यत आह—अभावत्वावच्छिन्नविषयतात्वस्येति।

End:

तेन साध्याभाववद्वृत्तित्वरूपव्याप्तौ साध्यधर्मितावच्छेदकत्वेनाभावप्रवेशस्याग्रे स्वयं वक्ष्यमाणत्वेऽपि न क्षतिः। अव्यभिचरितेति। अव्यभिचरितसाध्यसामानाधिकरण्याभावाव्यभिचरितत्वविशिष्टवृत्तित्वाभाववद्धेतोः संग्रहाय सामानाधिकरण्यपर्यन्तमुक्तम्। अव्यभिचरितसामानाधिकरण्योभयावच्छिन्नहेतुविषयकनिश्चयत्वेन हेतुतया तथैव निवेशे अव्यभिचारसामानाधिकरण्योभयाभाववदव्यभिचरितत्वविशिष्टसामानाधिकरण्याभावस्य संग्रहो वक्ष्यमाणरीत्या बोध्यः।

1545

66350(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

अत्र प्रकृतपक्षकप्रकृतसाध्यकप्रकृतलिङ्गकानुमितिनिष्ठकार्यतानिरूपकसंबन्धिग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं हेतुदोषत्वमिति कल्पे, पर्वतो वह्निमान् ह्रदश्च तथेत्यादि समूहालम्बनानुमितिमादाय पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकस्थले वह्न्यभाववद्ध्रदादावतिव्याप्तिः। न च स्वावच्छेदकत्व स्वनिरूपितकारणतावच्छेदकत्वान्यतरसंबन्धेन प्रकृतपक्षसाध्यलिङ्गकानुमितित्वावच्छिन्नकार्यत्वोपलक्षितं यत् तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालि-

यथार्थज्ञानविषयत्वनिवेशान्नैष दोष इति वाच्यम्। परामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वे पक्षादिविषयिताया: प्रयोजनविरहेण तत्कोटावनिवेशकल्पे बाधादेरसंग्रहापत्ते:।

End:

इदं त्ववधेयम्—दर्शितस्य दोषलक्षणस्य दुष्टलक्षणस्य लक्ष्यतावच्छेदकधर्मोऽवश्यं विवक्षणीय:। स च न तत्पक्षतत्साध्यतद्धेतुकदोषत्वं, यतस्तत्पक्षकत्वादे: तत्पक्षकतत्साध्यकतद्धेतुकानुमितिविरोधित्वं, तत्पक्षादिवाचकपदसमभिव्याहृतदोषादिपदप्रतिपाद्यत्वं वार्थ: स्यात्। तत्र प्रथमे अनुमित्यप्रसिद्धिस्थले निर्वह्निनिष्ठवह्न्यभावादौ लक्षणाव्याप्तिपूर्वपक्षस्यैवानुत्थित्या दीधित्यसंगति:। द्वितीये यादृशस्थलविशेषे पक्षादिवाचकपदसमभिव्याहृतदोषादिपदजन्यप्रतीतिर्नैकस्यापि तादृशानुमितिविरोधिन्यतिव्यापकत्वं लक्षणस्य स्यात् दशाविशेषे। वस्तुत: सद्धेतुनिष्ठस्य सपक्षविपक्षव्यावृत्तत्वरूपासाधारण्यादे: प्राचीनै: दोषत्वेन व्यवह्रियमाणस्य दर्शितलक्षणानाक्रान्ततया लक्षणस्याव्याप्तत्वप्रसंगश्चेति।

Colophon:

इति श्रीपुरुषोत्तमशास्त्रिविरचित: **गादाधरीयसामान्यनिरुक्तिक्रोड:** समाप्त:।

1546

68082(f) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

यादृशविशिष्टविषयकत्वविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमित्यवृत्ति तादृशविशिष्टद्वयाघटितत्वनिवेशेनैवोपपत्तौ गुरुभूतप्रतिबन्धकतानतिरिक्तवृत्तित्वघटितविशिष्टद्वयाघटितत्वनिवेशोऽनुपपन्न:। यत्तु असंभववारणाय प्रकृतानुमितिप्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वनिवेशावश्यकतया तत्परिष्कारादर इति, तन्न, तादृशविशिष्टद्वयविषयतायां ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वनिवेशादेव सामञ्जस्यादिति। यद्वा प्रकृतानुमित्यवृत्तिप्रतिबन्धकताशून्यप्रतीतिविषयतावच्छेदकत्वमेव तत्। तस्यायमनुगम:। प्रकृतानुमितिविशिष्टत्वं विशिष्टद्वयाघटितत्वम्।

End:

द्वितीयस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वरूपसंसर्गघटकस्वनिष्ठावच्छेदकता स्वाभाववद्वृत्तित्वसंबन्धेन। स्वनिष्ठप्रतियोगिताकस्वाश्रयप्रतिबध्यतावच्छेदकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताकत्वसंबन्धेन वृत्तित्वं तु स्वनिरूपिताधेयतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयताकत्वस्वनिरूपिताधेयतावच्छेदकतावच्छेदकीभूतधर्मावच्छिन्नविषयताकत्वोभयसंबन्धेन स्वविशिष्टनिश्चयत्वसंबन्धेन प्रतिबध्यतावृत्तित्वं व्यापकतासंबन्धेनेति अवगन्तव्यम्।

एवं विशिष्टयुगलीविप्रया सरणिर्नवा।
दर्शिता **रङ्गनाथेन** सुधिया सुधियां मुदे॥

1547

68454(b) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

स्वावच्छिन्नविषयकेत्यादि। नन्वत्र विशिष्टान्तराघटितत्वनिवेशापेक्षया लाघवात्, स्वावच्छिन्न-विषयताशून्यप्रतीत्यवृत्तित्वमेव प्रतिबन्धकत्वे निवेश्यते। तत एव मेयत्वविशिष्टव्यभिचारेऽतिव्याप्ति-वारणसंभवात् मेयत्वविशिष्टव्यभिचाराविषयकशुद्धव्यभिचारप्रतीतौ प्रकृतप्रतिबन्धकत्वसत्त्वात्। एवं व्यभिचारघटितबाधेऽव्याप्तिरपि परास्ता। न च वह्न्यभाववद्ह्रदाद्यविषयिणि भ्रान्त्यात्मकह्रदो वह्न्यभाववानिति निश्चयेऽपि प्रतिबन्धकत्वसत्त्वादसंभव इति वाच्यम्। भ्रमान्यत्वस्य तत्र देयत्वात्। न चैवं सत्प्रतिपक्षे व्यापकघटिते बाधविशेषे चाव्याप्तिः, जलव्यापको वह्न्यभाव इति निश्चयकालीन-जलवान् ह्रद इति ज्ञाने सत्प्रतिपक्षविषयताशून्ये प्रतिबन्धकत्वसत्त्वादिति वाच्यम्। कालिकसामानधि-करण्यभ्रमभिन्नत्वे तत्त्रितयसंबन्धेन ज्ञानविशिष्टान्यज्ञानावृत्तित्वस्यैव निवेशे दोषाभावात्।

End:

अनुगमस्तु आधेयताविशिष्टाधेयतावच्छेदकधर्मवत्त्वं दोषत्वम्। आधेयतावैशिष्ट्यं च तादवस्थ्यस्वविशिष्टविषयत्वावृत्तित्वोभयसंबन्धेन। विषयतायां स्ववैशिष्ट्यं च स्वाभाववत्त्वस्वात्यन्ताभाववद-वृत्तित्वस्वात्यन्ताभाववत्त्व, एतत्त्रितयवत्त्वसंबन्धेन। प्रथमाभावीयप्रतियोगिता च स्वावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्ननिरूपितत्वसंबन्धेन। स्वावच्छेदकता तु स्वावच्छिन्नविषयकनिश्चयत्वव्यापकत्व-संसर्गावच्छिन्ना। द्वितीयाभावीयप्रतियोगिता तु स्वावच्छेदकधर्मावच्छिन्नविषयकत्वाव्यापकविषयता-वत्त्वसंबन्धेन। तृतीयाभावीयप्रतियोगिता च स्वविशिष्टजनकताविशिष्टत्वसंबन्धेन। जनकतायां स्ववैशिष्ट्यं च स्वाश्रयप्रकृतानुमितिप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्य-तानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितत्वस्वाश्रयव्याप्यत्वस्वा-वच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टत्वैतत्त्रितयसंबन्धेन। धर्मवैशिष्ट्यं च स्वावच्छिन्नविषयक-निश्चयत्वव्यापकत्वसंबन्धेन। जनकतावैशिष्ट्यं च, स्वानवच्छेदकत्व आधेयत्वोभयसंबन्धेन। आधेयता स्वनिरूपितविषयतावच्छेदकधर्मावच्छिन्नोद्देश्यतावच्छिन्नत्वस्वविशिष्टविषयतावैशिष्ट्योभय-संबन्धेन। स्ववैशिष्ट्यं च स्वनिरूपितावच्छेदकतावद्धर्मावच्छिन्नप्रकारतानिरूपितव्यापकत्वविशेष्यता-निरूपितत्व स्वनिरूपिताधेयत्वनिष्ठप्रकारतानिरूपिताधिकरणप्रकारतानिरूपितत्वोभयसंबन्धेन। विष-यतावैशिष्ट्यं च स्वनिरूपितप्रकारतानिरूपितप्रकारतावच्छेदकधर्मावच्छिन्नहेतुकत्वस्वावच्छेदकधर्मा-वच्छिन्नविधेयतावच्छिन्नत्वोभयसंबन्धेन। विषयत्वावृत्तित्वं च स्वाश्रयप्रतिबन्धकतावच्छेदकविषयिता-विशिष्टनिरूपितत्वसंबन्धेन। प्रकृतानुमितिप्रतिबन्धकताव्यक्तिनिष्ठयद्रूपावच्छिन्नविषयकत्वव्यापकत्व-व्यापकत्वसंबन्धावच्छिन्नयद्रूपनिष्ठावच्छेदकताकाधेयतामादाय लक्षणसमन्वयो बोध्यः।

Colophon:

इति **श्रीन्यायनक्षत्रमालायां तृतीयनचविचारः समाप्तः।**

1548

PM1744(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

जिज्ञासाजनकज्ञानादौ यादृशसंबन्धेन तादृशधर्मस्य प्रकारत्वं तादृशसंबन्धेन तद्वत्त्वमेव संगतत्वव्यवहारनियामकं, अतः कालादौ न संगतत्वव्यवहार इति मन्तव्यम्। अथात्र तादृशजिज्ञासाजनकत्वमुपधायकतारूपं निवेश्यते उत स्वरूपयोग्यत्वं वा; नाद्यः, यत्र जिज्ञासाजनकं ज्ञानं दैवात् प्रत्ययकार्यज्ञानमिष्टसाधनं घटज्ञानं च घटादिजन्यमिति समूहालम्बनं तत्र तमादाय घटत्वादावतिव्याप्तिः। न द्वितीयः तथैवातिव्याप्तेः। न च जिज्ञासात्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकत्वेन यथोक्तविशेषणतैव विवक्षणीयेति नातिप्रसङ्ग इति वाच्यम्। तथापि यत्र घटादिकं निरूप्य केनचिदजिज्ञासितघटादिकं निरूपितं तत्र गुरोर्जिज्ञासाजनकज्ञानस्यापि प्रतिपाद्यपुरुषीयजिज्ञासां प्रति स्वरूपयोग्यत्वात् तत्रातिव्याप्तेर्दुर्वारत्वात्।

On fo. 8a:

सिद्धान्तग्रन्थदीधितौ जगदीशस्य सूक्तयः।
परिष्क्रियन्ते सद्युक्त्या **रामरुद्रेण** यत्नतः॥

End:

यद्यपि प्रतियोगितावच्छेदकमिह निरवच्छिन्नमेव ग्राह्यम्, अन्यथा पर्वते महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीति प्रतीतिसिद्धाभावमादाय वह्निमान् धूमादित्यादावव्याप्तिस्तथाचेत्यादि समानमित्येव पाठः, निरवच्छिन्नत्वं चात्र साध्यतावच्छेदकता यद्यद्धर्मावच्छिन्ना तत्तदनवच्छिन्नत्वमेव नातो व्यभिचारिण्यतिप्रसङ्गः, एवं च यदि चेत्यादि न संदर्भविरुद्धमिति वदन्ति। प्रत्ययान्तरासत्त्वादिति पाठस्तु प्रामादिकः। तादृशपाठे हि दण्डी नास्तीत्यत्रापि दण्डत्वोपलक्षितत्वमेव, दण्डव्यक्तीनामवच्छेदकत्वात्। तत् दण्डी नास्तीत्यादितो . . . . .

1549

69834(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

ननु विशिष्टद्वयाघटितत्वकल्पे स्वरूपसंबन्धरूपावच्छेदकत्वमेव निवेश्यतां किमनतिरिक्तवृत्तित्वनिवेशेनेति चेन्न। जलवद्ह्रदो वह्निमानित्यादौ वह्न्यभाववज्जलवद्ह्रदरूपबाधे अव्याप्तेः। वह्न्यभाववत्त्वविशिष्टविषयकनिश्चयविशिष्टजलवद्ह्रदत्वविशिष्टविषयकनिश्चयत्वस्य जलव्यापकवह्न्यभावप्रतियोगिकस्वरूपसंबन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितजलावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नविशिष्टजलत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्न -

प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकताश्रयत्वेन तादृशविशिष्टद्वयविषयताशून्यप्रतीतिविषयतावच्छेदकत्वस्य वह्न्यभाववज्जलवद्ध्रदत्वेऽसत्त्वात् । न च यद्रूपावच्छिन्नविषयतात्वं यादृशविशिष्टविषयकत्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं तदवच्छिन्नविषयताशून्ययादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतावच्छेदकं तादृशविशिष्टद्वयविषयताशून्यप्रतीतिविषयतावच्छेदकत्वं यद्रूपे निवेश्याव्याप्तिर्वारणीयेति वाच्यम् ।

End:

न च साध्यसाधनाविरोधित्वं ज्ञाने न विशेषणीयमिति वाच्यम् । पूर्वोक्तावृत्तिवह्निहेतुधूमसाध्यकस्थले ज्ञाननिष्ठविषयतासंबन्धेन व्याप्तिप्रतिबन्धकतानतिरिक्तवृत्तित्वरूपव्यभिचारत्वस्य वृत्तिवह्निरूपसाधनाप्रसिद्धिसाधारणतया स्वसजातीयवृत्तिवह्निरूपविशिष्टान्तरघटितत्वेन तत्र व्यभिचारेऽव्याप्तिवारणाय अभाववदवृत्तिवह्निकालीनधूमसाध्यकस्थले व्याप्तिग्रहप्रतिबन्धकतानतिरिक्तवृत्तित्वरूपव्यभिचारत्वस्य अभाववद्वृत्तिवह्निरूपसाध्याप्रसिद्धिसाधारणतया धूमाभाववद्वृत्तिवह्निरूपव्यभिचारस्य अभाववद्वृत्तिवह्निरूपस्वसजातीयविशिष्टान्तरघटितत्वेन तत्र व्यभिचारेऽव्याप्तिवारणाय च तादृशविशेषणद्वयस्यावश्यकत्वादिति चेन्न; साध्यसाधनग्रहत्वाव्यापकव्याप्तिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वमनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयताव्यापकं तद्रूपवत्त्वस्यैव व्यभिचारस्वरूपतया प्रकृते धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे अव्याप्त्यभावादिति हृदयम् ।

1551

68082(e) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Same beginning as in MD4321.

End:

न च यद्रूपावच्छिन्नविषयतात्वावच्छिन्ननिरूपित यद्रूपावच्छिन्नविषयतात्वं यादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपिततद्रूपावच्छिन्नविषयितात्वावच्छिन्नाभावनिवेशान्न दोषः, तत्र वह्न्यभावावच्छिन्नविषयितात्वावच्छिन्ननिरूपितत्वं न वह्न्यभाववान् ह्रद इति ज्ञानीयाभावत्वावच्छिन्नविषयतायां, किं तु अभाववान् वह्न्यभाववान् इति ज्ञानीयायामेवेत्युच्यते तदा गोत्वाभावादौ नातिव्याप्तिः । तत्र गोत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितत्वस्य गोत्वाभाव इति ज्ञानीयगोत्वाभावत्वावच्छिन्नविषयितात्वावच्छिन्ने असत्त्वादित्युच्यते तदा सामान्यपदं व्यर्थमिति ।

1552

69856 **हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्**

Beginning:

. . . ज्ञानं यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमिति-प्रतिबन्धकतानतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्न . . . . . भूत तादृशविशिष्टद्वयनिरूपितविषयता-शून्यं भवति तद्रूपावच्छिन्नत्वं विशिष्टद्वयाघटितत्वमिति निष्कर्षः। वस्तुतस्तु यादृशविशिष्टविषयक-निश्चय . . . . . विशिष्टविषयकनिश्चयत्वं स्वविषयकत्वावच्छिन्न यत्किंचित्प्रतिबन्धकता-निरूपितप्रतिबध्यतानवच्छेदकीभूता या प्रकारता तदनवच्छिन्नप्रति . . . . . निरूपितज्ञानवै-शिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वमेव समुदितार्थः।

End:

वस्तुतस्तु कारणाभावात् कार्याभाव इतिवत् स्वरूपसंबन्धप्रयोजकत्वं स्वसत्त्वनियतसत्ताकत्वं यन्निरूपित . . . . . ष्टमेवेत्यभ्युपगम्यते प्रकृते तथाच प्रतिबन्धकतावच्छेदकतापर्याप्त्यधि-करणसमुदायसत्तानियतसत्ताकत्वात् प्रतिबध्यतावच्छेदक . . . . . कत्वं समुदायस्यैव संभवति न तु प्रत्येकस्य। अत एवाप्रतिबन्धकनिश्चयोत्तरघटाद्यनुमितिनिष्ठ . . . . . तावच्छेदकप्रयुक्तत्वं न तु निश्चयोत्तरघटाद्यनुमितिनिष्ठस्य; न चैवं विशिष्टान्तरविषयतात्वव्या . . .

1554

69861(b) **हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्**

Beginning:

नैष दोष इति। अथ पर्वतो वह्निमान् धूमादित्यादौ पर्वतो वह्निमान् घटवान् इति एकत्र द्वयमिति रीत्या जायमानज्ञानीयपर्वतत्वावच्छिन्ननिरूपितविशेष्यताया वह्नित्वावच्छिन्नप्रकारता-निरूपिततादृशविषयितात्वेन प्रकृतकार्यतावच्छेदकत्वात् घटत्वावच्छिन्नप्रकारतानिरूपिततादृशविषयि-तात्वेन घटाभाववत्पर्वतविषयकनिश्चयप्रतिबध्यतावच्छेदकत्वात् घटाभाववत्पर्वते अतिव्याप्तिः। न च तादृशकार्यत्वोपलक्षितप्रकारित्वावच्छिन्नेत्यादिनिवेशान्नायं दोष इति वाच्यम्। एवमपि पर्वतो घटवह्निमान् इति घटत्ववह्नित्वे एकत्रावगाहमानज्ञानीयप्रकारितायाः वह्नित्वावच्छिन्नप्रकारता-निरूपितत्व घटत्वावच्छिन्नप्रकारतानिरूपितत्वाभ्यामुक्तकार्यताप्रतिबध्यतावच्छेदकत्वात् तत्रातिव्याप्ति-तादवस्थ्यात्।

End:

केचित्तु पक्षे संदेहोऽनुमानाङ्गं, अनुमितिपूर्वकाले विशेषादर्शनसाहित्येन प्राक् . . . . . घटकतयानुमित्युपयोगि न तु कारणम्। तथा च पक्षे साध्याभावसंशयरूपव्यभिचारज्ञानस्यानुमिति

विरोधित्वेऽपि तादृशसंशये विनष्ट एव .... तिर्भविष्यति इति नानुमानमात्रोच्छेद इति मूलं व्याचक्षते; व्याप्यवत्तापरामर्शस्यापि उत्तरकाले संशयनिवर्तकत्वसंभवादनुमित्युत्पादस्य संशय ..... भिधानासंगतिमाशङ्क्याह—फलतोऽपीति। तथा च फलद्वारापि संशयनिवर्तकत्वमस्तीति प्रदर्शितम्।

1555

PM1725(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकत्वं तादृशज्ञानविशिष्ट-तादृशज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविशिष्टपर्याप्तविषयताविरहवत्त्वे सति यद्रूपावच्छिन्न-विषयतासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नत्वस्य सामान्यलक्षणतयेत्युक्तं भट्टाचार्येण। अत्र यादृशविशिष्टविषकज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबन्धकता तादृशज्ञानविशिष्टतादृशविशिष्टविषयकज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविशिष्टपर्याप्तविषयताविरहवत्त्वे सति पुनः तादृशज्ञानविशिष्टतादृशविशिष्टविषयकज्ञानानधिकरण क्षणवृत्तित्वविशिष्ट तादृश-विशिष्टपर्याप्तविषयताविरहवत्त्वे सतीति क्रमेण यादृशयादृशविशिष्टविषयकज्ञाने ज्ञानवैशिष्ट्यावच्छिन्नानुमितिप्रतिबन्धकत्वं वर्तते तादृशविशिष्टपर्याप्तविषयताविरहवत्त्वं लक्ष्यतावच्छेदकीभूतयद्रूपावच्छिन्ने निवेशनीयम्—अन्यथा अयोगोलकवृत्तिवह्न्यादेरपि नित्यदोषत्वापत्तिः।

End:

(fol. 7) धूमाभाववदयोगोलकीयवह्निमदयोगोलकवृत्ति अयोगोलकीयवह्नित्वस्य विशिष्टान्तरत्वेनोपादातुं शक्यत्वात्।

(fol. 8) प्रतिबन्धकतात्वावच्छिन्नाधेयतासंबन्धेन प्रतियोगिताकाभाववत्त्वमपि निवेश्यमिति ज्ञेयम्।

1556

PM1735 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वम् अनुमित्यवृत्ति तादृश-विशिष्टद्वयविषयताशून्यप्रतीतिविषयत्वस्य निवेशे ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदे अतिप्रसंगवारणं न संभवति। यत्रादौ न जलवान् वह्न्यभाववान् इति ज्ञानं, किं तु ह्रदो वह्निमान् जलवान् इति ज्ञानं समूहालम्बनानुमित्यात्मकं, तदुत्तरक्षणे जलवान् वह्न्यभाववान् इति ज्ञानं, तादृशजलावच्छेदेन वह्न्यभाववत्तानिश्चयस्य एकक्षणावच्छेदेनैकात्मवृत्तित्वरूपवैशिष्ट्यं

जलवद्ह्रदविषयकनिश्चयात्मकपूर्वानुमितौ वर्तत इति एकक्षणावच्छेदेनैकात्मवृत्तित्वरूपसंबन्धेन जलावच्छेदेन वह्न्यभाववत्तानिश्चयविशिष्टजलवद्ह्रदविषयकनिश्चयत्वं न प्रकृतानुमित्यवृत्ति ।

End:

तथा च घटो गगानाभाववदभाववत्कालीनगगनवानित्यत्र गगनाभाववदभाववत्कालीन गगनाभाववद्घटविषयकनिश्चये तु या प्रकृतानुमितिनिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकता तस्यास्तादृशानुमितित्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूतबाधविषयित्वावच्छिन्नतया, एवं तादृशप्रतिबन्धकतावच्छेदकताया अपि तादृशबाधविषयित्वावच्छिन्नतया तद्भिन्नत्वं न तादृशप्रतिबन्धकतावच्छेदकतायां, किंतु अप्रामाण्यज्ञानाभावविशिष्टज्ञानत्वादिनिष्ठावच्छेदकतायामेव, तद्भेदस्य तादृशबाधनिश्चये सत्त्वाल्लक्षणसमन्वयः । ह्रदो वह्निव्याप्यवान् इत्यत्र वह्निव्याप्याभाववद्वृत्तिवह्न्यभाववं . . . विषयकनिश्चये या प्रकृतानुमितिनिरूपितप्रतिबन्धकतावच्छेदकता वह्न्यभावावच्छेदेन वह्निव्याप्याभावप्रकारकनिश्चयविशिष्टह्रदधर्मिक वह्न्यभावप्रकारकनिश्चय . . .

1557

PM1743(c) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

. . . न चैवं क्वचिदप्यसंकीर्णबाधितस्थले हेतुविषयताया अनवच्छेदकत्वेन प्रायश इत्यसंगतमिति वाच्यम् । उत्पत्तिकालावच्छिन्नो घटो गन्धवान् घटत्वादित्यादौ हेतुविषयतायाः तादृशप्रतिबन्धकतावच्छेदकत्वेन तत्संगतेः । न च तत्रापि गन्धाभावेऽव्याप्यवृत्तित्वज्ञानाभावदशायां गन्धाभावव्याप्यपृथिवीत्ववत्तापरामर्शेन अनुमितिप्रतिबन्धान्नाव्याप्तिरिति वाच्यम् । तादृशज्ञानाभावविशिष्टबाधज्ञानस्य प्रतिबन्धकत्वेऽपि तथाविधतदभावव्याप्यवत्ताज्ञानादेः प्रतिबन्धकत्वानुपगमात् गन्धाभावे गन्धाविरोधज्ञानस्य गन्धाभावव्याप्यवत्ताज्ञान इव तदभावव्याप्यवत्ताज्ञाने प्रतिबन्धकत्वौपयिकविरोधिज्ञानमुद्राविघटकत्वाभावेन तत्रेवात्राप्यनुत्तेजकत्वात् ।

End:

तथाविधेति । नन्वेवं वह्निमान् ह्रदो घटवानित्यादिज्ञानीयनिरुक्तविषयतान्यवह्निविषयतावच्छिन्नत्वात् बाधप्रतिबध्यत्वस्याव्याप्तिः, तथाविधविषयतानवच्छेदकरूपावच्छिन्नविषयतानवच्छिन्नत्वं तु न निवेश्यम्, पर्वताभाववत्पर्वतेऽतिव्याप्तेरिति वाच्यम् । तद्रूपावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारता कार्यत्वोपलक्षिता तद्रूपावच्छिन्नविशेष्यतानिरूपिततद्रूपावच्छिन्नप्रकारताबहिर्भूतविषयत्वानवच्छिन्नत्वे तात्पर्यात् तादृशप्रकारतासामान्यावच्छिन्नत्वविवक्षयाप्येतद्दोषवारणं सुकरमिति बोध्यम् । स्वावच्छेदकत्वस्वनिरूपितकारणतावच्छेदकत्वान्यतरशून्यविषयितानाश्रयज्ञानवृत्तितादृशविषयतानवच्छिन्नत्वस्य प्रतिबध्यतायां निवेशे निरवच्छिन्नविषयतायाः परामर्शादौ स्वीकारे असंभव इति ध्येयम् ।

1558

PM1743(d) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

कार्यतासाक्षात्कारे हि कार्यतावच्छेदकरूपेण कार्यसाक्षात्कार एव कारणं, प्रमेयत्वादिना कार्यप्रत्यक्षात् कार्यप्रत्यक्षानुदयात् परामर्शकार्यतावच्छेदकघटितानुमितिसाधारणं परामर्शविशिष्टत्वमेव; तदेव प्रकृते तादृशधर्म इति बाधादाव्याप्तेर्दुर्वारत्वात्। यदि वस्तुतः कार्यतावच्छेदकरूपेण कार्यसाक्षात्कारो न कारणं, किं तु कार्यतावच्छेदकत्वेन भासमानरूपेणेति स्वीक्रियते तदा प्रकृतानुमितित्वावच्छिन्नकार्यताया ह्रदोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नत्वेन साक्षात्कारत्वावच्छिन्नजन्यतासाधारणरूपेण जन्यताया लक्षणघटकत्वेन पर्वतो वह्निमानित्यत्र वह्न्यभाववद्ध्रदादावतिप्रसङ्ग इति प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नत्वेन प्रकृतपक्षकप्रकृतसाध्यव्याप्यहेतुमत्तापरामर्शत्वावच्छिन्ननिरूपितत्वेन च कार्यताविषयकत्वविशिष्टसाक्षात्कारत्वावच्छिन्नजन्यतात्वेन निवेशः क्रियते। तथा च न कोऽपि दोषः।

End:

एवं धूमेन पर्वते वह्न्यापत्तौ व्यभिचारस्तत्राप्रामाण्यज्ञानानास्कन्दितपरामर्शस्यैव हेतुत्वादित्यनुमितित्वनिवेशः। तथा च तदवच्छिन्नकार्यतानिवेशान्नानुपपत्तिः। नन्वेवमपि ह्रदो भूतलं च वह्निमानित्यनुमितेस्तादृशसंबन्धिग्रहत्वेन तत्प्रतिबन्धकज्ञानविषयवह्न्यभाववद्भूतलादावतिव्याप्तिरिति चेन्न। तादृशकार्य . . . . रूपकयत्किंचित्संबन्धवत्ताव्यापकप्रतिबध्यतानिवेशात्। ह्रदो वह्निमानित्यसमूहालम्बनात्मकग्रहेऽनुयोगित्वरूपसंबन्धगतत्वेनादोषात्। न चानुयोगित्वादेः स्वरूपसंबन्धरूपतया ग्रहभेदेन भेदात् यत्किंचिदनुयोगिताव्यापकत्व . . . .

1559

PM1743(e) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

यद्रूपावच्छिन्नविषयतासामान्यं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नत्वमिति हेत्वाभाससामान्यलक्षणे धूमवान् वह्नेरित्यत्र मेयत्वविशिष्टधूमाभाववद्वृत्तिवह्निरूपव्यभिचारे अतिव्याप्तिः, अतः विशिष्टान्तराघटितत्वेन यद्रूपावच्छिन्नं विशेषणीयं, तादृशविशिष्टान्तराघटितत्वं च स्वावच्छिन्नप्रकारतावच्छेदकं यदनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं तदनवच्छिन्नप्रकारतावच्छेदकत्वम्। स्वपदं यद्रूपावच्छिन्ने लक्षणं संगमनीयं तद्रूपावच्छिन्नपरम्। तथा च मेयत्वविशिष्टव्यभिचारानवच्छिन्ना या प्रकारता व्यभिचारवद्वानिति ज्ञानीया व्यभिचारवन्निष्ठा

तदवच्छेदको यो व्यभिचारः अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयताकः तदनवच्छिन्नप्रकारतावच्छेदकत्वं मेयत्वविशिष्टव्यभिचारे नास्ति ।

End:

स्वावच्छिन्नविषयताभिन्ना या विषयता तादृशविषयतानिरूपकतावच्छेदके अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकत्वमिव अनुमितिप्रतिबन्धकतानिरूपितस्वरूपसंबन्धरूपावच्छेदकताश्रयीभूतविषयत्वादीनामनिवेशेन तावतापि लाघवानपायादिति चिन्त्यम् । अथैवमपि स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यदनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं तदवच्छिन्नविषयताभिन्ना या विषयता तन्निरूपकतावच्छेदकं यत् स्वं तद्धर्मवत्त्वमेव वाच्यमिति चेन्न; व्यभिचारविशिष्टे अतिव्याप्तेः । तथा हि व्यभिचारविशिष्टत्वावच्छिन्ना विष . . .

1561

PM1743(h) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

वह्निमान् धूमादित्यत्र वह्न्यभाववद्ध्रदेऽतिव्याप्त्यभाव इति ध्येयम् । अथ समूहालम्बनानुमितिमादायातिव्याप्तेर्वारणाय स्वसाक्षात्कारजनकसाक्षात्कारविषयताविशिष्टप्रतिबध्यत्वोक्तौ सर्वसामञ्जस्ये तदर्थं कल्पान्तरानुसरणं व्यर्थम् । विषयतावैशिष्ट्यं च स्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसंबन्धेन अनुमितितत्साक्षात्कारपरत्वे समूहालम्बनानुमितिमादाय वह्न्यभाववद्ध्रदादावतिव्याप्तिः स्यात् । अतः कल्पान्तरानुसरणमिति भट्टाः ।

ननु स्वावच्छिन्नत्वस्वनिरूपितकारणतावच्छेदकत्वान्यतरसंबन्धेन कार्यतावैशिष्ट्या या विषयता तदवच्छिन्नप्रतिबध्यतानिवेशेनैवोक्तदोषवारणसंभवे कथं कल्पान्तरानुसरणमिति चेत् । न । न च परस्परव्यभिचारवारणाय स्वान्यवहितोत्तरत्वघटितकार्यकारणभावस्यावश्यकतया तत्रानुमितित्वादेः प्रवेश एव नास्तीति कथमनुमितित्वादिघटितलक्षणान्तरं निर्वाह्यमिति वाच्यम् ।

End:

न च प्रकृतपक्षकप्रकृतसाध्यकप्रकृतलिङ्गकानुमितित्वव्यापकप्रतिबध्यत्व, प्रकृतानुमितिहेतुपरामर्शत्वव्यापकप्रतिबध्यत्व एतदन्यतरनिरूपितप्रतिबन्धकतानिवेशे न कोऽपि दोष इति वाच्यम् । व्यापकत्वादेर्द्विधा निवेशगौरवमित्यभिप्रेत्य प्रकृतसाध्यकप्रकृतसाध्यव्याप्यप्रकारकसमूहालम्बनानुमितिप्रतिबध्यं निवेश्य कल्पान्तारानुसरणं **दीधितिकृतः** । न च तत्कल्पे वह्निव्याप्याभाववद्ध्रदादावतिव्याप्तिः, तस्य हेतुमत्त्वग्रहाविरोधितया स्वरूपासिद्ध्यनात्मकत्वादिति वाच्यम् । तस्यापि व्याप्यत्वासिद्धित्वेन लक्ष्यतायाः **मधुरानाथेनासिद्धिग्रन्थे** लिखितत्वात् ।

एतेन पक्षः साध्यवान् साध्यव्याप्यो हेतुः हेतुमान् पक्षः इत्याकारकानुमितिः खण्डशो निवेशनीयेति न दोष इत्यायासोऽपि नोपादेयः । तावतापि आचार्यमतावलम्बनतोऽनिस्ताराच्च ।

1562

PM1744(b) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

. . . . . द्वितीयभागोपादानवैयर्थ्यात्। वस्तुतस्तु यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति ज्ञानवैशिष्ट्यानवच्छिन्नतादृशप्रतिबन्धकतानवच्छेदकतादृशविशिष्टद्वयविषयताशून्यप्रतीतिविषयत्वमेव सत्यन्तार्थः। अत्र च तादृशप्रतिबन्धकतानवच्छेदकविषयिताशून्यप्रतीतिविषयत्वमात्रोक्तौ असाधारण्यासंग्रहः, असंभवो वा। तथाहि। ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववान् ह्रद इत्याकारकदोषज्ञाने ह्रदत्वनिष्ठप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतापि काचन वर्तते, तथा च निरुक्तविशेष्यतायाः प्रतिबन्धकतावच्छेदककोट्यप्रविष्टतया प्रतिबन्धकतानवच्छेदकत्वेन तत्र च ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वस्य सत्त्वेन तादृशविशेष्यत्वशून्यप्रतीतिविषयतावच्छेदकत्वस्य वह्न्यभाववद्ह्रदत्वेऽभावेनासंभव इति भावः।

End:

इत्थं साधनाप्रसिद्धिविषयकज्ञाननिष्ठतादृशविशेष्यित्वप्रकारित्वादेः ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताशून्यवृत्तित्वाभवेन प्रत्येकज्ञानीयविशिष्टद्वयमेव तादृशमिति तच्छून्यप्रतीतिविषयतावच्छेदकत्वस्य प्रकृतदोषतावच्छेदकधर्मे सत्त्वेन लक्षणसङ्गतेः। न चैवं विशिष्टद्वयोपादानं व्यर्थं, ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताशून्यवृत्तिविषयताशून्यप्रतीतिविषयतावच्छेदकत्वनिवेशेनैव सकलदोषोद्धारादिति वाच्यम्। असाधारण्यासंग्रहात्। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताशून्यवृत्तिविषयिता असाधारण्यविषयिता भवतीति तच्छून्यप्रतीतिविषयतावच्छेदकत्वस्य असाधारणत्वे अभावेन अव्याप्तिप्रसङ्गात्।

1563

PM1744(c) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

व्यावृत्तिरिति निष्कर्ष इति। अथैवमप्यभावत्वेन वह्न्यभावत्वेन वा ह्रदत्वावगाहिनोऽभाववान् वह्न्यभाववान् वा वह्न्यभाववानित्यप्रतिबन्धकज्ञानवारणमशक्यम्। यत्संबन्धावच्छिन्नयद्रूपावच्छिन्नविषयितावत्त्वमिति रीत्या विवक्षायामपि घटो रूपाभाववानित्यादौ रूपवद्घटादिरूपबाधाव्याप्तिर्दुर्वारैव, रूपत्वेन घटत्वावगाहिनो रूपवान् रूपवानिति ज्ञानस्याशक्यवारणत्वादिति। यत्तु स्वभिन्नत्वस्वनिरूपितविषयतानिरूपितत्वोभयसंबन्धेन यद्रूपावच्छिन्नविषयतात्वं विशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तादृशविषयतात्वावच्छिन्नाभाववत्त्वं

विवक्षितम्। एवं च ह्रदो वह्न्यभाववानिति ज्ञाने उक्तोभयसंबन्धेन वह्न्यभावत्वावच्छिन्नविषयकता-विशिष्टाया अभावत्वाद्यवच्छिन्नविषयताया असत्त्वात् अभावत्वेन ह्रदत्वावगाहिनि चोक्तज्ञाने तत्सत्त्वात् तद्व्युदासः।

End:

न चैवमपि ह्रदत्वेन ह्रदत्वावगाहिनो ह्रदवान् वह्न्यभाववान् इति ज्ञानवारणमशक्यम्; ह्रदत्वावच्छिन्नविषयतासामान्यावच्छिन्नप्रतियोगिताया अपि वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयितासा-मान्यावच्छिन्नतया ह्रदत्वावच्छिन्नविषयतासामान्यस्यैवोक्तविधया तदन्तःपातित्वादिति वाच्यम्। यद्रूपावच्छिन्नविषयतात्वसमनियत . . . .

1564

PM1744(d) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

नन्वेवं प्रथमलक्षणे संशयादिवारकतया यथार्थपदसार्थक्ये तद्वैयर्थ्यकथनमसंगतमिति, चेद-त्रोच्यते यथार्थपदानुपादानेऽप्यप्रामाण्यज्ञानानास्कन्दितत्वविशेषणमावश्यकम्। एवं चाप्रामाण्यस्य भ्रमत्वप्रामाण्याद्यभावाद्यनेकरूपतया तज्ज्ञानाभाववैशिष्ट्यनिवेशे गौरवम्। किं च ह्रदो वह्निमानिति निश्चये ह्रदत्वावच्छेदेन वह्न्यभावज्ञानं भवत्वितीच्छया ह्रदो वह्न्यभाववानित्याहार्यज्ञाने तत्रेच्छा-घटितसामग्र्याः प्रतिबन्धकत्वेन ह्रदे वह्न्यभावभानेऽपि प्रतिबन्धकान्तरवशात् वह्निभानासंभवः। तादृशज्ञानव्यावर्तनायानाहार्यत्वं निवेशनीयम्। तस्मात् स्वाभाववत्त्व स्वावच्छिन्नप्रतिबन्धकतावच्छेद-कवत्त्वोभयसंबन्धेनाभावविशिष्टान्यत्वमेकमेव ज्ञाने निवेशनीयम्।

End:

न च यद्धर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित यद्धर्मावच्छिन्नप्रकारताशालित्वं प्रकृतानु-मितित्वव्याप्यं तद्धर्मावच्छिन्नाभावादिप्रकारतानिरूपिततद्धर्मपर्याप्तावच्छेदकताकविशेष्यतान्यत्वमुक्त-स्थले विवक्षणीयमतो न दोष इति वाच्यम्। काञ्चनमयह्रदो वह्निमान् धूमादित्यादौ शुद्धह्रदत्वा-वच्छेदेन वह्न्यभाववत्त्वरूपबाधाव्याप्तिप्रसंगात्। तत्रत्यबाधबुद्धेर्वि . . . .

1565

PM1744(e) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

प्रथमनंचोपरि। स्वावच्छिन्नविषयकत्वावच्छिन्नेत्यत्र द्वितीयमवच्छिन्नत्वं यदि स्वरूपसंबन्ध-रूपावच्छेदकतानिरूपकत्वं तदासंभवः। तथा हि। वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयकत्वावच्छिन्नायां

वह्न्यभाववद्ध्रदसमानकालीनजलवान् धूमाभाववान् इति निश्चयविशिष्टवह्न्यभाववद्ध्रदसमानकालीनजलत्वावच्छिन्नविषयतानिरूपित ह्रदत्वावच्छिन्नविषयताशालिनिश्चयत्वावच्छिन्नायां प्रतिबन्धकतायामाधेयतासंबन्धेन ह्रदविशिष्टवह्न्यभावत्वावच्छिन्नविषयताया अनवच्छेदकतया असंभवप्रसङ्गात् ।

End:

न चैवमपि ह्रदो वह्न्यभाववानितिज्ञाननिष्ठे वह्न्यभावत्वावच्छिन्नविषयकत्वे तादृशप्रतिबन्धकतासामान्यानतिरिक्तवृत्तित्वस्यापि सत्त्वेन पुनरसंभवतादवस्थ्यमिति वाच्यम् । अत्रावच्छेदकमित्यनेन स्वाव्यापकतादृशप्रतिबन्धकतासामान्यमित्यर्थस्य विवक्षिततयासंभवानवकाशात् । स्वावच्छिन्नविषयकत्वनिष्ठानतिरिक्तवृत्तित्वरूपावच्छेदकतानिरूपकप्रतिबन्धकतासामान्यं स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयकत्वसामान्यनिष्ठस्वरूपसंबन्धरूपावच्छेदकतावदित्युक्तावपि प्रतिबन्धके यद्विशेषणं तत्प्रतिबन्धकतावच्छेदकं, तद्विशेषणं तु प्रतिबन्धकतावच्छेदकतावच्छेदकं न तु प्रतिबन्धकतावच्छेदकमिति मते वह्न्यभावद्ध्रदत्वावच्छिन्नविषयकत्वव्यापकप्रतिबन्धकतासामान्यान्तर्गतायां वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालित्वविशिष्टनिश्चयत्वावच्छिन्नायां विषयिता . . .

1566

PM1745 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

नञः अनुयोगितावच्छेदकावच्छेदेन अभावान्वयाबोधकत्वव्युत्पत्तेः द्रव्यं न रूपवदिति वाक्यप्रामाण्यवारणाय उपगन्तव्यतया घटत्वमनित्यं घटत्वादित्यादौ हेतुविषयतायाः बाधादिप्रतिबन्धकतावच्छेदकत्वेन हेतुविषयतात्वावच्छेदेन तदनवच्छेदकत्वबाधादाह—प्रायश इति । तथा च प्रायःपदाद्यसमभिव्याहृतनञ एव तथाविधव्युत्पत्तेः न कश्चिद्दोष इति भावः । बाधादिज्ञानप्रतिबन्धकतायामित्यादि । अथ बाधितस्थले पक्षे हेतुसत्वे व्यभिचारस्य, तदसत्त्वे असिद्धेरावश्यकतया बाधज्ञानप्रतिबन्धकतायां हेतुविषयतायाः अनवच्छेदकत्वेऽपि व्यभिचारासिद्ध्यन्यतरज्ञानप्रतिबन्धकतायां तस्यावच्छेदकत्वान्न तत्रातिव्याप्तिः । यत्तु असङ्कीर्णबाधितस्थले गन्धप्रागभावावच्छिन्नघटो गन्धवान् पृथिवीत्वादित्यादौ तादृशान्यतरनावश्यकत्वात् दूषणगमनं न संभवति ।

End:

स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतासामान्यं यद्रूपावच्छिन्नविषयताव्यापकं तादृशधर्मावच्छिन्नयत्किंचिद्विषयकयादृशयादृशधर्मावच्छिन्नानिरूपितं तादृशतादृशधर्मावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकधर्मावच्छिन्नत्वं तृतीयपरिष्कारः ।

स्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतासामान्यं यद्रूपावच्छिन्नविषयकत्वव्यापकं तद्धर्मावच्छिन्नविषयतात्वव्यापकतावच्छेदकधर्मावच्छिन्ननिरूपितान्यकत्वमिति तुरीयपरिष्कारः ।

द्वितीयनचकल्पस्यायमनुगमः । धर्मविशिष्टप्रतीतिविषयतावच्छेदकत्वम् । वैशिष्ट्यं च . . .

1567

PM1746 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यदनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं तद्धर्मवत्त्वमिति समुदितार्थः। तथा च स्वपदस्य लक्ष्यतावच्छेदकत्वेनाभिमतपरत्वात् मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यदनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं यद्व्यभिचारत्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य मेयत्वविशिष्टव्यभिचारत्वे विरहात् न मेयत्वविशिष्टव्यभिचारस्य दोषत्वम्।

End:

एवं च ह्रदो गगनवान् धूमादित्यत्र धूमाभाववद्ह्रदस्य दोषत्वसंभवेऽपि ह्रदो गगनवान् द्रव्यत्वादित्यत्र गगनाभाववद्द्रव्यत्ववतोऽपि व्यभिचारत्वेऽपि गगनवान् पर्वतो वह्निमान् धूमादित्यत्र गगनाभाववत्पर्वतरूपाश्रयासिद्धिरेव दोषः। न तु तत्र व्यभिचारस्वरूपासिद्धिदोषौ। तत्र गगनाभाववत्पर्वतत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्य ह्रदवृत्तिगगनाभावत्वस्यैव विशिष्टद्वयाविषयप्रतीतिविषयतावच्छेदकस्य यद्रूपपदेन धर्तव्यतया तदाश्रयनिष्ठमुख्यविशेष्यताशून्यप्रतीतिविषयतावच्छेदकत्वस्य गगनाभाववत्पर्वते सत्त्वात् तत्र लक्षणगमनं संभवति इत्यसंभवो नाभिहितः। एवं च व्यभिचारानवच्छिन्नं प्रकारतावच्छेदकं व्यभिचारावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकं बाधत्वव्यभिचारत्वादिकम्। तदनवच्छिन्नप्रकारतावच्छेदकत्वस्य च व्यभिचारत्वात् व्यभिचारवत्यतिव्याप्तिः। अतस्तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य निवेशः।

1568

PM1748 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

तत्र अनुमितिपदमनुमितिनिष्ठकार्यतानिरूपकसंबन्धित्वेनानुमितितत्कारणज्ञानपरमिति कल्पं परित्यज्य कल्पान्तरानुसरणं दीधितिकारेण कृतम्। तत्र भट्टाचार्येणाभासो दत्तः स यथा पर्वतो वह्निमानित्यादौ पर्वतो वह्निमान् ह्रदश्च तथा इति विरोधिवह्न्यभाववद्ह्रदेऽतिव्याप्तिः, तादृशसंबन्धित्वग्रहस्य प्रतिबध्यतावच्छेदकत्वात्। तदवच्छिन्नप्रतिबध्यतानिवेशेऽसंभवात्। तादृशसंबन्धित्वग्रहव्यापकप्रतिबध्यतानिवेशे एकतरज्ञानविरोधिबाधादावव्याप्तिः। उभयविरोधिपक्षसाध्याप्रसिद्ध्यादावेव लक्षणगतिरिति कल्पान्तरमाह।

End:

परे तु यादृशरूपपदेन ह्रदत्वावच्छिन्नानुयोगिताकत्वविशिष्टविशेषणताविशेषेण संबन्धेन वह्न्यभावत्वाधिकरणमुपादेयम्। अतो न एकत्र द्वयमिति रीत्या ज्ञानमादाय दोषः, तत्र ह्रदत्वावच्छिन्नानुयोगिताकत्वविशिष्टविशेषणतायाः संसर्गतानभ्युपगमेन तादृशविशिष्टविषयत्वाभावेनासंभवात्। तस्याश्च संसर्गताया ह्रदत्वं धर्मितावच्छेदकीकृत्य वह्न्यभावावगाहिज्ञान एव उपगम इत्याहुः।

1569

PM1749 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयताव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपावच्छिन्नत्वं दोषसामान्यलक्षणमिति **गादाधरी**। ननु अनुमित्यवृत्तित्वमेव निवेश्यतां, किं व्यापकत्वनिवेशेन। न च ह्रदो वह्निव्याप्यवान् इत्यादौ वह्न्यभाववद्ह्रदे अतिव्याप्तिः, वह्न्यभाववत्ताबुद्धिं प्रति वह्निव्याप्यवत्तानिश्चयस्य तदभाववत्तानिश्चयविधया प्रतिबन्धकत्वेन वह्निव्याप्यवान् वह्न्यभाववान् इति समूहालम्बनानुमितेरनुत्पत्त्या वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयतायामनुमित्यवृत्तितासत्त्वादिति वाच्यम्।

End:

ननु यत्र धूमव्यभिचारिवह्निमान् धूमाभाववानिति बाधनिश्चयोत्तरं धूमव्यभिचारिवह्निमान् धूमव्याप्यवान् इत्याहार्यज्ञानं तत्र तन्निष्ठाधिकरणतायां विशिष्टान्तरव्यभिचारविषयताप्रयोज्यत्वसत्त्वात् अव्याप्तिकथनमसंगतमिति चेन्न। यादृशस्थले व्यभिचारघटितबाधनिश्चयोत्तरं तादृशाहार्यज्ञानं न जातं तत्राव्याप्तिः। अथवा ह्रदो वह्निमान् इत्यादावेव अवच्छेदकावच्छेदेन वह्नेः साध्यत्वे अवच्छेदकावच्छेदेन बाधविषयताप्रयोज्यतायां विशिष्टान्तरसामानाधिकरण्येन बाधविषयताप्रयोज्यत्वस्यैव सत्त्वादवच्छेदकावच्छेदेन बाधेऽव्याप्तिः। अतः उभयाभावप्रयोजकाभावाधिकरणतेति। एवं च अवच्छेदकावच्छेदेन बाधविषयताप्रयोज्यह्रदत्वसामानाधिकरण्येन वह्निवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विशिष्टान्तरसामानाधिकरण्येन बाधविषयताप्रयोज्यत्वसत्त्वेन अव्याप्तेर्वारणसंभवादिति ध्येयम्।

Colophon:

इति **सामान्यनिरुक्तिद्वितीयलक्षण**विचारः।

1570

66350(b) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसंगात्, तत्त्वनिर्णयादिरूपतदेककार्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते—अथेतीति **दीधितिः**। नन्वव्यवहितपूर्वं सपरिकरहेतोः प्रस्तावात्

तदाभासेत्यत्र तत्पदेन तस्यैवोपस्थापनात् सपरिकरहेतोराभासाप्रसिद्धया संदर्भाशुद्धिरिति चेत्, अत्र नव्याः। सपरिकरं हेतुमित्यत्रासमासलिखनादेव तदाभासेत्यत्र तत्पदेन शुद्धहेतुत्वावच्छिन्नस्यैवोपस्थितिः। अन्यथा सति समाससंभवेऽसमासस्य स्वरसविरुद्धत्वादिति प्राहुः।

End:

यद्वा ईदृशव्याप्तिवारणाय विशिष्टद्वये स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वनिवेशापेक्षया विशिष्टद्वयविषयकनिश्चये स्वावच्छिन्नविषयताशून्यत्वं सकृदेव निवेश्यमिति। एवं चात्र कल्पद्वयेऽपि नीलोत्पलवद्धूदपक्षकस्थले बाधाव्याप्तिवारणायानतिरिक्तत्वदलव्यावृत्तिः साधु संगच्छते तथापि अभावत्वावच्छेदेन वह्नेः साध्यतायां वह्न्यभाववद्ह्रिमत्यतिप्रसंगो दुर्वार इति चेन्न; तत्र बाधत्वस्य सत्त्वेन लक्ष्यत्वात्। अलक्ष्यत्वे तु विशेष्यदलघटकप्रतिबन्धकतायां तत्प्रतिबन्धकताभेदस्य निवेशनीयत्वादिति प्राहुः।

1572

66354(b) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

प्रकृतानुमितिप्रतिबन्धकताविशिष्टत्वनिवेशेनैवोपपत्तौ अव्यापकविषयताशून्यत्वं विशिष्टान्तराघटितत्वं विशिष्टद्वयाघटितत्वं च नोपादेयम्। वैशिष्ट्यं च स्वाव्यापकप्रतिबन्धकताशून्यत्वसंबन्धेन; न च तथापि ह्रदत्वावच्छेदेन वह्नौ साध्ये सामानाधिकरण्येन वह्न्यभाववद्ध्रदे अव्याप्तिः। जातिमान् ह्रद इति ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताविशिष्टत्वस्य जात्यवच्छेदेन वह्न्यभावावगाहिनि जातिमान् वह्न्यभाववानिति ज्ञाने सत्त्वादतोऽव्यापकविषयताशून्यत्वमुपादेयम्।

End:

न चैवं सति विशिष्टवैशिष्ट्याघटितसत्प्रतिपक्षेऽव्याप्तिरिति वाच्यम्। प्रकृतानुमितित्वव्यापकप्रतिबध्यताविशिष्टप्रतिबन्धकताया एव लक्षणे निवेश्यत्वात्। प्रतिबन्धकतावैशिष्ट्यं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंबन्धेन। स्वनिष्ठावच्छेदकता च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदद्वयवत्त्वसंबन्धेन। एकभेदप्रतियोगितावच्छेदकता च स्वनिरूपितत्वसंबन्धावच्छिन्ना। अपरभेदप्रतियोगितावच्छेदकता च स्वविषयकज्ञानविषयविशिष्टवैशिष्ट्याघटितसत्प्रतिपक्षविषयकज्ञानत्वसमनियतत्वसंबन्धेन। तादृशज्ञानं भूयादितीच्छाप्रतिबन्धकतामादाय लक्षणं संगमनीयम्। इत्थं च वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिविरहेण विशिष्टद्वयाघटितत्वं नोपादेयमेव। वस्तुतस्तु प्रकारतावच्छेदकांशे संशयस्यानभ्युपगमात्। विशेष्ये विशेषणमितिरीत्या जायमानपरामर्शसाधारणरूपेणैवानुमितिजनकत्वात्। विशिष्टवैशिष्ट्यघटितसत्प्रतिपक्षस्य तादृरूपेणालक्ष्यतया यथाश्रुतमेव सम्यक्। इत्थं च प्रागुक्तप्रकारस्यानावश्यकतया विशिष्टद्वयाघटितत्वसार्थक्यमिति अलं पल्लवितेन।

The following lines are added at the end with a note on the margin: मूलकृतेत्यादिग्रन्थः नात्र घटकः—

मूलकृता सत्प्रतिपक्षहेतुदोषानभिधानात् स्वयं तान् प्रदर्शयति-सत्प्रतिपक्षस्त्विति। सत्प्रतिपक्षहेतोर्दोषस्त्वित्यर्थः। तुकारेण मूलनिरुक्तसत्प्रतिपक्षव्यवहारविषयतावच्छेदकरूपस्य दोषत्वव्यवच्छेदः। व्याप्यवान् व्याप्यविशिष्टः। पक्षनिष्ठौ आधेयतया पक्षविशिष्टौ। एवमादिरिति। आदिपदादाधेयतासंबन्धेन प्रकृतपक्षसाध्यकप्रकृतसाध्याभावादिपक्षकानुमितिजनकपरामर्शविषय-प्रकृतपक्षव्याप्यविशिष्टसाध्याभावादिपरिग्रहः।

1573

66356(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

यद्रूपावच्छिन्नविषयतात्वं यादृशविशिष्टविषयकत्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकमित्यत्र यद्रूपावच्छिन्नविषयतात्वे स्वावच्छिन्नविषयकत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वनिवेशे ह्रदो वह्न्यभाववानितिज्ञानीयविषयतायाः ह्रदरूपविषयभेदेन भिन्नतया चालिनीयन्यायेन सर्वासां विषयतानां भेदप्रतियोगितावच्छेदकत्वात् असंभव इत्यतस्तदुपेक्षितम्। नन्वेतादृशाव्यापकविषयताशून्यत्वनिवेशेऽप्यभावत्वेन ह्रदत्वावगाह्यभाववान् वह्न्यभाववानिति ज्ञानवारणमशक्यम्। न च यद्रूपावच्छिन्नावच्छेदकताकविषयतात्वमिति विवक्षया तद्वारणसंभव इति वाच्यम्।

End:

एवं सति प्रातिस्विकरूपेणानेकविशिष्टान्तरविषयित्वाप्रयोज्यत्वानां निवेशे गौरवात्, तदपेक्षया स्वाव्यापकीभूतविषयिताज्ञानीयविशिष्टान्तरविषयताप्रयोज्यत्वनिवेशे घटाभावघटाभाववद्भूतलविषयतायाः स्वाव्यापकविषयताशून्यज्ञानवृत्तित्वाभावात्। एवं च व्यभिचारघटितबाधे अव्याप्तिवारणाय स्वाव्यापकीभूतविशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशनमावश्यकम्।

1574

66359(d) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतयत्किंचिद्विषयित्वं यादृशयादृशधर्मावच्छिन्नानिरूपितं तादृशतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् स्वं

तद्रूपावच्छिन्नत्वमेव समुदितार्थ इति कल्पे बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वावच्छिन्न-प्रतिबन्धकतासामान्यावच्छेदकीभूतं न बाधत्वादिप्रतिबन्धकतावच्छेदकं, यद् बाधविशिष्टव्यभिचार-विषयित्वं तन्न बाधविशिष्टव्यभिचारत्वावच्छिन्नानिरूपितमिति बाधविशिष्टव्यभिचारत्वावच्छिन्ने अतिव्याप्तिरुक्ता।

End:

यद्विषयकत्वेतिपदं लक्षणया यादृशविशिष्टविषयत्वार्थकतया व्याचष्टे—यद्विषयकत्वेनेति ॥ यादृशविशिष्टविषय . . .

1575

66360(b) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

ननु यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं स दोष इति दोषलक्षणे ज्ञानस्येत्यत्र ज्ञान-पदोत्तरषष्ठ्यर्थवृत्तित्वस्य तृतीयाप्रकृत्यर्थयद्विषयकत्वेनान्वयात् तस्य तृतीयार्थावच्छेद्यतायामन्वय इति यद्विषयकत्वमित्यनेन योजनया ज्ञाननिष्ठं यद्विषयकत्वं अनुमितिप्रतिबन्धकतावच्छेदकं तत्त्वं दोषत्वमित्यर्थः प्रतीयते। तत्रानुमितिपदेनानुमितिसामान्यविवक्षणे कस्याश्चिदपि प्रतिबन्धकतायाः यावदनुमितिनिरूपितायाः दुर्लभत्वाद . . . परत्वे विवक्षिते पर्वतो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदादेरपि दोषत्वप्रसङ्गः तद्विषयकत्वस्यापि ह्रदपक्षकवह्निसाध्यकानुमितिप्रतिबन्धकता-वच्छेदकत्वात्।

End:

अत्र कल्पे ह्र . . . सत्प्रतिपक्षसंग्रहाय यदि प्रतिबन्धकतावच्छेदकविषयितायां विरोध्यनु-मितिजनकतानवच्छेदकत्वं निवेश्यते तदा वह्न्यभावविशिष्टजलव्यापकवह्न्यभावसमानाधिकरणजल-विशिष्टह्रदेऽतिव्याप्तिः तादृश . . . वच्छिन्नप्रतिबन्धकत्वाव्याप्यकत्व(?) सत्प्रतिपक्षविषयकनिश्चयत्वा-वच्छिन्नप्रतिबन्धकतावच्छेदकविषयताया एव सत्त्वात् निरुक्तसंबन्धेन बाधप्रतिबन्धकतावत्त्वं निरुक्तविशिष्टविषयकज्ञानेऽक्षतमेवेति . . .

1576

66361(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

. . . स्वरूपसंबन्धरूपावच्छेदकत्वं निवेश्यम्। न चासाधारण्येऽव्याप्तिरिति वाच्यम्, असा-धारण्यविषयित्वावृत्तित्वज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिरूपितत्वोभयाभाववदवच्छेदकतावद्यद्रूपा-

वच्छिन्नविषयतासामान्यं तद्रूपावच्छिन्नत्वमेव तदर्थः। एवं च शैवालवृत्तिवह्निव्यापकीभूताभावप्रतियोगित्वत्वावच्छिन्नविषयितासामान्यनिष्ठप्रतिबन्धकतावच्छेदकतायां ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिरूपितत्वसत्त्वेऽपि असाधारण्यविषयित्वावृत्तित्वं नास्तीति उभयाभावो वर्तत इति नाव्याप्तिः।
End:

तदनन्तर्भावादिति। अयं भावः—शुद्धसमवायेन विशेषगुणवद्घटत्वावच्छिन्नस्य घटत्वव्यापकत्वाघटितत्वेन घटत्वव्यापकताघटितगुणवद्घटत्वावच्छिन्नरूपबाधस्य तादृशाश्रयासिद्धिघटकताप्रसक्तिरेव नास्ति। घटत्वव्यापकविशेषगुणप्रतियोगिकसमवायेन विशेषगुणवद्घटत्वावच्छिन्नस्य विशेषत्वगुणत्वउभयावच्छिन्नव्यापकताघटितत्वेऽपि गुणत्वरूपसामान्यधर्मावच्छिन्नव्यापकताघटितस्य बाधस्य न तत्र प्रवेश इति नाश्रयासिद्धावव्याप्तिशङ्केति। न च घटत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकगुणत्ववत्प्रतियोगिकसमवायेन गुणविशिष्टघटत्वावच्छिन्नस्य तादृश . . .

1577

66361(b) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

. . . वानिति ज्ञानासमानकालीनं यत् ह्रदो वह्न्यभाववानिति ज्ञानं तत्र ह्रदधर्मिकधूमप्रकारकबुद्धित्वावच्छिन्नानिरूपितप्रतिबन्धकतावच्छेदकत्वस्य सत्त्वात् नासाधारण्येऽव्याप्तिः। न हि प्रतिबन्धकांशे यद्विशेषणं तस्य प्रतिबन्धकतावच्छेदकतावच्छेदकरूपेण प्रतिबन्धकतावच्छेदकत्वं संभवति। अत एव संशयनिश्चयविषयताया भेदे वह्न्यभावत्वावच्छिन्नविषयतानिरूपितह्रदत्वावच्छिन्नविषयतात्वेनापि निश्चयनिष्ठप्रतिबन्धकतावच्छेदकत्वविरहात् संशयीयविषयताया ऐक्यमभ्युपगम्य संशयीयविषयताया निश्चयनिष्ठप्रतिबन्धकतावच्छेदकत्वमुपपादितं भट्टाचार्येण।
End:

अत्र चरमविषयतायां यत्किंचित्त्वनिवेशनं तादृशविषयतात्वसामानाधिकरण्येन यादृशयादृशधर्मावच्छिन्ननिरूपितत्वलाभाय। तादृशविषयतात्वावच्छेदेन तन्निवेशे मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः। प्रतिबन्धकतायां स्वावच्छिन्नविषयकत्वानिवेशे पर्वतो धूमवान् वह्नेरित्यादावव्याप्तिः। अनुमितिप्रतिबन्धकतासामान्यान्तर्गतपर्वतधर्मिकधूमवत्त्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्य व्यभिचारत्वावच्छिन्नविषयतायां विरहात्, पर्वतत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायां बाधरूपदोषासंभवात् बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयताया अपि तादृशप्रतिबन्धकतासामान्यावच्छेदकत्वासंभवादिति। अत्र प्रतिबन्ध . . .

1578

67968 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

चिन्तामणावयेति। अथशब्दार्थः सद्धेतुनिरूपणानन्तर्यम्। तच्च निरूपणेऽन्वेति। हेत्वाभासा इत्यत्र हेतुवदाभासन्त इति व्युत्पत्तिः। अत्र हेतुपदं व्याप्तिपक्षधर्मतावि[शि]ष्टपरम्। वत्यर्थः सादृश्यम्।

तच्च भेदविशिष्टवृत्तिधर्मवत्त्वम्। हेतुपदार्थस्य वत्यर्थैकदेशे भेदे वृत्तित्वे चान्वयः। धात्वर्थो ज्ञानविषयता। तदेकदेशे ज्ञाने सादृश्यस्यान्वयः। आश्रयत्वमाख्यातार्थः। तथा च व्याप्तिपक्षधर्मताविशिष्टभिन्नत्वे सति तद्वृत्तिधर्मप्रकारकज्ञानविषयताश्रया इत्यर्थः। यद्यपि सर्वेषामेव हेतुतया हेतुभिन्नाप्रसिद्धिः। न च हेतुपदस्य प्रकृतसाध्यनिरूपितव्याप्तिपक्षधर्मताविशिष्टपरतया पर्वतो वह्निमान् शैवालादित्यादौ वह्निव्याप्यपर्वतवृत्तिधूमभेदः शैवाले प्रसिद्ध इति वाच्यम्। तावतापि ह्रदो वह्निमान् धूमादित्यादौ व्याप्तिपक्षधर्मताविशिष्टभिन्नाप्रसिद्धिः।

End:

स्वव्यधिकरणधर्मावच्छिन्ना इति। स्वाधिकरणवृत्तिभिन्नत्वं व्यधिकरणत्वं यदि तदा वह्निव्यभिचारस्यापि कालिकादिसंबन्धेन धूमवृत्तितया स्वपदेन गगनवानात्मेति ज्ञानीयात्मनि विशेष्यताया एव धर्तव्यतया तादृशभ्रमवारणमशक्यम्। न च यादृशप्रकारतावच्छेदकसंबन्धेन स्वाधिकरणवृत्तिभिन्नधर्मनिष्ठतादृशप्रकारताया या विशेष्यता तदनिरूपकत्वस्यैव विवक्षणीयतया न दोष इति वाच्यम्। विशिष्टसत्तावान् गुण इति ज्ञानस्य प्रमात्वापत्तेः। स्वाधिकरणवृत्तितानवच्छेदकधर्मावच्छिन्नतादृशप्रकारताविवक्षणे च सामान्यं सत्तावदिति ज्ञानस्य प्रमात्वापत्तिः। स्वानधिकरणवृत्तित्वरूपवैयधिकरण्यविवक्षणे ह्रदो वह्न्यभाववानिति ज्ञानस्य प्रमात्वानुपपत्तिः।

1579

68454(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

लिङ्गज्ञानस्येति। लिङ्गांशनिवेशस्य निष्प्रयोजनकतयेति। ननु लिङ्गात् ज्ञानमिति व्युत्पत्त्या लिङ्गज्ञानपदात् लिङ्गज्ञाननिष्ठकारणताकस्यैव लाभात् लिङ्गज्ञानकारणताकत्वस्य अनुमितिमात्र एव सत्त्वेन तत एव संशयाहार्यज्ञानव्यावृत्तिसंभवेन कथं तद्वैयर्थ्यमभिहितम्। न च ह्रदो द्रव्यभिन्नमित्यत्र स्वरूपतो द्रव्यत्ववद्ध्रुदरूपवाधेऽव्याप्तिः, निरवच्छिन्नविधेयताकानुमितेरप्रामाणिकत्वात्, द्रव्यह्रदो घनवानित्यनुमितेरव्यापकविषयताशून्यत्वाभावादिति वाच्यम्। यदि च अयं गौरित्यादौ तादात्म्येन गोरेव साध्यत्वम् न तु गोत्वस्य, स्वरूपत एवोपस्थितेः हेत्वर्थानन्वयात् अवयवग्रन्थोक्तरीत्या परार्थानुमानाभावेऽपि स्वार्थानुमाने क्षतिविरहात्।

End:

वस्तुतस्तु स्वावच्छेदकेत्यादिग्रन्थः अत्यन्तानुपपन्नः। तथा हि—ह्रदो वह्न्यभाववानिति निश्चयस्य न तावत् वह्न्यभावसंशयान्यवह्न्यभावांशे अप्रामाण्यज्ञानशून्यानाहार्यज्ञानत्वेन प्रतिबन्धकता। तथा सति ह्रदो वह्न्यभाववान् प्रमेयवह्न्यभाववान् वा ह्रद इति आंशिकसंशयस्यापि प्रतिबन्धकतानुपपत्तेः। इत्थमांशिकाप्रामाण्यज्ञानास्कन्दितनिश्चयस्यापि। किं तु वह्न्यभाववत्त्वावच्छिन्नप्रकारताविशिष्टत्वेन प्रतिबन्धकता। वह्न्यभावत्वावच्छिन्नप्रकारतावैशिष्ट्यं च—स्वनिरूपितह्रदत्वावच्छिन्नविशेष्यताकत्व . . .

1580

69718 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

गादाधरीयसामान्यनिरुक्तौ मूलोक्तलक्षणानां दुष्टलक्षणत्वे दोषेष्वतिव्याप्तिः । अथ च प्रथमलक्षणे समूहालम्बनज्ञानविषयोदासीनपदार्थवारणाय यथार्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयत्वनिवेशस्यावश्यकतया बाधादिप्रतिबन्धकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वेन बाधितहेतावव्याप्तिरपि । द्वितीयलक्षणस्य तु यथाश्रुत एव बाधितहेतुविषयतायाः प्रतिबन्धकतानवच्छेदकत्वादव्याप्तिरित्याह **गदाधरः**। अत्र केचित् ; बाधितस्थले असिद्धिव्यभिचारान्यतरस्यावश्यकत्वात् बाधप्रतिबन्धकतायां हेतुविषयताया अनवच्छेदकत्वेऽपि असिद्धिव्यभिचारान्यतरप्रतिबन्धकतायां हेतुविषयतायाः प्रतिबन्धकतावच्छेदकत्वावश्यकत्वात् कथं बाधितहेतौ दुष्टलक्षणाव्याप्तिः ।

End:

अत्रेदं तत्त्वम् । स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्यद्रूपं तत्तद्रूपावच्छिन्नविषयित्वाव्यापकविषयिताशून्यत्वमित्येव विशिष्य निवेशावश्यकतया घटवद्भूतलादिविषययित्वाप्रयोज्यत्वस्यापि निवेशे गौरवात् । लाघवात् स्वावच्छिन्नविषयित्वाव्यापकविषयताशून्यज्ञानवृत्तिर्या स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्धर्मावच्छिन्नविषयता तद्धर्मावच्छिन्नविषयित्वाप्रयोज्यत्वमेव निवेश्यम् । एवं च धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ बाधाव्याप्तिवारणाय तादृशविषयतात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वमेव निवेश्यमिति ।

1581

69720 हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

. . . स्योपादानसंभवात् । न च यादृशविशिष्टविषयकनिश्चयविशिष्टनिश्चयनिष्ठयादृशविषयतासा . . . . . वच्छेदकत्वनिवेशेनैवोपपत्तौ विशिष्टद्वयाघटितत्वशरीरेऽनतिरिक्तवृत्तित्वनिवेशनं व्यर्थमिति वाच्यम् । . . . भावप्रतियोगित्वविशिष्टहेतुविषयकनिश्चयत्वेन प्रतिबन्धकत्वेन जलत्वविशिष्टविषयकनिश्चयविशि . . . . . ष्टहेतुतायाः स्वरूपसंबन्धरूपावछेदकत्वेन जलत्वविशिष्टवह्निव्यापकीभूताभावप्रतियोगि . . . . . वारकतया तद्दलसार्थक्यात् । . . . यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमिति . . . . . स्वरूपसंबन्धरूपावच्छेदकतावदित्येव वक्तव्यम् ।

End:

न च तथापि विषयताप्रयोजक . . . यत्वविशेषणेनेति वाच्यम् । तथापि पर्वतो धूमाभाववानित्याकारकभ्रमात्मकबाधज्ञानीयप्रतिबन्धकता . . . . . साध्यावगाहित्वाभावाधिकरणतायां विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वसत्त्वेन त . . . . . मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिर्धूमाभाववत्पर्वताप्रसिद्धया विशिष्टान्तरपदेन साध्यस्य धर्तुमशक्यत्वा . . . . . मास्त्विति शङ्कते—न चेति । स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नयत्किंचिद्विशिष्टनिरूपितविष . . . पकरूपावच्छिन्नाप्रयोज्यत्वनिवेशापेक्षया लाघवात् स्वावच्छिन्नविषयिताशून्यप्रतीतिविषयतावृत्तिनिवेशनेन व्यभिचारघटितबाधसंग्रहसंभवेऽपि व्यापकत्वगर्भपर्यन्तनिवेशस्य प्रयोजनाभावः । तथा च . . . . . तिव्याप्तिः, मेयत्वविशिष्टव्यभिचारविषयिताशून्यभ्रमात्मकबाधज्ञानवृत्तिविषयतानिष्ठं यन्निरूप्यनिरूपकभावापन्नं तदवच्छिन्नप्रयोज्यत्वसत्वादिति वाच्यम् । तथासत्यसंभवापत्तेः । व्यभिचारत्वावच्छिन्नविषयताशून्यभ्रमात्मकव्यभिचार . . . . . यकताद्दशविषयतात्वे तदवच्छिन्नप्रयोज्यत्वसत्त्वात् । प्रतीतौ प्रमात्वनिवेशे यद्यपि न दोषः तथापि . . . व्यभिचारेऽतिव्याप्तिवारकतया सार्थक्यमिति भावः । इदं तावदवधेयम् । यत्किंचिद्विशिष्टान्तरविषयितात्वव्यापक . . .

1582

69776(a) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

अथात्राव्यापकविषयताशून्यत्वनिवेशे जातिमान् वह्न्यभाववानिति ज्ञानव्यावर्तनेऽपि अभाववान् वह्न्यभाववानिति ज्ञानाव्यावर्तनात् । निवेशे दोषोऽपि जातिमान् वह्निमानित्यादौ वह्न्यभाववज्जातिमदादावव्याप्तिः । चालनीन्यायेन सर्वेषां वह्न्यभाववज्जातिमद्विषयित्वानामप्यव्यापकत्वेन ताद्दशविषयितानामुक्तबाधविषयकज्ञाने सत्त्वादिति चेन्न । यद्रूपावच्छिन्ननिरूपितयत्किंचिद्विषयिताविशिष्टनिश्चयत्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वस्य विवक्षणात् । वैशिष्ट्यं चात्र स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तनिरूपकतावच्छेदकतावच्छेदकविषयत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकविषयिताशून्यत्वसंबन्धेन । यत्किंचिद्विषयित्वमपि यद्रूपपर्याप्तनिरूपकतावच्छेदकत्वेन निवेश्यम् । ह्रदो वह्न्यभाववानित्यादिज्ञानीय वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयतायामपि ह्रदत्वावच्छिन्नविषयितात्वं वर्तते ताद्दशयत्किंचिद्विषयित्वमादाय शुद्धह्रदेऽतिव्याप्तिः । जातिमान् वह्न्यभाववान् इत्यादिज्ञानीयविषयितायामपि ह्रदत्वावच्छिन्नविषयितात्वं वर्तते । ताद्दशयत्किंचिद्विषयित्वमादाय तत्रापि शुद्धह्रदेऽतिव्याप्तिः स्यात् ।

End:

अथ प्रमेयत्वविशिष्टधूमव्यभिचारिवह्निमदादावतिव्याप्तिः प्रमेयत्ववान् धूमाभाववान्, प्रमेयत्ववान् धूमव्यभिचारिवह्निमान् इत्यादिज्ञानीयप्रमेयत्वविशिष्टधूमव्यभिचारिवह्निमद्विषयितायाः

निरुक्तोभयाभावप्रयोजकसाध्यवैशिष्ट्याभावाधिकरणताप्रयोजकत्वेन प्रमेयत्वावच्छेदेन धूमाभावाप्रसिद्ध्या विशिष्टान्तरपदेन तस्योपादातुमशक्यतया विशिष्टान्तरविषयत्वाप्रयोज्यत्वेन च निरुक्तविशिष्टान्तराघटितत्वात् विरोधिविषयताप्रयुक्तत्वविशिष्टसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वाभावाधिकरणताया: तादृशविशिष्टविषयकनिश्चयोत्तरानुमितित्वव्यापकतया विशेष्यदलसत्त्वादिति चेन्न, स्वविषयितात्वव्यापकरूपावच्छिन्नप्रयोजकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयत्वानवच्छिन्नत्वोभयाभावनिवेशेनैवातिव्याप्तिवारणसंभवादिति ।

1584

69787(c) हेत्वाभाससामान्यनिरुक्तिक्रोडपत्रम्

Beginning:

